यस्य प्रवर्ग्यः महावीरः सन्तुपसदं शवं क्रियते स्तो होमरहितोग्निः आवसथ्यं औपासनाग्निं तयोर्द्वैदेवंतं तवक्रतः तस्य शीर्षं शिरः चितयः इष्टकाचयनानि सेचास वः प्राणाः ॥ २६ ॥ प्रातः सवनादीन्यवस्थितिरास
अग्निष्टोमोऽत्य २ नंवाल्या यसवस्थावा अग्निष्टोम उक्थः षोडशी वाजपेयो अतिरात्रो प्तोर्यामश्च इति संस्थाभेदाः त्वग्मांसादि सप्तधा तवः ॥ सत्राणि द्वादशाहादीनि बहुयागसंघातरूपाणि अग्नेः सोमोयत्तः ससोमाः ॥ क्रतवः ॥ तद्रूपस्त्वं इष्टियजनं ५६
अनुष्ठानदेव बंधनेयस्यसः ॥ २७ ॥ ॥

नं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदा समाये भमानतले मोस्यंगीरदर्शीकस्त्रिपुरुः श्रीनिपत्नृषिवनामकानिपर्वाणियस्यसयतस्मृतिरित्यर्थः किंभूतं
न त्वंश्राश्रायतात्राः तरवाः तत्सदृशैः रघुवैरेरपोदरयन्कथमस्मारपारं उन्माराणांपारमभ्यानायारमवसानंयु
यामभवतितथाविदारयन्कथंभूतामग्रेप्रलयसमये ॥ न वतास्वधुस्तः भूमि प्राणिपुः सनजीवाथीयंतेप्रस्ता — स्फुस३
सर्वजीवाधारभूतांयांस्त्वयमध्यथन्त्रामि मध्येनरथारजरारेषुतवानितिभावः ॥ प्रनेनोद्धरणे नायासं योः
त्यजति ॥ २० ॥ रसायाः सकाशादुत्थितः सेरुरुचे समग्रप्रोभततवापेभासिगदाप्रधुम्नप्रागाबृत्तरूं थानेशतिहृतं

रघुवैरैः तरधैर्दरयंस्तदायउन्मारपारांविपुत्रूरसायां ॥ ददर्श गांतवसप्रपुरग्रेयांजोवधानीस्त्वयमध्यथ
ते ॥ २० ॥ स्त्वरंकृयोद्धृत्यमहीनिमग्नांमसउत्थितः मेरुरुचैर्मयाः ॥ न व्यापिदेयंगदयाऽपनंतस्तनाभः
संदीपिततोत्रमन्युः ॥ २१ ॥ जवानरूं थानममस्त्यविक्रमंसहीलयेभेमगराडिवोभसि ॥ २२ ॥ तदू
रूपेकांकितगंडतंडोयु यागजेंद्रो नगतीविभिंदन् ॥ तमालनीलांसितदंतकोट्याव्यामस्वन्निपेतं
गजलीलयांग ॥ २२ ॥ प्रजापवद्धांजलयोउवाकैविरिंचिमुख्याउपतस्थुरीशं ॥ २३ ॥ मयथः जि
तंजितंतेजितयत्तभावनत्रयीतनुंस्वांपरिधुन्वतेनमः ॥ यद्रोमगर्तेषुनिलिल्युरध्वरास्तस्मैनमः का
रणसूकरायते ॥ २४ ॥

नमस्तुः सहन्नाहौविक्रमोयस्यतंदैत्यस्तनाभंचक्रेतद्धन्संदीपितः तीव्रोमन्युर्यस्य ॥ यद्वामयिविद्यमानेकिं — द्व२
मितिपरिभवंसहस्वइतिस्तनाभनसंदीपितमन्युः सश्रीभगवान्सिंहोगजेंलीलयाजघान ॥ २१ ॥ श्वेंदु
टीका ॥ २२ ॥ गजेंद्रोजगतीलीयाविदारयन्नगोरिकयाययाख्रणगंडतंडोभवतितथातस्यरक्तमेवपंकस्ले
नांकितोगंडौतुंडं चयस्यजघानेतिशेषेणान्वयः ॥ २२ ॥ प्रजापालत्यनुवाक ॥ वैदिकैस्तक्तैनन्सदृशैर्वाक्यैः
तवुष्टुवुः ॥ भोजितंजितंतामितिसंभ्रमेवाक्यं ॥ पौनरुक्तिः यत्नेभीवानेत्राक्रियतेइतितथात्रयीवेदमयींनि — जितंतेत्वयार
लिल्युर्लीनप्रायाः कारणंपृथ्व्युद्धरणेतेनसूकराय ॥ २४ ॥

श्री भाग टी ४५ ३

घर्घरितं तन्नाम्नवकरणावधिनिश्चयेनयः स्वखेदः तस्य क्षयिष्णु नाशकं ते इति पुनः किं प्रसिद्धि आयपनार्थो त्रि
भिः पवित्रैः ऋग्यजुःसामभिर्मन्त्रैः अगृणन्स्म ॥ २५ ॥ वेदवितानस्य तन्मूर्तिर्यस्य सः अतएवात्मनो गुणानुवादं तित
घ्यात तेषां ब्रह्मोच्चारितं वेदमवधार्य तान्प्रति ॥ २६ ॥ कथंभूतास्ते विविशे तत्स्वरूपं दर्शयामास ॥ द्वाभ्यां उच्चैः क्षिप्तो
वालः पुच्छो येन खचरः आकाशचारी कठिनः सटाः स्कंधबालान् ॥ खराणि तीक्ष्णानि रोमाणि यस्यां त्वच
गृह्य खुरैः आहतानि अभ्राणि येन सितदंष्ट्रः शुक्लदंष्ट्रः ईक्षणा नेत्रयोर्ज्योतिर्यस्य निरालोको यस्तदा प्रका

निशम्य ते घर्घरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ॥ जनस्तपः सत्यनिवासिनस्ते त्रिभिः प
वित्रैर्मुनयो गृणन्स्म ॥ २५ ॥ तेषां सतां वेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादं ॥ विनद्य भूयो
विबुधोदयाय गजेन्द्रलीलो जलमाविवेश ॥ २६ ॥ उत्क्षिप्तवालः खचरः कठोरः सटा विधुन्वन् ख
ररोमशत्वक् खुरा ॥ हताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः ॥ २७ ॥ घ्राणेन पृथ्व्याः पदवीं
विजिघ्रन् क्रोडापदेशः स्वयमध्वरांगः ॥ करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान् गृणतोऽविश
त्कं ॥ २८ ॥ स वज्रकूटांगनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् ॥ उत्सृष्टदीर्घोर्मिभुजैरिवार्तश्चु
क्रोश यज्ञेश्वर पाहि मेति ॥ २९ ॥ ॥

प्रांतराभावात् ॥ बभासे प्रकाशितवान् महीध्रः पृथिव्या उद्धर्ता ॥ २७ ॥ क्रोडापदेशः वराहच्छद्म स्वयमध्वरांगोऽपि
.. पश्चाद्विघ्राणेन विजिघ्रन् गृणतः स्तोतॄन् विप्रान् ॥ उद्वीक्ष्य ऊर्ध्वं वीक्ष्य कं जलमविशत् ॥ २८ ॥ तदानीं
तनः समुद्रः अतिः उत्सृष्टैः ॥ स उदन्वान् समुद्रः आर्त इव स्तनयन् ॥ शब्दं कुर्वन्नो यज्ञेश्वर मां पाहि मा
मवेत्येवं चुक्रोश ॥ आर्तिमाह यस्मात् ॥ उत्सृष्टा उत्क्षिप्ता ऊर्मयः एव भुजास्तैर्विशिष्टः ॥ अत एव
देहः वज्रकूटो वज्रमयः पर्वतः ॥ तद्वदंगं यस्य श्रीभगवतस्तस्य निपातवेगेन विशीर्णा कुक्षिर्यस्य ॥ २९ ॥

महीवेदित्यतआह ॥ यदोकःस्थावरंजंगमंमहीहेदेवअस्याःदेव्याः ॥१५॥ एवंध्याने तोपिपुत्रवरकांडएवोद्धतानामपांम
ध्येसन्नामवसन्नांनिमग्नांसमुन्नेष्ये उद्धरिष्यामि ॥१६॥ चिंतामेवाह ॥ सृजतोमेवार्भिरद्भिरसांरसातलंहिरण्यरेण
सर्गे नियुक्तैःमेयस्यहृदयात्संभवविदधातु ॥ संपादयतुतवहे राहतोकःसूक्ष्मवराहः ॥१८॥ खस्थआकाशे

यदोकःसर्वसत्त्वानांमहीमग्नामहांभसि ॥ अस्याउद्धरणेयत्नोदेवदेव्याविधीयतां ॥१५॥ मैत्रेयउवाच
परमेष्ठीत्वपांमध्येतथासन्नामवेक्ष्यगां ॥ कथमेनांसमुन्नेष्यइतिदध्यौधियाचिरं ॥१६॥ सृजतोमे
क्षितिर्वार्भिःप्लाव्यमानारसांगता ॥ अथात्रकिमनुष्ठेयमस्माभिःसर्गयोजितैः ॥१७॥ यस्याहंहृ
दयादासंसईशोविदधातुमे ॥ इत्यभिध्यायतोनासाविवरात्सहसानघ ॥ वराहतोकोनिरगादंगु
ष्ठपरिमाणकः ॥१८॥ तस्याभिपश्यतःखस्थःक्षणेनकिलभारत ॥ गजमात्रःप्रववृधेतदद्भुतमभून्महत
॥१९॥ मरीचिप्रमुखैर्विप्रैःकुमारैर्मनुनासह ॥ दृष्ट्वातत्सौकरंरूपंतर्कयामासचित्रधा ॥२०॥ किमेतत्सौ
करंव्याजंसत्त्वंदिव्यमवस्थितं ॥ अहोबताश्चर्यमिदंनासायामेविनिःसृतं ॥२१॥ दृष्टोंगुष्ठशिरोमा
त्रःक्षणाद्गंडशिलासमः ॥ अपिस्विद्भगवानेषयज्ञोमेखेदयन्मनः ॥ इतिमीमांसतस्तस्यब्रह्मणः
सहसूनुभिः ॥ भगवान्यज्ञपुरुषोजगर्जागेंद्रसन्निभः ॥२३॥ ब्रह्माणंहर्षयामासहरिस्तांश्चद्विजो
त्तमान् ॥ स्वगर्जितेनककुभःप्रतिस्वनयताविभुः ॥२४॥

स्थितःसन् ॥१९॥ चित्रधाअनेकधा ॥२०॥ एवमेतद्दृष्टोंगुष्ठमात्रोदृष्टःगंडशिलासमःस्थूलपाषाणः ॥ त
स्मात्सोयज्ञःश्रीविष्णुः ॥ निजरूपतिरोधानेनमेमनःखेदयन्निति ॥२२॥ मीमांसमानस्यसतःजगर्जअगेंद्र
गिरींद्रतुल्यः ॥२३॥ गर्जितप्रयोजनमाहब्रह्माणमिति ॥२४॥ ॥

श्री
भात
टी
७७

त्वमेवैकः पिता सर्वेषां यतो जन्म सुहृद्गुरुः ॥ यो यः कश्चित्त्वमेवात्र तस्य वयं यद्यपि श्रमापेक्षा नास्ति अथाप्यस्माकं ते
शुश्रूषा केन कर्मणा भवेत् तद्ब्रूहि हीत्यन्वयेणान्वयः हे ईश अस्मास्वात्मशक्तिप्रयुञ्जकस्त्वं शुकर्मस्वसमर्थं केन क
र्मणा भवेत् तद्ब्रूहि ॥ इदं कर्तव्यमिति कथयेत् कृत्वा यस्मिन् कृते सति विश्वकृत् सर्वतः ॥ ८
प्रीत्युयेत्यात्मना स्वयमेवा४
तं पुत्राभ्यर्च्य स्वलि भद्रं स्यात् स्यात् अस्त भुवीति धातः ॥ यद्यतो मामांशाधिअत्रार्पितं निवेदितं अतः प्रीतोस्मि
मैत्रेयः ॥ यदास भार्या यासां केजातः स्वायंभुवो मनुः ॥ प्रांजलिः प्रणतः प्राह वेदगर्भमभाषत ॥ ९ ॥ त्वमेकः स
र्वभूतानां जन्मकृद्वृत्तिदः पिता ॥ अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत् ॥ १० ॥ तद्विधेहि नमस्तुभ्यं
कर्मस्वीड्यात्मशक्तिषु ॥ यत्कृत्वेह यशो विष्वगमुत्र च भवेद्गतिः ॥ ११ ॥ ब्रह्मोवाच ॥ प्रीतस्तुभ्यमहं तात स्व
स्ति स्ताद्वां क्षितीश्वर ॥ यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितं ॥ १२ ॥ एतावत्यात्मजैर्वीर कार्या ह्यप
चितिर्गुरौ ॥ शक्त्याप्रमत्तैर्गृह्येत सादरं गतमत्सरैः ॥ सत्वमस्यामपत्यानि सदृशान्यात्मनो गुणैः ॥ उत्पाद्य
शास मधर्मेण गां यज्ञैः पुरुषं यज ॥ १३ ॥ परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप ॥ भगवांस्ते प्रजाभर्तुर्हृषी
केशोऽनुतुष्यति ॥ १४ ॥ येषां न तुष्टो भगवान्यज्ञलिङ्गो जनार्दनः ॥ तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्व
यं ॥ १५ ॥ मनुरुवाच ॥ आदेशेऽहं भगवतो वर्तेयामीवसूदन ॥ स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो ॥ १६
अपचितिः पूजा सर्वेषा सर्वज्ञत्वात् इति शेषः सनकादयो न कुर्वंति वयं किमिति करिष्याम इत्येवं भूतो मन्तो मत्सरो येषां
तैः ॥ १३ ॥ गां पृथ्वीं पालयेत्यर्थः पुरुषं हरिं ॥ १४ ॥ प्रजापालकस्य तव तुष्टो भविष्यति ॥ १५ ॥ यज्ञलिंगो यज्ञमूर्तिः अ
नृपा ॥ १६ ॥ गां धर्मेण पालयेत्यर्थः पुरुषं हरिं ॥ १७ ॥ प्रजापालकस्यैव त्वं तुष्टो भविष्यति ॥ १८ ॥ यज्ञलिंगो यज्ञमूर्तिः अ
पगतो ह्यस्माकं केवलं श्रम एवेत्यर्थः यद्यस्मात् आत्मैव स्वयं नादृतः तस्मिन्नतुष्टे साध्यस्यैवासिद्धेः सर्वा
त्मत्वाच्च तस्य ॥ १७ ॥ वर्तेवातिष्ठे अमीव सूदन पापनाशन अत्र जानीहि अत्रास्थानं मम निवासस्थानं दिश ॥ १८ ॥ १६ ॥ ७७

५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यस्तीमासप्तमहिष्यासीन्न एवं बभूविरे इति श्रुतमाः ॥ ५४ तदेवाह सचापीति ॥ ५५ ॥ यत्ताया सांसंततिभिः ॥ ५७
इति श्रीभागवते तृतीये द्वादशः ॥ १२ ॥ त्रयोदशेस्मिन् स्वायंभुमनोराकस्मिकां स्तुतं ॥ धरामुद्धर्तुमुद्भूतः क्रोडा दै
त्यानुस्मृतये ॥ स्वयंभुवः पुत्रः तदेहांप्रपन्नान ॥ १ ॥ विष्वक्सेनोहरिसेवाश्रयोयस्य ॥ ३ ॥ श्रुतस्तस्य श्रीनिवासस्य च

त्रीयासीच्छतरूपाख्या महिष्यस्य महात्मनः ॥ तदा मिथुनधर्मेण प्रजा ह्येधां बभूविरे ॥ ५४ ॥ स चापि
शतरूपायां पंचापत्यान्यजीजनत् ॥ प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ॥ ५५ ॥ आकूतिर्देवहूति
श्च प्रसूतिरिति सत्तम ॥ आकूतिं रुचये प्रादात् कर्दमाय तु मध्यमां ॥ ५६ ॥ दक्षायादात् प्रसूतिं च यत आ
पूरितं जगत् ॥ ५७ ॥ इति श्रीभागवते तृतीये द्वादशः ॥ १२ ॥ श्रीशुक उवाच ॥ निशम्य वाचं वदतो मुनेः पुण्यत
मां नृप ॥ भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः ॥ १ ॥ विदुर उवाच ॥ स वै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयं
भुवः ॥ प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने ॥ २ ॥ चरितं तस्य राजर्षेरादिराजस्य सत्तम ॥ ब्रूहि मे श्रद्द
धानाय विष्वक्सेनाश्रयो ह्यसौ ॥ ३ ॥ श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोर्थः ॥ तत्तद्गु
णानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषां ॥ ४ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्षं स्मृ
र सोपि धर्मनम ॥ प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ॥ ५ ॥

रिते श्रोतव्य मिति स्म हस्त्वविरं श्रमो यस्मिंस्तस्य पुंसोर्थः तस्य त्रयमेवार्थं इडितः स्तुतः न त्वयेषां हृदये स्थितेषां भगवतानां
गुणानुश्रवणं ॥ ४ ॥ सहस्रशीर्सः श्रीकृष्णस्य चरणो उपाधीयेते यस्मिन् श्रीकृष्णः प्रोत्यायस्य महापुरुषस्यानं संगो
ऊ देवी चरणोपसाद्यते ॥ त्यर्थः तमभ्यवष्टाभाषत प्रणीयमानः तेन प्रवर्त्तमानः ॥ ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ५२

त्मनः स्वायुनः प्रत्युक्षरस्वावानीतिश्रुतेः ॥४५॥ महाकल्पेब्रह्मणः प्राहु ... रूपोभवदित्युक्तंतदेवदर्शयन्वर्णानामु
त्पत्तिमाहस्पर्शइतिसार्धेनस्पर्शाःकादिवर्णाःवर्गपंचकंस्वरोऽकारादिः ॥४६॥ ऊष्माणःशषसहचतदंतःस्था
यरलवाःसप्तस्वराःषड्जादयःविहारेणक्रीडया ॥४७॥ अतएवशब्दब्रह्मत्वात् ॥ श्रीपरमेश्वरोऽतितत्प्रकाशने ब्रह्मणः
इत्याह ॥ व्यक्तोवैखरीरूपःअव्यक्तःप्रणवःतदात्मनःतस्य ब्रह्मणःपरःपरमेश्वरआभातिकीदृशःब्रह्मपरिपूर्णःत

तस्योष्णिगासील्लोमभ्योगायत्रीचत्वचोविभोः ॥ त्रिष्टुम्मांसात्स्नुतोऽनुष्टुब्जगत्यस्थ्नःप्रजापतेः ॥४५॥
मज्जायाःपंक्तिरुत्पन्नाबृहतीप्राणतोभवत् ॥ स्पर्शस्तस्याभवज्जीवःस्वरोदेहउदाहृतः ॥४६॥ ऊ
ष्माणमिंद्रियाण्याहुरंतःस्थाबलमात्मनः ॥ स्वराःसप्तविहारेणभवंतिस्मप्रजापतेः ॥४७॥ शब्द
ब्रह्मात्मनस्तस्यव्यक्ताव्यक्तात्मनःपरः ॥ ब्रह्मावभातिविततोनानाशक्त्युपबृंहितः ॥४८॥ ततोऽ
परामुपादायससर्गायमनोदधे ऋषीणांभूरिवीर्याणामपिसर्गमविस्तृतं ॥ ज्ञात्वातद्धृदयेभू
यःचिंतयामासकौरव ॥५०॥ अहोअद्भुतमेतन्मेव्यापृतस्यापिनित्यदा ॥ नह्येधंतेप्रजानूनंदैव
मत्रविघातकम् ॥५१॥ एवंयुक्तकृतस्तस्यदैवंचावेक्षतस्तदा ॥ कस्यरूपमभूद्द्वेधायत्कायमभि
चक्षते ॥५२॥ ताभ्यांरूपविभागाभ्यांमिथुनंसमपद्यत ॥ यस्तुतत्रपुमान्सोऽभून्मनुःस्वायंभुवःस्व
राट् ५३ ॥ ॥ ॥

त्वव्यक्तात्मनोब्रह्मरूपोविततोवभातिव्यक्तात्मनोनानाशक्त्युपबृंहितःऊंकारादिरूपोवभाति ॥४८॥ यावृ
द्धिविशेषणासतीनीहारवत्तमोऽभवत् ॥ ततोपरांप्रकृतिंविडकामासक्तांतद्वेशाद्ब्रह्मणस्तनुस्त्यक्तासदासैव ७म
तद्वंतरप्यवृत्तोकारणमाह ॥ ऋषीणामित्यादिना ॥५०॥ युक्तकृतःयथोचितंकुर्वतःअतएवस्वब्रह्मणः
रूपंद्विधाभूतमित्याह्यर्यत्कायमधापिप्रभिवदंते ॥५२॥ ॥ ॥ ॥की०॥ ॥ ५२

विशेषनिषेधाचं देवत्तः सोप्सुरत्नानाद्विशुद्धिः परमा मतेति स्मृतेः दानमिति दयाभूताभयप्रदानस्य कलानार्हन्ति
षोडशीमिति वचनात् ॥ एवं व्रतयः शौचं दयासत्यमिति पादाः कृते कृता इति प्रथमस्कंधोक्तेर्विरोधः ॥ ४२
सावित्रं ब्र ह्मचर्यं उपनयनादारभ्य गायत्रीमधीयानस्त्रिरात्रं प्राजापत्यं व्रतं यावदृतः सांवत्सरं ब्राह्मं वेद
ग्रहणांतं वृद्धैर्नैष्ठिकं वा तोषु निविडकृष्यादिवृत्तिः संचयो याजनादिवृत्तिः शालीनमयाचितवृत्तिः शिलोंछ
नेयातितकणावृत्तिः ॥ एकवं वनमार्गं शेषितागरस्वृत्तयश्चेतियद्वा शिलोंछ इति द्वंद्वैकेय सप्तमी ॥ एवं वृत्तिभेदः
सतिय रहे स्थिताः संभवंतीत्यर्थः ॥ ४२ ॥ वनेस्थिताः चत्वारः तत्र वैखानसा ग्रफेनपाच्चवृत्तयः ॥ बालखिल्यान

सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा ॥ वार्तासंचयशालीनशिलोंछ इति वै गृहे ॥ ४२ ॥ वै
खानसा वालखिल्यौदुंबराः फेनपा वने ॥ न्यासे कुटीचरः सर्वे बहूदो हंसनिष्क्रियो ॥ ४३ ॥ आ
न्वीक्षिकी त्रयी वार्ता दंडनीतिस्तथैव च ॥ एवं व्याहृतयश्चा सन्प्रणवोयस्य हृत्ततः ॥ ४४ ॥ ॥

वैत्रे लब्धो पूर्वसंचितान्न्यासिनः उदुंबराः प्रातरुत्थाय यां दिशं प्रेक्षंते यत्पश्यंति तत आहृतैः फलादिभि
र्जीवंतः फेनपास्वयंपतितैः फलादिभिर्जीवंतः कुटीचरः स्वाश्रमकर्मप्रधानः बहूदः कर्मोपसर्जनी
भूतज्ञानप्रधानः हंसस्तु ज्ञानाभ्यासनिष्ठः तिथिमर्कमा पर्वविद्याः भूर्भुवः स्वरित्यस्तास्त्रिः समस्ताश्च व्र
ह्मकाः इति यथा ... इति च त्रयी ॥ तथा वक्ष्यति
थी ॥ यथा ह्याश्वलायनः एवं व्याहृतयः ॥ प्रोक्ता व्यस्ताः समस्ता इति यद्वा महर् इति च त्रयी ॥ तथा वक्ष्यति
भूर्भुवः स्वरिति वा पृथगस्तिस्रो व्याहृतयः तासां मध्ये सैनां व त्रयीमर्हेच मस्य ॥ प्रवेद्यते महा इति हृत्तव
तः हृदयां प्राप्तः ॥ ४४ ॥ क्रियः प्रासनतः एते च सर्वे यथोत्तरं श्रेष्ठाः ॥ ४३ ॥ न्यायादीनां सर्वादिकमेतोस्थिनि
का मा हत्र्यान्वीक्षिकीति त्र्यान्वीक्षिकी धर्मो च ॥ ॥ २

ति

श्री
भाग
टी
४२

तेजीयसामपीति तेजस्विनामपि सुश्लोक्यं सत्कीर्तिदं न भवति यतस्तेजीयसां वृत्तं ॥३०॥ तस्मै नमेति ॥३१॥ कथं स्र
क्ष्यामीत्यभिध्यायतः स्रष्टुः ब्रह्मणः चतुःसर्वयुक्तान्मुखात् समवेतान्संगतान् ॥३४॥ चातुर्होत्रं होत्रा
दीनां चतुर्णां कर्म कर्मतंत्रं यज्ञविस्तारः उपवेदैः पुराणैः नयैर्नीतिशास्त्रैश्च सह आश्रमास्तद्वृत्तयश्चास
न् ॥३५॥ मुखतो मुखेभ्यः ॥३६॥ चातुर्होत्रसृष्टिक्रममाह ऋगादि शस्त्रमप्रगीतमंत्रस्तोत्रं होतुः कर्म इज्यामध्वर्योः

तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो ॥ यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्पते ॥ ३० ॥ तस्मै नमो भ
गवते य इदं स्वेन रोचिषा ॥ आत्मस्थं व्यंजयामास स धर्मं पातुमर्हति ॥ ३१ ॥ स इत्थं गृणतः पुत्रान्पुरो
दृष्ट्वा प्रजापतीन् ॥ प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा ॥ ३२ ॥ तां दिशो जगृहुर्घोरां [नीहारं] यद्विदुस्तमः
कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् ॥ ३३ ॥ कथं स्रक्ष्याम्यहं लोकान्समवेतान्यथापुरा
॥ ३४ ॥ चातुर्होत्रं कर्मतंत्रमुपवेदनयैः सह ॥ धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ॥ ३५ ॥ विदुरः स
वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् ॥ यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ॥ ३६ ॥ मैत्रेयः
ऋग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः ॥ शास्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्र
मात् ॥ ३७ ॥ आयुर्वेदं धनुर्वेदं गांधर्वं वेदमात्मनः ॥ स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः
॥ ३८ ॥ इतिहासपुराणानि पंचमं वेदमीश्वरः ॥ सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥ ३९
षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ ॥ आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवं ॥ ४० ॥ वि
द्या दानं तपः सत्यं धर्मस्येति पदानि च ॥ आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ॥ ४१ ॥ ॥

कर्म स्तुतिस्तोमः स्तुतिः संगीतं स्तोमस्तदर्थं ॥ सूक्तसमुदायं त्रिवृत्स्तोमो भवतीत्यादिविहितस्तु क्रमात्
प्रयोज्य प्रायश्चित्तं ब्रह्मणः ॥ ३७ ॥ उपवेदक्रममाह आयुर्वेदमिति आत्मनो मुखैः स्थापत्यं शिल्पकर्मशा
स्त्रं ॥ ३८ ॥ कर्मतंत्रक्रममाह षोडश्युक्थावित पुरीष्यग्निष्टोमः ॥ ४० ॥ ॥ ॥

नीहारं ३

४२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रुद्राणां यूथान् रुद्राः ॥१८॥ विशाम स्वकृति ॥१७॥ अथ यद्दक्षादयो येऽसृजन् । देहांतरेण कृतं सर्गं विवक्षुं तदेहमस्या

रुद्राणां रुद्रसृष्टानां समंताद्ग्रसतां जगत् ॥ निशाम्यासंख्यशो यूथान् प्रजापतिरशंकत ॥१६॥ अ
लं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम ॥ मया सह दहंतीभिर्दिशश्चक्षुर्भिरुल्बणैः ॥१७
तप आतिष्ठ भद्रं ते सर्वभूतसुखावहं ॥ तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवान् ॥१८॥ तपसै
व परं ज्योतिर्भगवंतमधोक्षजं ॥ सर्वभूतगुहावासमंजसा विंदते पुमान् ॥१९॥ मैत्रेयः ॥ एवमा
त्मभुवादिष्टः परिक्रम्य गिरां पतिं ॥ बाढमित्यमुमामंत्र्य विवेश तपसे वनं ॥२०॥ अथाभिध्या
यतः सर्गं दश पुत्राः प्रजज्ञिरे ॥ भगवच्छक्तियुक्तस्य लोकसंतानहेतवः ॥२१॥ मरीचिरत्र्यं
गिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः ॥२२॥ उत्संगान्नार
दो जज्ञे दक्षोऽंगुष्ठात्स्वयंभुवः ॥ प्राणाद्वसिष्ठः संजातो भृगुस्त्वचि करात्क्रतुः ॥२३॥ पुलहो ना
भितो जज्ञे पुलस्त्यः कर्णयोरृषिः ॥ अंगिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत् ॥२४॥ ध
र्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयं ॥ अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः ॥२५॥ हृ
दि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात् ॥ आस्याद्वाक्सिंधवो मेढ्रान्निरृतिः पायोरघाश्र
यात् ॥२६॥ छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः ॥ मनसो देहतश्चेदं जज्ञे विश्वकृतो जग
त् ॥२७॥ वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः ॥ अकामां चकमे क्षत्तः सकाम इति नः श्रुतं ॥२८
तमधर्मे कृतमतिं विलोक्य पितरं सुताः ॥ मरीचिमुख्या मुनयो विश्रंभात्प्रत्यबोधयन् ॥२९
नैतत्पूर्वैः कृतं त्वद्य न करिष्यंति चापरे ॥ यत्त्वं दुहितरं गच्छेरनिगृह्यांगजं प्रभुः ॥३०॥

नो कारणमाह वाचमित्यादिना ॥२८॥ त्वत्तो ये पूर्वे ब्रह्मादयो तैरेतन्न कृतम् ॥ अंगजं कामं ॥ नः

श्री
भाग
टी
५१

नबहु अमन्यत नाभ्यनंदत् ॥ २ ॥ यद्यपि प्रतिकल्पं सनकादिसृष्टिर्नास्ति तथापि ब्रह्मसर्गादिदिशोच्यते वस्तुतस्तु म
न्वसर्गादय एव प्रतिकल्पं भवंति ॥ सनकादयस्तु ब्राह्मकल्पस्था एव प्रवर्तंते ॥ ४ ॥ स्वभूर्ब्रह्मा ॥ ५ ॥ अवध्या

[illegible] नामानि कुरु मे धातः स्थानानि [illegible]

दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बहु अमन्यत भगवद्ध्यानपूतेन मनसान्यां ततोसृजत ॥ ३ ॥ सनकं
च सनंदं च सनातनमथात्मभूः ॥ सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ॥ ४ ॥ तान्बभाषे स्वभूः पु
त्रान्प्रजाः सृजत पुत्रकाः ॥ तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः ॥ ५ ॥ सोवध्यातः सुतैरेवं प्र
त्याख्यातानुशासनैः ॥ क्रोधं दुर्विषहं जातं नियंतुमुपचक्रमे ॥ ६ ॥ धिया निगृह्यमाणोपि भ्रुवो
र्मध्यात्प्रजापतेः ॥ सद्योजायत तन्मन्युः कुमारो नीललोहितः ॥ ७ ॥ इति तस्य वचः पाद्मो भ
गवान्परिपालयन् ॥ अभ्यधाद्भद्रया वाचा मा रोदीस्तत्करोमि ते ॥ ८ ॥ स वै रुरोद देवानां पू
र्वजो भगवान्भवः ॥ नामानि कुरु मे धातः स्थानानि च जगद्गुरो ॥ ९ ॥ यदरोदीः सुरश्रेष्ठ सो
द्वेग इव बालकः ॥ ततस्त्वामभिधास्यंति नाम्ना रुद्र इति प्रजाः ॥ १० ॥ हृदिंद्रियाण्यसुर्व्योम
वायुरग्निर्जलं मही ॥ सूर्यश्चंद्रस्तपश्चैव स्थानान्यग्रे कृतानि ते ॥ ११ ॥ मन्युर्मनुर्महिनसो महा
ञ्छिव ऋतध्वजः ॥ उग्ररेता भवः कालो वामदेवो धृतव्रतः ॥ १२ ॥ धीर्वृत्तिरुशनोमा च नियुत्सर्पि
रिलांबिका ॥ इरावती सुधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः ॥ १३ ॥ गृहाणैतानि नामानि स्था
नानि च सयोषणः ॥ एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः ॥ १४ ॥ इत्यादिष्टः सगुरुणा भगवान्

तोऽवज्ञातः प्रत्याख्यातमनुशासनं यैः ॥ ६ ॥ स चासौ मन्युश्च तन्मन्युः ॥ ७ ॥ बालक इव ॥ १० ॥ अग्रे पूर्वमेव कृता
नि मया ॥ ११ ॥ सयोषणः सस्त्रीकः एभिः स्थानैर्नामभिश्च युक्तः ॥ १४ ॥ सत्त्वं बलमाकृतिः नीललोहितता स्वभा

५१

मन्नमुक्तेन त्वर्थं चयत्राह ॥ विकारैः षोडशभिर्युक्तैरेकादशभिः संयुक्तैः सहितः तदावृत्य इत्यर्थः अयमं-
डकोशो यत्र प्रविष्टः परमाणुवल्लक्ष्यते इत्युत्तरेणान्वयः कीदृशः अंतः पंचाशत्कोटियोजनविस्तृतः
बहिश्च विशेषादिभिः सप्तभिरावृतः ॥ ४० ॥ कीदृशैरंडकोशप्रमाणाद् दशगुणैरुत्तरोत्तराधिकैर्यश्चैतैः
न केवलमयमेक एवापि त्वन्येपि लक्ष्यते ॥ ४१ ॥ सर्वेषां कारणानां कारणं धाम स्वरूपं ॥ ४२ ॥ इति श्रीभावार्थदी-
पिकायां तृतीयस्कंधे एकादशोऽध्यायः ॥ द्वादशेन कुमारादिमनःसर्गस्ततो मिथुनात् कायद्वैधेन यो नस्तु मनुसर्गो विवर्ण्यते
प्रथमं तिर्यक्सर्गात् प्रथमं नविद्यावृत्तीः ससर्जेत्याह तमो नाम स्वरूपाप्रकाशः मोहो देहाद्यहंबुद्धिः महा-

विकारैः सहितो युक्तैर्विशेषादिभिरावृतः ॥ अंडकोशो बहिरयं पंचाशत्कोटिविस्तृतः ॥ ४० ॥ दशो-
त्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ॥ लक्ष्यतेंतर्गताश्चान्ये कोटिशो ह्यंडराशयः ॥ ४१ ॥ तदाहुर-
क्षरं ब्रह्म सर्वकारणकारणं विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ॥ ४२ ॥ इति श्रीभागवते
तृतीयस्कंधे एकादशोऽध्यायः ॥ ११ ॥ मैत्रेयः ॥ इति ते वर्णितः क्षत्तः कालाख्यः परमात्मनः ॥ महि-
मा वेदगर्भोऽथ यथास्राक्षीन्निबोध मे ॥ १ ॥ ससर्जाग्रेंधतामिस्रमथ तामिस्रमादिकृत् ॥ महा-
मोहं च मोहं च तमश्चाज्ञानवृत्तयः ॥ २ ॥

मोहो भोगेच्छा तामिस्रः तत्प्रतिघाते क्रोधः अंधतामिस्रः तन्नाशे अहमेव मृतोऽस्मीति बुद्धिः तदेवोक्तं वैष्णवे ॥
तमोऽविवेको मोहः स्यादंतःकरणविभ्रमः ॥ महामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा ॥ मरणं ह्यंधता-
मिस्रः क्रोध उच्यते ॥ अविद्या पंचपर्वैषा प्रादुर्भूता महात्मन इति ॥ पातंजले पंचैते पंच क्लेशाः ॥ अविद्याऽ-
स्मिता रागद्वेषाभिनिवेशाः इति विपर्ययात्मिका वा ॥ अज्ञानविपर्यासभेदं भयशोकाः तदुक्तं स्याद्गुरु-
तामिस्रः २ स्य विपर्ययोऽस्मृतिरित्यादि ॥ २ ॥ ॥ ॥

पंचत्के भाः १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कल्पान्ते एधिताः सिन्धवः समुद्राः उत्कटः आटोपः क्षोभो येषां तैश्चण्डैर्वातैरीरिता ऊर्मयो येषां ते ॥ ३० ॥ जनलोकस्था आलयो येषां महर्लोकादागतानां अन्येषां वा तैः ॥ ३१ ॥ वैराग्यार्थमाह ॥ एवंविधैरहोरात्रैर्वर्षशतेन सर्वेषां प्राणिनामायुषः परं अवधिकं अस्य ब्रह्मणो यदायुः तदपक्षितमपक्षीणमिवेति लोकोक्तिः गतप्रायमित्यर्थः ॥ ३२ ॥ अपक्षीणत्वमाह यदिति ॥ ३३ ॥ पूर्वस्य परार्धस्यादौ इति त्रिभिः वस्तुकथनमात्रं ॥ ३४ ॥ पाद्मत्वे हेतुः यदिति ॥ ३५ ॥ अयं तु द्वितीयस्यादौ

तावत्त्रिभुवनं सद्यः कल्पान्तैधितसिन्धवः ॥ प्लावयन्त्युत्कटाटोपचण्डवातेरितोर्मयः ॥ ३० ॥ अन्तः स तस्मिन्सलिल आस्तेऽनन्तासनो हरिः ॥ योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ॥ ३१ ॥ एवंविधैरहोरात्रैः कालगत्योपलक्षितैः ॥ अपक्षितमिवास्यापि परमायुर्वयःशतं ॥ ३२ ॥ यदर्धमायुषस्तस्य परार्धमभिधीयते ॥ पूर्वः परार्धोऽपक्रान्तो ह्यपरोऽद्य प्रवर्तते ॥ ३३ ॥ पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत् ॥ कल्पो यत्राभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः ॥ ३४ ॥ तस्यैव चान्ते कल्पोऽभूद्यं पाद्ममभिचक्षते ॥ यद्धरेर्नाभिसरस आसील्लोकसरोरुहं ॥ ३५ ॥ अयं तु कथितः कल्पो द्वितीयस्यापि भारत ॥ वाराह इति विख्यातो यत्रासीच्छूकरो हरिः ॥ ३६ ॥ कालोऽयं द्विपरार्धाख्यो निमेष उपचर्यते ॥ अव्याकृतस्यानन्तस्य ह्यनादेर्जगदात्मनः ॥ ३७ ॥ कालोऽयं परमाण्वादिर्द्विपरार्धान्त ईश्वरः ॥ नैवेशितुं प्रभुर्भूम्न ईश्वरो धाममानिनां ॥ ३८ ॥ ॥

वाराहः कल्पः कथित इति संबन्धः ॥ ३६ ॥ तदेवं कालेन निमित्तेन सत्त्वानामायुःपरिमाणमुक्त्वा कालपरिच्छेदराहित्येन तत्त्वमाह ॥ कालोयमिति द्विपरार्धाख्यः निमेषत्वेन उपचर्यते केवलं न तु तेनापि क्रमेणायुर्गणनं तस्येत्याह ॥ अव्याकृतस्य कार्योपाधिशून्यस्यात एवानन्तस्यानादेश्च जगदात्मनो जगत्कारणस्य ॥ ३७ ॥ तत्परिच्छेदे कालस्यासामर्थ्यादित्याह ॥ कालोयमीश्वरः समर्थोपि भूम्नः परिपूर्णस्य ईशितुं न प्रभुः समर्थः यतो धाममानिनां देहगेहाभिमानिनामेवेश्वरः ॥ ३८

न्तर्दिनस्थितिमाह॥ निशावसान इत्यादिसार्धैः सप्तभिः चतुर्दशमनून्भुंजन्नाभूतसंप्लवमित्यर्थः॥२२॥ किंचिदधिकां यु
गानामेकसप्ततिं मनुवंश्याः महीपालकाः क्रमेण भवन्ति मन्वृषिप्रभृतयस्तु युगपत्समकालमेव भवन्ति सुरेशा इन्द्राः
ताननुवर्तन्ते ये गन्धर्वादयस्तेऽपि॥२४॥ त्रैलोक्यं वर्तयतीति तथा॥२५॥ एष दैनंदिनः इति चतुर्दशसु मन्वन्तरेषु ग
तेषु ब्रह्मणो दिने दिने मनवः सुराः सुरेशा इत्यादयो भवन्ति॥२५॥ स्वमूर्तिभिः मन्वन्तरावतारैर्मन्वादिभिर्द्वारभूतैः

निशावसान आरब्धो लोककल्पोऽनुवर्तते॥ यावद्दिनं भगवतो मनून्भुंजंश्चतुर्दश॥२२॥ स्वं स्वं कालं
मनुर्भुंक्ते साधिकां ह्येकसप्ततिं॥ मन्वन्तरेषु मनवः तद्वंश्या ऋषयः सुराः॥२३॥ भवन्ति चैव युगपत्सु
रेशाश्चानु ये च तान्॥२४॥ एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्तनः॥ तिर्यङ्नृपितृदेवानां संभवो यत्र
कर्मभिः॥२५॥ मन्वन्तरेषु भगवान्बिभ्रत्सत्वं स्वमूर्तिभिः॥ मन्वादिभिरिदं विश्वमवत्युदितपौरुषः
२६॥ तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः॥ कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये॥२७
तमेवान्वपिधीयन्ते लोका भूरादयस्त्रयः॥ निशायामनुवृत्तायां निर्मुक्तशशिभास्करे॥२८॥ त्रिलो
क्यां दह्यमानायां शक्त्या संकर्षणाग्निना। यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः॥२९॥

तैराविष्कृतपुरुषकारः सन् विश्वं रक्षति॥२६॥ रात्रिगतां स्थितिमाह पंचभिः॥ तमसो मात्रां लेशं प्रतिसंरुद्धः
प्रत्याहृतो विक्रमो येन अनुगतमनुप्रविष्टमशेषं यस्मिन्॥२७॥ तदेव स्पष्टयति तमेवेति॥ अपिधीयन्ते इति कर्म
कर्तरि प्रयोगः तिरोहिता भवन्तीत्यर्थः कथं निर्मुक्तो रहितः शशिभास्करश्च यया भवतित्यर्थः श्रीभगवच्छक्तिरू
पायाः संकर्षणमुखाग्निना तेनोष्मणार्दिताः संतः जनलोकं यान्ति॥२९॥॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मीनं

श्री
भाग
टी
३९

इदंस्वमानेनवर्षशतमायुर्गुणितंब्रह्मणइदंकल्प्यतेसृज्यतेइतिकल्पःत्रैलोक्यंतस्माद्बाह्यतोविदोज्ञानिनः ॥१६॥ यो
गराद्धेनयोगसिद्धेन ॥१७॥ द्वादशभिर्वर्षसहस्रैरित्यनेनश्लोकसामर्थ्यतोज्ञातमप्यत्रविधीयतेइत्यवधानंसूक्ष्मत्वाच्चा
श्रुतत्वादिति ॥१८॥ कृतयुगेचत्वारिसहस्राणिसंध्यांशयोश्चत्वारिचत्वारीत्यष्टौशतानिच ॥ एवंत्रेतादिष्वपियो
ज्यं ॥१९॥ युगस्यादौसंध्याअंतेसंध्यांशःउक्तानिशतानिसंख्याययोःतयोरंतरेणमध्येयुगंतस्यविशेषमाह ॥ यत्रे

विदुरउवाच ॥ पितृदेवमनुष्याणामायुःपरमिदंस्मृतं । परेषांगतिमाचक्ष्वयेस्युःकल्पाद्बहिर्विदः ॥१६॥
भगवान्वेदकालस्यगतिंभगवतोननु ॥ विश्वंविचक्षतेधीरायोगराद्धेनचक्षुषा ॥१७॥ मैत्रेयउवाच
कृतंत्रेताद्वापरंचकलिश्चेतिचतुर्युगं ॥ दिव्यैर्द्वादशभिर्वर्षैःसावधानंनिरूपितं ॥१८॥ चत्वारित्रीणिद्वे
चैकंकृतादिषुयथाक्रमं ॥ संख्यातानिसहस्राणिद्विगुणानिशतानिच ॥१९॥ संध्यांशयोरंतरेणयःका
लःशतसंख्ययोः ॥ तमेवाहुर्युगंतज्ज्ञायत्रधर्मोविधीयते ॥२०॥ धर्मश्चतुष्पान्मनुजान्कृतेसमनुवर्तते ।
सएवान्येष्वधर्मेणव्येतिपादेनवर्धता ॥२१॥ त्रिलोक्यायुगसाहस्रंबहिराब्रह्मणोदिनं ॥ तावत्येवनिशा
तातयन्निमीलतिविश्वसृक ॥२२॥ ॥

तिगवालंभादिधर्मविशेषोयत्र [illegible] विधीयतेइत्यर्थःकृतयुगेनतुसंध्यांशयोःतयोरन्येनयुगेनसाधा
रणत्वात् ॥ साधारणधर्मस्तुसंध्यांशयोरप्यस्त्येव ॥२०॥ चतुष्पात्संपूर्णःत्रेतादिषुपादेनपादेनव्येतिह्रसतिपादे
वपादेनवर्धमानेनाधर्मेणेदंतुना ॥ एतत्तुस्वरूपकथनमात्रंवैराग्यार्थंनतुधर्मसंकोचार्थं ॥२१॥ त्रिलोक्याबहि
र्महर्लोकप्रभृतिच ब्रह्मलोकमभिव्याप्यचतद्युगसहस्रंएकंदिनंयत ॥ यस्यांनिशिविश्वसृकब्रह्मानिमील-
तिस्वपिति ॥२२॥ ॥

३९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अहनी अहोरात्रे ॥ १० ॥ पक्षामासाश्चायनं दिवीन्यस्योत्तरेणान्वयः देवानामहोरात्रे शाङ्क्षहोदशमासाः ॥ ११ ॥ अनेनक्रमेणश्र
सौम्यस्यैौ नित्यमायुः कल्पयतीत्यर्थः ॥ १२ ॥ दृश्यादृश्यौ चांद्रः त्रिंशत्तिथिसमन्वितः सावनो मासः रविसंक्रांतिविचिह्नः सौरो मासो
निगद्यतेनक्षत्रैः ग्रहाः चंद्रादयः मतान्यश्विन्यादीनि ताराः अन्यानि नृत्यत्राणि तद्यल्लादितं हृष्टो तो कृतेयकालवक्रे
तश्चमित्यतोनिमिषः कालात्मा विश्वरीश्वरः स्वयंः जगद्वाहशरात्रर्षत्मके भुवनकोशं पर्येतिपर्यटति ॥ १३ ॥ संवत्सरा
दिभेदस्तु सौरश्चांद्रः सावनश्चांद्रनाक्षत्रमासभेदेन द्वैरूप्यः केचित्तत्पुनरेवमाहुः ॥ यदाप्यन्त्रपक्षप्रतिपदि सं
क्रांतिर्भवति तदा सौरचांद्रमासयोर्युगपदुपक्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे द्वितीये निवर्थतेचांद्रमाने
यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे ॥ पक्षः पंचदशाहानि शुक्लः कृष्णश्च मानद ॥ १० ॥ तयोः समुच्च
यो मासः पितॄणां तदहर्निशं ॥ द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ॥ ११ ॥ अयने चाहनी प्राहुर्वत्स
रो द्वादशस्मृतः ॥ संवत्सरशतं नॄणां परमायुर्निरूपितं ॥ १२ ॥ ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत्
संवत्सरावसानेन पर्येत्यनिमिषो विभुः ॥ १३ ॥ संवत्सरः परिवत्सर इडावत्सर एव च ॥ अनुवत्सरो वत्सरः
श्च विदुरैवं प्रभाष्यते ॥ १४ ॥ यः सृज्यशक्तिमुरुधोच्छ्वसयन्स्वशक्त्या पुंसोभ्रमाय दिविधावति भूतभेदः
कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपंचकाय ॥ १५ ॥
न वर्धते नाति ह्रसंते ॥ इति द्वादशादिन व्यवधानात् उभयोरग्रपश्चाद्भावो भवति ॥ एवं व्यवधानतारतम्येन पंचव
र्षाणि गतान्तेन मध्ये द्वौ मलमासौ भवतः ततः पुनः षष्ठः संवत्सरो भवतीति ॥ १४ ॥ एवंभूतः कालात्मा नित्यम
र्थितः ॥ पूजनीय इत्याह यइति सृज्यस्य कार्यस्य अंकुरादिनिहिषयां बीजादीनां शक्तिं कालत्वेन यथास्वशक्त्या उरुधा उच्छ्व
सयन्कार्योन्मुखीं कुर्वन् ॥ दिवं नभरिक्षे धावति कोसौ भूतभेदः महाभूतविशेषः तेजोमंडलरूपी सूर्यः किमर्थं
धावति पुंसः पुरुषस्य भ्रमाय भ्रमः मोहः तन्निवृत्तये आयुरादिक्षयेन विषयासक्तिनिवर्तयन्नित्यर्थः सकामानां
तु गुणमयं स्वर्गादिफलं क्रतुभिर्विस्तारयन्नतस्मै संवत्सरपंचकप्रवर्तकाय पूजां कुरुत पूज्यं ॥ १५ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नदेवंप्रपंचयतिसइत्यादिना॥ततःप्रपंचस्यपरमाणुतोपरमाणवस्थांयोभुंक्तेसकालःपरमाणुःप्रपंचस्याविशेषंसा
कल्यंयोभुंक्तेसएवपरमाणवस्थःसूक्ष्मःपरममहान्स्थूलःप्रथमश्लोकः ग्रहर्क्षताराचक्रस्थइत्यादिनायत्सूर्यप
र्यटनेवक्ष्यतेतत्रसूर्योयावतापरमाणु देशमतितावत्कालःपरमाणुःयावताद्वादशराश्यात्मकंसर्वंभुव
नकोशमतिक्रामतिसपरममहान्॥संवत्सरात्मकःकालःतस्यैवाह्न्याद्युगमन्वंतरादिक्रमेणद्विपरार्धांतत्व
मितितथाचपंचमे॥ सूर्यगत्यैवकालादिविभागंवक्ष्यति॥४॥इदानींद्व्यणुकादिलक्षणपूर्वकंमध्यमकालाव
स्थांकथयतिद्वौपरमाणू अणुःस्यात्त्रयोणवःत्रसरेणुःसत्त्वप्रत्यक्ष इत्यर्थःजालार्केतिगवाक्षदेशविष्टार्कर॰

सकालःपरमाणुर्वैयोभुंक्तेपरमाणुतां सतोविशेषभुग्यस्तुसकालःपरमोमहान्॥४॥अणुर्द्वौपरमा
णूस्यात्त्रसरेणुस्त्रयःस्मृतः॥जालार्करश्म्यवगतःखमेवानुपतन्नगात्॥५॥त्रसरेणुत्रिकंभुंक्तेयःकालः
सत्रुटिःस्मृतः॥शतभागस्तुवेधःस्यात्तैस्त्रिभिस्तुलवःस्मृतः॥६॥निमेषस्त्रिलवोज्ञेयआम्नातस्तेत्रयः
क्षणः॥क्षणान्पंचविदुःकाष्ठांलघुतादशपंचच॥७॥लघूनिवैसमाम्नातादशपंचचनाडिका॥तेद्वेमुहू
र्तःप्रहरःषड्यामःसप्तवानृणाम्॥८॥द्वादशार्धपलोन्मानंचतुर्भिश्चतुरंगुलैः स्वर्णमाषैःकृतच्छिद्रंयाव॰

रश्म्यवगतःकोसौयोतिलघुत्वेनखमेवानुपतन्नगात्॥ गतःपाठांतरेखमेवानुपतन्नवगतःनत्वगोरश्मी॥५॥शतभा॰
गास्त्रुटिर्त्रुट्यायास्मिन्सवेधः॥तैर्वेधैर्लवः निमेषास्त्रयःक्षणःइत्याम्नातःकाष्ठापंचदशएवलघु॥६॥पूर्वेणसहार्थः॥
७॥नाडिकाद्वयंमुहूर्तःषण्मुहूर्ताःप्रहरःसएवयामोदिनस्यरात्रेश्चतुर्थोभागःह्रासेषट्वृद्धौसप्तसंध्या मुहूर्तेद्वयंविनेतिता॰
त्पर्यंतग्राह्यानियमाद्योवाशंकुःप्रत्यहंतदुदानंयाणयितमशक्यत्वात्॥८॥नाडिकायाउन्मानमाहउन्मीयतेभनेनेति
उन्मानंपात्रंषट्पलताम्रविरचितंपंचगुंजोमाषःतैश्चतुर्भिश्चतुरंगुलायामशलाकारूपेणरचितैःकृतमूलच्छिद्रंते
नच्छिद्रेणयावत्प्रस्थपरिमितंजलंप्रविशतितेचस्वतंनिमग्नंभवतितावत्कालोनाडिकाप्रस्थपलच्छिद्रयासाधिकषोडश

॥ ५

३८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इतिश्रीभावार्थे तृतीये दशमः ॥१०॥ ततएकादशेकालः परमाण्वादिलक्षणैः ॥ युगमन्वन्तरादिभ्यः कल्पमानादि
वर्ण्यते ॥ तदेवं सामान्यतः कालस्योपलक्षणभूतं गुणव्यतिकरं दशविधं निरूप्येदानीं तस्यैव विशेषं निरूपयि-
तुं तत्परिच्छेद्यं वस्तु लक्षयति द्वाभ्यां ॥ सतामाकाशपृथिव्यादीनां द्रव्याणां यो विशेषः परस्परं निहत्यतमात्मा तेषां
यः चरमः सतः कार्यस्य विशेषाणामंशानां यश्चरमोंत्यः यस्यांशो नास्ति वन्त्यत्वादेशः ॥ अनेकः कारणत्वात
कार्यावस्थामप्राप्तः असंयुतः यावत्रान्यैः परमाणुभिः समुदायावस्थां प्राप्नुयात ॥ अतएव सदा कार्यसमुदा
यावस्थयोरपगमेप्यस्ति स परमाणुर्विज्ञेयः ॥ किंतत्र प्रमाणं अतआह ॥ यतो येभ्यः समुदितेभ्यः नृणामैक्य
दृष्टं हेतुं द्व्यणुकादिरूपे ऐक्यभ्रमोऽवयविबुद्धिः ॥ तथा च पंचमे अवयविनिराकरणे वक्ष्यति ॥ एषां समूहेन दृष्टो
रूप

इतिश्रीभागवते तृतीये दशमः ॥१०॥ मैत्रेय उवाच ॥ चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ॥ परमाणुः
स विज्ञेयो नृणामैक्यभ्रमो यतः ॥१॥ सतएव पदार्थस्य स्वरूपावस्थितस्य यत् ॥ कैवल्यं परममहानवि-
शेषो निरंतरः ॥२॥ एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ॥ संस्थानभुक्त्या भगवानव्यक्तो व्यक्त
भुग्विभुः ॥३॥

विशेष इति कार्यानुपपत्त्या कल्प्यत इति भावः ॥ स एवमणुत्वमाह ॥ सतएवेति यस्य चरमोंशः परमाणुः
तस्यैव सतः कार्यमात्रस्य स्वरूपावस्थितस्य परिणामांतरमप्राप्तस्य यत्कैवल्यमेकत्वं स परममहान् पूर्णत्वं परमाणु
प्रतियोगित्वात्तत्रतु नाना विशेषवान ॥ परस्परं भिन्नश्च सर्वः पदार्थः कथमेकं तस्य तत्राह ॥ अविशेषः विशेषो वि
वक्षारहितः निरंतरः भेदविवक्षारहितश्च सर्वोपि प्रपंचः परममहानित्यर्थः ॥२॥ यथा सूक्ष्मः स्थूलश्चायं पदार्थः
एवं कालोऽप्यनुमितः चकारात्मध्यमावस्था परिदृश्यते ॥ संस्थानं परमाण्वाद्यवस्था तस्य भुक्तिर्व्याप्तिः तया भगवा
ननितहरेः शक्तिः सतो व्यक्तः संस्थानभुक्त्वा सूक्ष्मः व्यक्तभुक्त्वा स्थूलं व्यक्तं प्रपंचं व्याप्नोति परिच्छिन्नत्तीति तथा वि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी०
३२

अष्टाविंशतिभेदानाह। गवादयस्त्वष्टान्ताः द्विशफाः द्विखुराः नव खरादय एकशफाः षट् श्वादयः गोधान्ताः पंचनखा द्वा
दश एवमेते भूचराः सप्तविंशतिः मकरादयो जलचराः कंकादयस्तु खगाः ॥ अत्र भूचरत्वेनैकीकृत्य गृहीता एवमष्टावि
शतिभेदा भवंति तेषु कृष्णसरुरुगौरा मृगविशेषाः ॥ अन्येषामपि तिर्यक्प्राणिनां यथायथमेतेष्वेवांतर्भावः ॥ २३ ॥ अर्वा
क्स्रोतः स्रोतः आहारः संचारो यस्य सः अर्वाक्स्रोतः कर्मैवार्थं नृणां सर्गो नृसर्गो लक्षणं रजआधिक्यं येषु ते ॥ २४ ॥
देवसर्गोऽपि प्राकृतः वैकृतश्च वैकारिकाहंकारजनितत्वात् ॥ एते त्रयो वैकृताः एवं तु कौमारस्तूभयात्मकाद्देवस-

गौरजो महिषः कृष्णः सूकरो गवयो रुरुः ॥ द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥ २१ ॥ खरोऽश्वोऽश्व-
तरो गौरः शरभश्चमरी तथा ॥ एते चैकशफाः क्षत्तः शृणु पंचनखान्पशून् ॥ २२ ॥ श्वा सृगालो वृको व्या-
घ्रो मार्जारः शशशल्लकौ ॥ सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः ॥ २३ ॥ कंकगृध्रबकश्येनभा-
सभल्लूकबर्हिणः ॥ हंससारसचक्राह्वकाकोलूकादयः खगाः ॥ २३ ॥ अर्वाक्स्रोतस्तु नवमः क्षत्त-
रेकविधो नृणां ॥ रजोधिकाः कर्मपरा दुःखे च सुखमानिनः ॥ २४ ॥ वैकृतास्त्रय एवैते देवसर्गश्च सत्त-
म ॥ वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः ॥ २५ ॥ देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः ॥ गं-
धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः ॥ २६ ॥ भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः ॥ दशैते वि-
दुराख्याताः सर्गास्ते विश्वसृक्कृताः ॥ २७ ॥ अतः परं प्रवक्ष्यामि वंशान्मन्वंतराणि च ॥ २७ ॥ एवं रजःप्लुतः
स्रष्टा कल्पादिष्वात्मभूर्हरिः ॥ सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना २८

र्गस्तु वैकृत इत्युभयं गाः वैकारिकस्तु देवसर्गः प्राकृतेषु सर्वमेव प्रोक्तः ॥ अयं तु ततोऽन्यतमो ऽहं कृतः देवसर्गत्वात्तदंत
र्भावः सनत्कुमारादीनां सर्गस्तु प्राकृतो वैकृतश्च देवत्वेन मनुष्यत्वेन च सृज्यत इत्यर्थः ॥ २५ ॥ वैकृतस्तु देवसर्गोऽष्टवि-
धः तत्र विबुधादयस्त्रयो भेदाः ॥ गंधर्वाप्सरस एकः यक्षरक्षांस्येकः भूतप्रेतपिशाचा एकः सिद्धचारणविद्याधरा ए-
कः किन्नरादय एकः ॥ आदिशब्दात्किंपुरुषाश्वमुखादयः ॥ एतद्विशेषोऽध्याये स्पष्टं भविष्यति ॥ २८ ॥ ॥ ३ ॥ ॥ ३२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तानेव सर्गान्प्रपंचयति आद्यस्त्वादिना यावदध्यायसमाप्तिः महतो लक्षणं आत्मनो हरेः सकाशाद्गुणानां वैषम्यमिति
अहमः अहंकारस्य तस्य लक्षणं यत्रेति द्रव्यादयो वक्ष्यमाणाः त्रयः सर्गाः ॥१४॥ तन्मात्रो भूतसर्गस्तृतीयः द्रव्यश
क्तिमान्स्थूलभूतारंभकः ज्ञानकर्मेंद्रियात्मकश्चतुर्थः ॥१५॥ तमसः पंचपर्वा विपर्ययाः अबुद्धिर्जीवानामावरणवि
क्षेपकृत्तां करोति तदबुद्धिकृतस्य प्रभोः ॥ शृण्वतो अबुद्धेरोनत्रातव्यतामाह ॥ यद्विषयामेषां संसारे ह्रवतितस्य हरेः
लीलायच्छाद्वयमितिनमस्याहि सर्गाः रूपा रजोभाजः तत्रिवमस्तूपमोक्तार्थः ॥ अस्मिन्नपक्षे अबुद्धिकृतस्तुतिप्रथमातेप्रत
वधानकृतत्रयार्थः ॥१७॥ सर्वमिवप्रथमं कृतो मुख्यसर्गः तस्थुषां स्थावराणां षड्विधत्वमेवाह येपुष्पं विनाफल

आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः ॥ द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः ॥१४॥ भूतसर्गस्तृ
तीयस्तु तन्मात्रो द्रव्यशक्तिमान् ॥ चतुर्थ ऐंद्रियः सर्गो यस्तु ज्ञानक्रियात्मकः ॥१५॥ वैकारिको देवस
र्गः ॥ पंचमो वैकृतं मनः ॥ षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः ॥१६॥ षडिमे प्राकृताः सर्गा वै ॥
कृतानपि मे शृणु ॥ रजोभाजो भगवतो लीलेयं हरिमेधसः ॥१७॥ सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां ॥ ९ ॥
च यः ॥ वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः ॥ १८॥ उत्स्रोतसस्तमःप्राया अंतःस्पर्शा विशे
षिणः ॥ तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः ॥१९॥ अविदो भूरितमसो घ्राणज्ञा हृद्यवेदि टी॰

तितेवनस्पतयः ओषधयः फलपाकांताः लताः आरोहणापेक्षाः त्वक्सारा वेण्वादयः लता एव काठिन्येनाः
वे२ रोहणानपेक्षाः वीरुधः ये पुष्पैः फलंति ते द्रुमाः ॥१८॥ तेषां साधारणं लक्षणमाह ॥ ऊर्ध्वस्रोतः आरोहः संचारो
येषां तमःप्रायाश्चकेवलम् अंतःस्पर्शमेव जानंतिनान्यत् ॥ तद्यत्नतेविनवहिर्विशेषिणः अनवस्थिताः प
मा२ रिणामवदनेकभेदवंतः तिर्यक्स्रोतसो तिरश्चां सर्गोऽष्टम इति तिरश्चामिति सर्वाणाविंशतिभेदः तिरश्चांलक्षणमवि
ल२ दः श्वस्तनादिज्ञानशून्याः भूरितमसः आहारादिमात्रनिष्ठाः घ्राणेनैवेष्टमिष्टमर्थं जानंतीति हृद्यवेदिनः दीर्घानुसंधानः
नशून्याः तथा च श्रुतिः अथेतरेषां पशूनामशनापिपासेपवाभिविज्ञानं नविज्ञातं वदंतिनविज्ञातं पश्यंतिनवि

स्पर्शा ५ घ

॥ २९ ॥

श्री
भाग
टी
३६

कालभेदेन लोकसृष्टिभेदं शृण्वानमेव कालं जिज्ञासुः ॥ एवंभूतयत्कालाख्यं लक्षणं स्वरूपं प्राग्व्यप्रब्रवीः कथं काः
लः कल्पते किं वा न स्यत् स्तंभ स्थलेव रूपमिति यथा वर्णयेत्यर्थः ॥ १० ॥ तत्र सामान्यतः कालस्य स्वरूपमत्रोच्यते । तत्र व्याख्या
येन विशेषवतः गुणानां व्यतिकरो महदादिः परिणामः तेनैव [illegible] क्रियते यः स कालः इति शेषः वक्ष्यते चैकादशस्कंधे गुण
व्यतिकरः कालः स्वभावः सूत्रमेव चेति । स्वतस्तु निर्विशेषोऽप्रतिष्ठितः कार्याद्यपर्यवसितः आद्यंतशून्य इत्यर्थः एतदेव दर्शः
यितुं श्रीमैश्वर स्मृत्यादितेन कालेनात्मनिमित्तभूतेन करोतीत्याह पुरुषस्तदुपादीयतेनि मित्तं तद्यास्तीक्रियते समुपादा
नं निमित्तं यस्मिं स्तमात्मानमेव विश्वरूपेणासृजत । स्वव्यतिरेकेणान्यस्याभावात् । एतच्च वस्तुकथनमात्रे कालेनति
मित्तेन वासृजदिति तावदेव विवक्षितं ॥ ११ ॥ स्वव्यतिरिक्तस्यान्याभावं दर्शयन् कालस्य सृष्टिनिमित्ततां दर्शयति । विश्वमि

विदुरः ॥ यदात्थ बहुरूपस्य हरेरद्भुतकर्मणः । कालाख्यं लक्षणं ब्रह्मन्यथा वर्णय नः प्रभो ॥ १० ॥ मैत्रेयः
गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः ॥ पुरुषस्तदुपादानमात्मानं लीलयासृजत् ॥ ११ ॥ विश्वं वै ब्रह्मत
न्मात्रं संस्थितं विष्णुमायया ॥ ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्तिना ॥ १२ ॥ यथेदानीं तथाग्रे च पश्चादप्ये
तदीदृशं ॥ सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः ॥ १३ ॥ कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः ॥ १३

ति विष्णुमायया संस्थितं संहृतं ब्रह्मतन्मात्रं सदि संईश्वरेण कर्त्रा कालेन निमित्तेन परिच्छिन्नं पृथक्प्रकाशितं अव्य
क्तमूर्तिः स्वरूपं यस्येति निर्विशेषतादर्शिता ॥ १२ ॥ अप्रतिष्ठितत्वं दर्शयितुं तत्कार्यविश्वप्रवाहस्यानुवृत्तिमाह ॥ यथे
दानीमस्तितथाग्रे पूर्वमप्यासीत् पश्चादपि भविष्यति ॥ एवं सामान्यतः कालेनिरूप्य [illegible] विशेषतो नि
रूपयितुं कालत्रिमित्तस्य सर्गस्य सर्वांकानेभेदानुवदति ॥ यस्तु प्राकृतो वैकृतश्च स दशधा नवप्रामेव त्रिविधं प्रल
यमाह ॥ तत्र सर्वमरणं कालेन सततप्रवाहेण सर्वेषां मरणं कालेन केवलेन नित्यः प्रलयः [illegible] द्रव्येण संकर्षणाग्न्यादि
ना नैमित्तिकः गुणैः सत्त्वकार्यग्रमाद्भिः प्राकृतिकः ॥ १३ ॥ ॥ ॥ ॥ ॥ ॥ १ ॥ ३६

स्वतो१

व३

संचोदितः प्रार्थितः हृदिस्थानेवाह॥ तत्तेन प्रश्नास्तेन विस्तृता इत्यर्थः॥३॥ आत्मनि श्रीनारायणे आत्मानं मन आवेश्य॥
४॥ अब्जसंभूतो ब्रह्मा यदधिष्ठाय स्थितः कं तोयं च॥ तत्पद्ममंभश्च विलोक्य कथं भूतं पद्ममंभश्च तेन प्रलयकालेन॥
कृतं वीर्यं यस्य तेन वायुना कंपितं न्यपाद् दत्तवान् अपादित्यन्वयः॥५॥ विवृद्धं विज्ञानं बलं च यस्य स न्यपात् पीतवान्॥६॥ पुष्क-
रं पद्मं प्राग्लीनान् लोकान् कल्पितास्मि स्रक्ष्यामि॥७॥ श्रीभगवता स्वयं करणीयेन कर्मणा चोदितः त्रिभुवनः संस्तदा॥
पद्मकोशं प्रविश्य तमेकमेव त्रिधा लोकत्रयरूपेण व्यभांक्षीत् द्विभाज॥ एकेन कमलमुकुलेन कथं लोकत्रयस्याहि-
त्यसंभावनां वारयितुं तस्य विशालतामाह॥ द्विसप्तधा वा चतुर्दशलोकरूपेण उरुधा ततोपि बहुप्रकारेण भाव्यं भावयि-

सूत उवाच॥ एवं संचोदितस्तेन क्षत्त्रा कौषारवो मुनिः॥ प्रीतः प्रत्याह तान्प्रश्नान्हृदिस्थानथ भार्गव॥३॥ मै-
त्रेय उवाच॥ विरिंचोपि तथा चक्रे दिव्यं वर्षशतं तपः॥ आत्मन्यात्मानमावेश्य यदाह भगवानजः॥४॥ तद्विलो-
क्याब्जसंभवो वायुना यदधिष्ठितः॥ पद्ममंभश्च तत्कालकृतवीर्येण कंपितं॥५॥ तपसा ह्येधमानेन विद्यया चात्म-
संस्थया॥ विवृद्धविज्ञानबलो न्यपाद्वायुं सहांभसा॥६॥ तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितः॥ अनेन लो-
कान्प्राग्लीनान्कल्पितास्मीत्यचिंतयत्॥७॥ पद्मकोशं तदाविश्य भगवत्कर्मचोदितः॥ एकं व्यभांक्षीदुरुधा त्रि-
धा भाव्यं द्विसप्तधा॥८॥ एतावान्जीवलोकस्य संस्थाभेदः समाहृतः॥ धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्य-

ते योग्यमतो न तेन त्रिलोकीकरणं चित्रमित्यर्थः॥८॥ त्रिलोकीरूपेणैव विभागहेतुमाह॥ एतावांस्त्रिलोकीरूपः जी-
वलोकस्य जीवानां भोगस्थानस्य प्रत्यहं संस्रजस्य संस्थाभेदो रचनाविशेष उक्तः॥ ननु परमेष्ठिनोपि जीवत्वाविशेषा-
द्ब्रह्मलोकस्यापि किमिति प्रत्यहं सृष्टिर्न भवति तत्राह॥ हि यस्मादनिमित्तस्य निष्कामस्य धर्मस्य विपाकः फलरूपोसौ
उपलक्षणमेतत् सत्यलोकस्य महर्लोकप्रभृतीनां तदा स्थितानां च त्रैलोक्यस्य काम्यकर्मफलत्वात्॥ प्रतिकल्पं उत्पत्तिवि-
नाशौ भवतः महः प्रभृतीनां तु उपासनासमुच्चितनिष्कामधर्मफलत्वात् द्विपरार्धपर्यंतं न नाशः॥ तत्र स्थानां च ततः परं श्रेय·

॥ ५ ॥

श्री
भाग.
टी.
३४

अत्रहेतुमाह॥ अहमित्यात्मनामहंकारोपाधीनांजीवानामात्माअतःप्रेयसांप्रतिप्रियाणामपिप्रेष्ठःप्रियतमःसन्नि
स्वयुःयत्कृतेयदर्थं॥४२॥ अनेनैवकृतार्थएवतथापिमन्नियोगंपरिपालयेत्याह॥ सर्वेतिआत्मनात्मनिदंत्रैलोक्यंयथाम
य्यनुशेरतेलीनाःप्रजास्ताःसृजकेनात्मनैव अन्यनिरपेक्षेणतत्तत्पकापेक्षाभावमाहसर्ववेदमयेनेति॥ आत्माअहंयो
निःकारणंयस्येतिज्ञानक्रियाशक्तिमत्त्वात्प्रायंहृदयतियथापूर्वमितितत्राज्ञाभ्यासेपत्तीसुनमय्यनुशेरतेइति॥

अहमात्मात्मनांधातःप्रेष्ठःसन्प्रेयसामपि॥ अतोमयिरतिंकुर्याद्देहादिर्यत्कृतेप्रियः॥४२॥ सर्ववेदमये
नेदमात्मनात्मात्मयोनिना॥ प्रजाःसृजयथापूर्वंयाश्चमय्यनुशेरते॥४३॥ मैत्रेयउवाच॥ तस्माएवंज
गत्स्रष्ट्रेप्रधानपुरुषेश्वरः॥ व्यज्येदंस्वेनरूपेणकंजनाभस्तिरोदधे॥४४॥ इतिश्रीभागवतेतृतीयस्कंधे
पद्मोद्भवेविदुरमैत्रेयसंवादेनवमोध्यायः॥९॥ विदुरउवाच॥ अंतर्हितेभगवतिब्रह्मालोकपितामहः॥
प्रजाःससर्जकतिधादैहिकीर्मानसीर्विभुः॥१॥ येचमेभगवन्पृष्टास्त्वय्यर्थाबहुवित्तम॥ तान्वदस्वानुपू
र्व्येणछिंधिनःसर्वसंशयान्॥२॥

स्थितानांनामभिव्यक्तिमात्रमेवकर्तव्यमित्यनायासत्वमुक्तं॥४३॥ इदंस्वरूपंव्यज्यप्रकाश्यपद्मनाभस्तिरोदधेश्री
नारायणानुरूपेणाद्रूपोभवत्॥४४॥ इतिश्रीभावार्थदीपिकायांतृतीयेनवमोध्यायः॥९॥ दशमेकालसंप्र
संप्रतिवर्णितउद्भवःप्राकृतनादिविभागेनसर्गस्तुदशधोच्यते मैत्रेययावदस्वदंभागस्यसेविता॥१॥ ॥ ॥ ३५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धनो वर्षीयान् वृद्धतरो न्यधिको स्तीत्यर्थः ॥ ३४ ॥ अनुग्रहमेवाह ऋषिमिति च तृभिः यद्यतस्ते मयि मनो निर्बद्धं ॥ ३५ ॥ य
द्यस्माद् भूतेंद्रियैः गुणैः सत्वादिभिः आत्मना हंकारेण वा युक्तं मन्यसे ॥ ३६ ॥ तुभ्यं तव नालेन मार्गेण पुष्करस्य कम
लस्य मूलमधिष्ठानं सलिले विचिन्वतो मयि विचिकित्सायां भवितव्यं अस्याश्रयेण न वेद यतस्ते ततो स्ति नास्ती
ति संदेहे सति आत्मा स्वरूपं मे मया अबहिः अंतर्हृदि दर्शितः ॥ ३७ ॥ अंगहे ब्रह्मन् मत्कथं कृतवानसि मत्कथायाः अभ्युद

नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः ॥ नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ॥ ३४ ॥ ऋषिमाद्यं
न बध्नाति पापीयांस्त्वां रजोगुणः ॥ यन्मनो मयि निर्बद्धं प्रजाः संसृजतोपि ते ॥ ३५ ॥ ज्ञातोहं भवताद्य
दुर्विज्ञेयोपि देहिनां ॥ यन्मां त्वं मन्यसे युक्तं भूतेंद्रियगुणात्मभिः ॥ ३६ ॥ तुभ्यं मद्विचिकित्सायामात्मा
मे दर्शितो बहिः ॥ नालेन सलिले मूलं पुष्करस्य विचिन्वतः ॥ ३७ ॥ यच्चकर्थांग मत्स्तोत्रं मत्कथाभ्युदयां
कितं ॥ यद्वा तपसि ते निष्ठा स एव मदनुग्रहः ॥ ३८ ॥ प्रीतोहमस्तु भद्रं ते लोकानां विजयेच्छया ॥ यदस्तौ
षीर्गुणमयं निर्गुणं मानुवर्णयन् ॥ ३९ ॥ य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत ॥ तस्याशु संप्रसीदे
यं सर्वकामवरेश्वरः ॥ ४० ॥ पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना ॥ राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्व
विन्मते ॥ ४१ ॥

हरि

यः तेनांकितं स एष एवं भावा मयि मनो निर्बंधः मत्ज्ञाने मद्रूपस्य दर्शने मत्स्तुतिः तपो निष्ठा चेति यत्स एव सर्वोपि म
दनुग्रहः ॥ ३८ ॥ गुणमयत्वेन प्रतीयमानं मयि निर्गुणमेवानुवर्णयन् ॥ ३९ ॥ स्तवप्रीत इति किं वक्तव्यमित्याह य एते
न ॥ ४० ॥ न च मत्प्रीतेरभ्यधिकं किंचिदस्तीत्याह ॥ पूर्तादिभिः राद्धं निःश्रेयसं फलं तन्मत्प्रीतिरेवेति तत्त्वविदां मतं ॥ ४१ ॥

सिद्धंय स्तवन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
२४

स्वस्यसंभवोयस्मात्तत्तपःशरीरंविद्याउपासनासमाधिरेकाग्रतेतिनिशम्यहृष्टा यथाशक्तिस्तुत्वाश्रांतवद्विरराम ॥ २६
आत्मनोलोकसंस्थानविज्ञानेपरिखिद्यतोब्रह्मणोऽभिप्रेतमालक्ष्यतमाहेतिद्वयोरन्वयः ॥ तेनप्रलयोदकेनविष
ण्णचेतसमेकश्मलंमोहमिवेतिसमस्तमोहरूपमनंदर्शयति ॥ २८ ॥ हेवेदगर्भतंद्रींविषादकृतमालस्यंमागाः तेनैव
मेदृशामनुग्रहप्राप्तादित्यादियत्प्रार्थ्यतेतदग्रेपूर्वमेवसंपादितं ॥ २९ ॥ तर्हिकिंकथमहंनजानामीत्यतआह भूयश्चेति

मैत्रेयउवाच ॥ स्वसंभवंनिशम्यैवंतपोविद्यासमाधिभिः ॥ यावन्मनोवचःस्तुत्वाविररामसखिन्नवत् ॥ २६
अथाभिप्रेतमन्वीक्ष्यब्रह्मणोमधुसूदनः ॥ विषण्णचेतसंतेनकल्पव्यतिकरांभसा ॥ २७ ॥ लोकसंस्था-
नविज्ञानेआत्मनःपरिखिद्यतः ॥ तमाहागाधयावाचाकश्मलंशमयन्निव ॥ २८ ॥ श्रीभगवानुवाच
मावेदगर्भगास्तंद्रींसर्गउद्यममावह ॥ तन्मयापादितंह्यग्रेयन्मांप्रार्थयतेभवान् ॥ २९ ॥ भूयस्त्वंतप-
आतिष्ठविद्यांचैवमदाश्रयां ॥ ताभ्यामंतर्हृदिब्रह्मंलोकान्द्रक्ष्यस्यपावृतान् ॥ ३० ॥ ततआत्मनिलोके
चभक्तियुक्तःसमाहितः द्रष्टासिमांततंब्रह्मन्मयिलोकांस्त्वमात्मनः ॥ ३१ ॥ यदातुसर्वभूतेषुदारुष्व-
ग्निमिवास्थितं प्रतिचक्षीतमांलोकेजह्यात्तर्ह्येवकश्मलं ३२ यदारहितमात्मानंभूतेंद्रियगुणाशयैः
स्वरूपेणमयोपेतंपश्यन्स्वाराज्यमृच्छति ॥ ३३ ॥

३० ॥ भक्तियुक्तःसमाहितश्चसन्आत्मनितस्मिंलोकेचमांततंव्याप्यस्थितंद्रष्टासिद्रक्ष्यसिआत्मनोजीवोऽस्य ॥ ३१
सर्वंचमदृष्टेमोहोनिवर्ततेइत्याह ॥ यदातिप्रतिचक्षीतपश्येत ॥ ३२ ॥ तदाचासिध्यात्ताननिवृत्तोमुच्यतेइत्या
ह ॥ यदेतिभूतादिभिर्विरहितमात्मानंजीवंपुरुषंत्वंपदार्थंस्वरूपेणस्वस्यात्मभूतेनमयातत्पदार्थेनोपेतमेकीभू
तंपश्यन्भवतितदास्वाराज्यंमोक्षंप्राप्नोति ॥ ३३ ॥ २४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं स्तुवानाय येन सोयमिति चतुर्भिः ॥ यद्येन सत्त्वेन ज्ञानेन भगेनैश्वर्येण च मृडयते सुखयति विश्वं दृशं मे तेनानुस्पृ
शतात् योजयतु यथाहं स्रक्ष्यामि तथा भविष्यामि ॥ यतः प्रणतप्रियोसौ प्रणतार्तिहरो हरिः ॥ अहं च प्रणतः न चान्यः
शरणीयोस्ति ॥ यतः स एव समस्तजगतां सुहृत् ॥ यतोसौ एक उत स्पृत आत्मा अंतर्यामी ॥ २२ ॥ आत्मशक्त्या रम
या सह यद्यत्कर्म करिष्यति स्वविक्रमं विलासं एव विक्रमः प्रभावो यस्मिंस्तदिदं विश्वं तदा तत्सृजतोपि मे चेतः स

सोयं समस्तजगतां सुहृदेक आत्मा सत्त्वेन यन्मृडयते भगवान्भगेन ॥ तेनैव मे दृशमनुस्पृशताद्यथाहं
स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोसौ ॥ २२ ॥ एष प्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणा
वतारः ॥ तस्मिन्स्वविक्रममिदं सृजतोपि चेतो युंजीत कर्मशमलं च यथा विजह्यां ॥ २३ ॥ नाभीहृदादि
ह सतोंभसि यस्य पुंसो विज्ञानशक्तिरहमासमनंतशक्तेः ॥ रूपं विचित्रमिदमस्य विवृण्वतो मे मा रीरि
षीष्ट निगमस्य गिरां विसर्गः ॥ २४ ॥ सोसावदभ्रकरुणो भगवान्विवृद्धप्रेमस्मितेन नयनांबुरुहं विजृं
भन् उत्थाय विश्वविजयाय च नो विषादं माध्व्या गिरापनयतात्पुरुषः पुराणः ॥ २५ ॥

एव युंजीत प्रवर्तयतु ॥ कर्मशमलं कर्तृत्वाभिमानलक्षणं शमलं चैव मत्सरादि यावद्यथा विजह्यां त्यजामि ॥ २३ ॥ अंभसि सतोः
यस्य नाभिहृदादिह आसे ॥ विज्ञानेशक्तिर्यस्य महत्तत्वात्मकस्य चित्तस्य तदभिमानी अस्य रूपमिदं विश्वं विस्तारय
तो मे निगमस्य वेदस्य भूतानां गिरां विसर्गः उच्चारणं मा रीरिषीष्ट लं तं ब्रह्म वचसामिति न्यायेन मा लुप्यतामित्य
र्थः ॥ विवृद्धप्रेमस्मितेन विजृंभयन्विश्वस्य विजयाय विश्वोद्भवाय च कारात् सदस्य ग्रस्तायोकाय ॥ २४ ॥

॥ २६ ॥ दि

श्री
भाग०
टी०
२२

इदानीं तत्कालभाविलीलावतारकर्माणि दर्शयन्नाह ॥ तिर्यगादिषु जीवयोनिषु स्वेच्छया स्वीकृतमूर्तिः सन् स्वकृत धर्ममर्यादापालनेच्छया रेमे । वस्तुतः स्वातन्त्र्येण भवे नैव निरस्तो विषयसक्तोपि यो न एव श्रीपुरुषोत्तमः तदुपायि यमी संसर्गोपि ॥ यदुक्तं जीवानाम् ॥ यस्मात्क्षरमतीतो हमक्षरादपि चोत्तमः ॥ अतोस्मिंल्लोके वेदे च प्रथितः पुरुषोत्तमः इति ॥ १८ ॥ इदानीं दृश्यमानामेव मूर्तिं प्रणमति यो विद्ययेति द्वाभ्याम् ॥ दशार्धीः पंचवृत्तयो यस्याः तया विद्यया निर द्राहेतुभूतया ॥ नमिम्नतो यियोनिद्रामवाह तमेतेनमउम्नं रेणावयः ॥ जठरे कृतानाउदरे प्रविलापिता लोकयात्

तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः ॥ रेमे निरस्तरतिरप्यवरुद्धदे
हस्तस्मै नमो भगवते पुरुषोत्तमाय ॥ १९ ॥ यो विद्ययानुपहतोपि दशार्धवृत्त्या निद्रामुवाह जठरीकृत
लोकयात्रः ॥ अन्तर्जलेहिकशिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन् ॥ २० ॥ यन्नाभिपद्म
भवनादहमासमीड्य लोकत्रयोपकरणो यदनुग्रहेण ॥ तस्मै नमस्त उदरस्थभवाय योगनिद्रावसानवि
कसन्नलिनेक्षणाय ॥ २१ ॥

त्रालोकस्थितिर्येन स ॥ अहिरेव कशिपुः शय्या तस्याः स्पर्शोनुकूलो यस्यास्तां निद्रां भीमा ऊर्मीणां माला विद्यते र यस्मिन् तत्र जले लोकनिद्रागतस्याविवेकिनो जनस्य निद्रासुखमीदृशमिति विवृण्वन् प्रदर्शयन् उवाहेत्यर्थः अनेन वात् सल्यादि विशेषणानि ॥ यद्वा सर्वे कल्पप्रान्तस्य जनस्य विश्रामसुखं विवृण्वन् स्फोरयन् तदा तदुपयोग कारायस्य दुःसहमपि दुःखं सोढव्यमिति योगेनतर्घ्य विशेषणानि ॥ २० ॥ किं च यस्य नाभिपद्ममेव भवनं गृहं तस्मादहं लोकत्रयस्य उपकरणं यस्य स यद्वा लोकत्रयस्य सृष्ट्यादिद्वारेणोपकरोतीति तथा नाहम् प्रोह्य यदनुग्रहेण सं उदरे स्थितो भवः संसारः प्रपंचो यस्य योगनिद्रावसाने किंचिद्विकसन्नलिनवदीक्षणं यस्य ॥ २१ ॥ ॥ ॥ श्री ॥ ॥ ॥ २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नग्रुणमवतारकमोमिद्ग्रोयस्मामति ॥ योवैएकस्त्रिपात्त्रयःपादाः स्कंधायस्यमेकंच उरवःप्ररोहाःशाखोपशाखा
मरीच्यादिमन्वादिरूपायस्यतथाभूतःसन्नवरूपेनसैभुवनार्कतायनमःकिंकृत्वावरूपेऽत्मानस्वयमेवमूलमधिष्ठा
नेयस्यतत्तथानंनिभिन्नाग्रुणत्रयरूपेणविभज्यत्रियात्मेवाह ॥ अहंब्रह्मागिरिशस्वयंविभुर्विसृष्टेतिस्थित्युद्भवप्रलयहे
तवोयेवयंएवंविधाद्भूत्वायोवरूपेऽत्यर्थः ॥ २६ ॥ एवंग्रुणावतारकर्मविडंबनमुक्त्वातस्यैवकालात्मरूपेणकर्मचद्दर्शा
यन्नप्रणमतिलोकाइतिद्वाभ्यां ॥ विकर्मनिरतोविरुद्धकर्मनिरतः ऊपालेहितेस्वे आत्मीयेस्वडदितेतस्यैवसाद्दाइदितेउरः

योवाअहंचगिरिशश्चविभुःस्वयंचस्थित्युद्भवप्रलयहेतवआत्ममूलं ॥ भित्त्वात्रिपाद्ववृधएकउरुप्ररो
हस्तस्मैनमोभगवतेभुवनद्रुमाय ॥ २६ ॥ लोकोविकर्मनिरतःकुशलेप्रमत्तःकर्मण्ययंत्वदुदितेभवद
र्चनेस्वे ॥ यस्तावदस्यबलवानिहजीविताशांसद्यःछिनत्त्यनिमिषायनमोस्तुतस्मै ॥ २७ ॥ यस्माद्बिभेम्यहम
पिद्विपरार्धधिष्ण्यमध्यासितःसकललोकनमस्कृतंयत् ॥ तेपेतपोबहुसवोऽवरुरुत्समानस्तस्मैनमोभग
वतेधिमखायतुभ्यं ॥ २८ ॥

तेभवदर्चनरूपेकर्मणितदुक्तंहितशास्त्र ॥ यत्करोषियदश्नासियज्जुहोषिददासियत् ॥ यत्तपस्यसिकौंतेयतत्कु
रुष्वमदर्पणमिति ॥ तस्मिन्प्रमत्तःअदत्तविज्ञोयावद्धं तेतेतावदस्यलोकस्यानिमिषायकालाय ॥ २७ ॥ आस्तांताव
ल्लोकस्यकथायस्मात्कालात् ब्रह्मोयद्विपरार्धंवस्यायिस्थानेधिष्ण्यं तदारूढोपिविभेमिभीतश्चसं कस्य २
त्वामेवावरुरुत्समानः प्राप्तुमिच्छन्तपस्तप्तवान्कथंभूतोबहुसवः बहवः सवायागाःसंवत्सरावायस्यबहु
मामानकृत्वावहुसंवत्सरानुवानयष्टानवानित्यर्थः ॥ अधिमखायमखाधिष्ठात्रे ॥ २८ ॥ ॥ नै ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा०
टी
१२२

यतः स्वकामानां भवात्त्रानिष्पत्तीरति अतः कामप्राप्तिः क्रियाणामनन्तं फलं न भवति ॥ किं तु भवच्चरणमेव कामसंयोगोऽस्त
पूर्वं निरपेक्षेण प्रीतोऽवनार्यमित्याह ॥ पुंसामिति श्रीभगवन् तत्त्वाराधनमेव पुंसां सत्क्रियार्थः स्वश्रेष्ठं क्रियाफलं श्रेष्ठं वदे
तः ॥ यत्तत्त्वप्राप्तिं नो धर्मः न कथं विद्रुयते न नष्यति कामाद्यो च सत्यधर्मः ॥ कामं दत्तात्त पप्नीयर्थः ॥ २३ ॥ अनन्तावयं नमा मेवा २
मत्याह ॥ शास्तत्त्वं देवाः स्वरूपेण निरस्तभेदभ्रमाय नमः पुनः स्वबोधयवयविषयाणा विद्याशक्तिर्यं स्वयं अविद्याणमाप्नु
यः अनन्तपरस्मै ॥ अत्र हेतुः विश्वोद्भवादिनिमित्तं यो तस्या लीलाविलासः तया रासः क्रीडाय स्मेमत्तमस्मिदं नमो नमः
न्ये नैव २ माया २

पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च ॥ आराधनं भगवतस्तव सत्क्रियार्थो धर्मोऽर्पितः
कर्हिचिद्म्रियते न यत्र ॥ २३ ॥ शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै
विश्वोद्भवस्थितिलयेषु निमित्तलीलारासाय ते नम इदं चकृमेश्वराय ॥ २४ ॥ यस्यावतारगुणकर्मविडंबना
नि नामानि येऽसुविगमे विवशा गृणंति ॥ ते नैकजन्मशमलं सहसैव हित्वा संयांत्यपावृतमृतं तमजं प्रपद्ये
२५ ॥ ॥ ॥

मतेव कर्म कृतवन्तोऽयं ॥ २४ ॥ नामग्रहणमात्रतः कैवल्यप्रदत्वेनेत्थं यं स्वजपन्नमस्करोतीत्याह यस्येति ॥ अवतारादीनां
विडंबनमनुकरणं मर्त्येषु नन्दावतारे विडंबनानि देवकीनंदनेत्यादीनि गुणविडंबनानि ॥ सर्वतोभद्र भक्तवत्सलेत्या
दीनि कर्मविडंबनानि गोवर्धनोद्धरणः कंसारिरित्यादीनि असुविगमेऽपि विवशा अपि गृणंति उच्चारयंति केवलेऽपा
मलं पापं अपावृतं निरस्तावरणं अमृतं ब्रह्म प्राप्नुवंति ॥ २५ ॥ ॥ दी० २ ॥ ॥ १२२

नन्वेवं भक्तायाः संसृतेरपरमार्थत्वात्किमर्थोविषादः क्रियेत तत्राह ॥ यावदिति ॥ आत्मनइदं पृथक्त्वं देहादिभावं श्रीभ
गवतस्तवेंद्रियार्थरूपया मायया तेयाबलं माथिकं यस्य तत्र प्रतिसंक्रमेत नोपरमेत ॥ दुःखसमूहं प्रापयंती क्रियाणामर्थाः
फलं यस्याः ॥ ९ ॥ भवत्वेवमविवेकिनां विवेकिनस्तु भक्ताएवेति ॥ किं तेषां भक्तानामत्यन्तमतआह ॥ अह्न्यापृतानि व्याप्ता
नि इव्रतानि ॥ आर्तानि क्लिष्टानि करणानि इंद्रियाणि येषां रात्रौ विषयसुखलवोपि नास्ति यतो निःशयानाः स्वप्न
दर्शनेन च दुःखाणा क्षणे भग्ना निद्रा दैवेनाहताः सर्वतः प्रतिहताः अर्थरचना अर्थार्थोद्यमा येषां ॥ १० ॥ तदेवं भक्तानां सं

यावत्पृथक्त्वमिदमात्मन इंद्रियार्थमायाबलं भगवतो जन ईश पश्येत् ॥ तावन्न संसृतिरसौ प्रतिसंक्रमेत व्य
र्थापि दुःखनिवहं वहती क्रियार्था ॥ ९ ॥ अह्न्यापृतार्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभ
ग्ननिद्राः ॥ दैवाहतार्थरचना ऋषयोपि देव युष्मत्प्रसंगविमुखा इह संसरंति ॥ १० ॥ त्वं भावयोगपरिभावित
हृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसां ॥ यद्यद्धिया त उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाय ५२
११ ॥ नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदि बद्धकामैः ॥ यत्सर्वभूतदययासदलभ्ययैको
नानाजनेष्ववहितः सुहृदंतरात्मा ॥ १२ ॥ ॥ ॥

सारादिनिवृत्तिस्तु भक्तानां तत्त्विहत्विमामाह त्वमिति भक्तियोगेन परिभाविते हृत्सरोजे आस्से तिष्ठसि श्रुतेन श्रवणेनेक्षि
तः ॥ पंथा मार्गो यस्य किं च श्रवणं विनापि त्वद्भक्ता मनसा यद्यत्तव वपुः रूपं स्वेच्छया ध्यायंति तत्तद्रूपमेव सं प्रकटय
सि सतां भक्तानामनुग्रहाय ॥ ११ ॥ भक्तानां च निष्कामानां त्वमति सुलभो नेतरेषामित्याह नेति ॥ उपचितैः ऊर्जितैः रुपचा
रैः ॥ स्रक्चन्दनादिभिर्यत्त्वमसतामभक्तानामलभ्ययादयया प्रियते हेतुरेकउत्याहि ॥ १२ ॥ ॥ ॥

भाग३

श्री भाग वृत्ती ३१

श्रादरेणतुत्वांभजंतःकृतार्थाइत्याह ॥ येत्विति ॥ श्रुतिर्वेदःसएववातःतेननीतंप्रापितंनापैषिनापयासि । येतुत्वत्कथाश्रव
णलम्पटादरेणकुर्वंतितेषांनिमंद्धादिप्रकाशासेइत्यर्थः ॥ ५ ॥ ततःकिमतआह ॥ तावदिति ॥ द्रविणादौविद्यमानेभयंशो
शोकःपुनःचस्पृहाततःपरिभवः ॥ तथापिविपुलोलोभःतस्मात्पुनःकथंचिन्नाशेममेत्यसदाग्रहः ॥ आर्तिमूलंभय
शोकादेःकारणंनप्रवृणीतनाश्रयेत्तवमार्दंघ्रियणामात्रेणभयादिनिवृत्तिः किंपुनःत्वत्प्रकाशेसतिइतिभावः ॥ ६ ॥ ये

येतुत्वदीयचरणांबुजकोशगंधंजिघ्रंतिकर्णविवरैःश्रुतिवातनीतं । भक्त्यागृहीतचरणःपरयाचतेषांनापै
षिनाथहृदयांबुरुहात्स्वपुंसाम ॥ ५ ॥ तावद्भयंद्रविणगेहसुहृन्निमित्तंशोकःस्पृहापरिभवोविपुलश्चलोभः
तावन्ममेत्यसदवग्रहआर्तिमूलंयावन्नतेंघ्रिमभयंप्रवृणीतलोकः ॥ ६ ॥ दैवेनतेहतधियोभवतःप्रसंगा
त्सर्वाशुभोपशमनाद्विमुखेंद्रियाये । कुर्वंतिकामसुखलेशलवायदीनालोभाभिभूतमनसोकुशलानिश
श्वत ॥ ७ ॥ क्षुत्तृट्त्रिधातुभिरिमामुहुरर्द्यमानाः शीतोष्णवातवर्षैरितरेतराच्च ॥ कामाग्निनाच्युतरुषा
चसुदुर्भरेणसंपश्यतोमनउरुक्रमसीदतेमे ८ ॥

निष्कामाअपियेतःतेनाद्रियंतेनरकभाजइत्युक्तं ॥ येतत्कथाश्रवणादिविमुखाःसंतःकाम्यकर्मपरास्तेतिमंदाइत्या =
ह ॥ दैवेनतेहततधियःतवप्रसंगात ॥ श्रवणकीर्तनादिरूपात्सर्वदुःखनिवर्तकाद्विमुखानींद्रियाणियेषांअ ७
कुशलानिअशुभमकर्वंतिमंदाबुद्ध्यात्याः ॥ ७ ॥ अकुशलत्वंदर्शयतिएवं ॥ क्षुत्तृट्चत्रिधातवश्चवातपित्तश्लेष्मा ९
णःतैरिमाःप्रजाःसुदुर्भरेणासुदुःसहेनकामाग्निनाच्युत रुषाविच्छिन्नक्रोधेनचपीड्यमानाःसंपश्यतोमेमनःसीद ३१

देत२

नत्वमपि समस्तकाननानास्ति ॥ यत्तयोरहस्वरूपं तदपि गुणात्मकमेव निर्गुणं ब्रह्मैव तत्समं यतन्नाहस्वरूपमिति द्वाभ्यां अव-
बोधरसोदयेन विकल्पाविर्भावेन प्रारब्धमदाति हन्ते ॥ नमो यस्मात्तस्य तव यद्रूपं तत्रैव सानंदेन सतामुपासकानाम
नुग्रहाय गृहीतमाविष्कृतमवतारपातस्य स्फुटसत्त्वात्मकस्य यदेकं बीजं मूलं तत्तस्य दर्शनार्थं गुणावतारबीजत्वं द-
र्शयति ॥ यत्राभीति ॥ ३ ॥ हे परम अविद्धवर्चः अनावृतप्रकाश अतो विकल्पं निर्भेदमत एव आनंदमात्रमेवंभूत
यद्भवतः स्वरूपं तन्नोरूपान्तरं भिन्नं तत्प्रपद्यामि किं विदमेव तत्त्व ॥ अतः कारणात्तेन वा उद्दरूपमुपाश्रितोस्मि यो

रूपं यदेतदवबोधरसोदयेन प्राश्वन्निवृत्ततमसः सदनुग्रहाय ॥ आदौ गृहीतमवतारशतैकबीजं यन्नाभि
पद्मभवनादहमाविरासं ॥ २ ॥ नातः परं परम यद्भवतः स्वरूपमानंदमात्रमविकल्पमविद्धवर्चः ॥ पश्या१
मि विश्वसृजमेकमविश्वमात्मन् भूतेंद्रियात्मकमदस्त उपाश्रितोस्मि ॥ ३ ॥ तद्वा इदं भुवनमंगलमंगलाय ध्या मंगले२
नो ने स्म दर्शितं त उपासकानां ॥ तस्मै नमो भगवतेनुविधेम तुभ्यं योनादृतो नरकभाग्भिरसत्प्रसंगैः ॥ ४ ॥

मयतादपीत्याह ॥ एकमुपास्येभुमविश्वं यतो विश्वसृजमत एवाविश्वं विश्वस्मादन्यत ॥ किंच भूतेंद्रियात्मकं भूता-
नामिंद्रियाणां चात्मा कारणमित्यर्थः ॥ ३ ॥ नन्वेवमपि सोपाधिकमेतदर्वाचीनमेवेत्याशंक्याह ॥ नन्वेतदेव इदं हे भु-
वनमंगल मंगल तत्त्वया नोस्माकं उपासकानां मंगलाय ध्याने दर्शितं नहि ॥ अव्यक्तवर्त्माभिनिवेशितचित्तानाम-
स्माकं त्वया सोपाधिकं दर्शितं युक्तमिति भावः ॥ अतस्तुभ्यं नमो अनुविधेम अनुवर्त्तनाकरवाम नतर्हि किमिति के-
चित्त्वां नाद्रियंते तत्राह योनादृत इति ॥ असत्प्रसंगैर्निरीश्वरैर्नरकभाग्भिः ॥ ४ ॥ ॥ ॥ ॥

कुतर्क१

तर्ह्येवतन्नाभिसरोजमात्मानमंभः॥ श्वसनंवियच्चेति॥ यदेव दृष्टवांस्तर्ह्येवतदेवलोकविसर्गदृष्टिंसन्नतस्य
नाभिसरसिसरोजंश्वसनंप्रलयवायुंवियदाकाशंचदृष्टवान् कर्मबीजंलोकसृष्टेःकारणंउपरक्तोरजोगुणेनायुक्तः
अतःप्रजाःस्रष्टुमिच्छन्॥ इयदेवनाभिसरोजादिपंचकंएवविसर्गोपयुक्तमभिमुखोदत्तचित्तः अव्यक्तवर्त्मनिभगवत्यभि
वेशितचित्तः॥३३॥ इतिश्रीभागवतेतृतीयेऽष्टमोध्यायः॥८॥ नवमेतपसातंदृष्ट्वानारायणमजःअस्तौदेः

तर्ह्येवतन्नाभिसरःसरोजमात्मानमंभःश्वसनंवियच्च ददर्शदेवोजगतोविधाता नातःपरंलोकविसर्ग
दृष्टिः॥३३॥ सकर्मबीजंरजसोपरक्तः प्रजाःसिसृक्षन्नियदेवदृष्ट्वा॥ अस्तौद्विसर्गाभिमुखस्तमीड्य
मव्यक्तवर्त्मन्यभिवेशितात्मा॥३४॥ इतिश्रीभागवतेतृतीयेऽष्टमोध्यायः॥८॥ ब्रह्मोवाच ज्ञातो
सिमेद्यसुचिरान्ननुदेहभाजांन ज्ञायतेभगवतोगतिरित्यवद्यं॥ नान्यत्त्वदस्तिभगवन्नपितन्नशुद्धंमाया
गुणव्यतिकराद्यदुरुर्विभासि॥ ॥१॥

कार्तिवेसीदंल्लोकसर्गविचिकीर्षया॥ भगवन्नाभेर्निर्गतः कृतार्थतामाविष्कुर्वन्तंतोष्टुमुपचक्राम॥ ज्ञातोसीतिसु
चिरात्दृक्कालोपसानेन॥ अद्यमेमयाज्ञातोसिननुअहोदेहभाजांएतदवद्यंदोषःकिंतत्यद्भगवतस्तत्त्वा
तितत्त्वंनज्ञायतेइतियतःत्वमेवज्ञातंयोग्यःसत्यत्वात्नान्यत्॥ अमत्त्वात्उत्पाद॥ त्वत्तोन्यत्यत्किंचिदप्यस्तिभाति॥ त
दपिशुद्धंसत्त्वंनभवतिकिंत्वसत्त्वमसतःप्रतीतिः तत्राहयद्यतोमायागुणक्षोभात्॥ त्वमेवउरुःबहुरूपोविभासि॥ २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अव्यक्तं प्रधानं मूलं यस्य वृक्षा २

महान्तं चन्दनवृक्षरूपेण निरूपयितुं विशिनष्टि परा[illegible]र्ध्यानि श्रेष्ठानि केयूराणि अङ्गदानि मणिप्रवेका
मण्युत्तमाः॥ तैः पर्यस्ता व्याप्ता दोर्दण्डा एव सहस्रमनन्ताः शाखा यस्य चन्दनवृक्षतोऽपि केयूरादिभिः फलपुष्पादि
भिर्व्याप्तसहस्रशाखो भवति॥ अव्यक्तं ब्रह्म मूलं यस्य ब्रह्माभिव्यक्तिरूपत्वात्॥ वृक्षस्यापि मूलमव्यक्तं भुवना
त्मकमङ्घ्रिपेन्द्रं अहीन्द्रस्यानन्तस्य भोगैः फणैः देहावयवैर्वा अधिपृथिवी[illegible]ताः संवेष्टिताः स्कन्धा वल्शाः स्कन्धा
यस्य चन्दनस्यानेः शाखावल्शे विटपे निरुक्तेः॥ सोऽपि सर्पैर्वेष्टितो भवति॥२८॥ प्रकारान्तरेण तत्पर्वतरूपेणानिरू
पितमपि॥ वि शेषणान्तरैः पुनर्निरूपयति॥ भगवानेव महीध्रः॥ तं च चराचराणामोकः स्थानं सोऽपि तथा अहीन्द्र

परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दण्डसहस्रशाखं॥ अव्यक्तमूलं भुवनाङ्घ्रिपेन्द्रमहीन्द्रभोगैर
धिवीतवल्शं॥२९॥ चराचरौको भगवन्महीध्रमहीन्द्रबन्धुं सलिलोपगूढं॥ किरीटसाहस्रहिर
ण्यशृङ्गमाविर्भवत्कौस्तुभरत्नगर्भं॥३०॥ निवीतमाम्नायमधुव्रतश्रिया स्वकीर्तिमय्या वनमालया ह
रिं॥ सूर्येन्दुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदं॥३१॥ ॥ श्री ॥

स्य बन्धुः सोऽप्यहीन्द्राणां बन्धुः सलिलेनोपगूढमावृतं पर्वतोऽपि मैनाकादिस्तथा किरीटसाहस्रमेव हिरण्य
शृङ्गाणि यस्य सोऽपि मेर्वादिस्तथा यथा पर्वतस्य मध्ये रत्नविद्रुमाद्याविर्भवन्ति तथाविर्भवत्॥ स्पष्टं रूपं यस्मा
त्कौस्तुभरत्नं गर्भे मूर्तिमध्ये यस्य तं॥३०॥ किं च वनमालया निर्वीतं कण्ठलम्बितमाव्यानं॥ आम्नाया वेदा एव म
धुव्रताः तेषां श्रीर्यस्याः तया हरिमिति पर्वतादिरूपं प्रपञ्च्य हरिं साक्षादितिस्पष्टयति॥ सूर्यादिभिरगमम
गम्यं स्वस्वव्यापारैः आकलयितुमशक्यमित्यर्थः किं च त्रिधाम्नापि लोके सुधामसु प्रतीतिः ये प्राधनिकास्तत्त्वार्थे प्रवि
का मद्भिः परिक्रमद्भिः प्रधानं संग्रामः तत्प्रयोजनैः स्वदर्शनादिभिः दुर्लभैः दुरासदं दुष्प्रापं॥३१॥ ॥

आपातके:

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी २५

किंवद्भूतायमतोदैर्घ्येणविस्तरतश्चस्वमानदेहेनमीयतेनेनेतिमानस्तुपमा ॥ शोभनोनिरुपमोदेहः ॥ तेनयद्वास्वइ॰
त्रमानेनोपरिछिन्नः तेनयद्वातानाभ्योस्वात्रूपप्रमाणेन ॥ अतएवलोकत्रयंसंगृह्यतेयस्मिन ॥ नथाविचित्राणिना
नाविधानिदिव्यान्यस्वर्वाणिचआभरणानिवांशुकानिचतेषांकृताश्रीःसमंताच्छोभायेन ॥ तेनदेहेनविशिष्टंहे
एवंस्वतएवाभिरामत्वेपिप्रवाष्छितवेषः ॥ स्वीकृतालंकारोदेहोयस्यतमपश्यत ॥ यद्वाकेनप्रेतादिवंतमित्य॰
पेक्षायामेवंभूतेनदेहेनेतिसंबंधः ॥ २५ ॥ स्वाभिलषितफलायविविक्तैर्मार्गैः ॥ शुद्धैर्वेदोक्तैर्मार्गैरभ्यर्चतांशेसांका

आयाममतोविस्तरतःस्वमानदेहेनलोकत्रयसंग्रहेण ॥ विचित्रदिव्याभरणांशुकानांकृतश्रियापा॰
श्रितवेषदेहं ॥ २५ ॥ पुंसांस्वकामायविविक्तमार्गैरभ्यर्चतांकामदुघांघ्रिपद्मं ॥ प्रदर्शयंतंकृपयान॰
खेंदुमयूखभिन्नांगुलिचारुपत्रं ॥ २६ ॥ मुखेनलोकार्तिहरस्मितेनपरिस्फुरत्कुंडलमंडितेन ॥ शोणा॰
यितेनाधरबिंबभासाप्रत्यर्हयंतंसुनसासुभ्रुवाच ॥ २७ ॥ कदंबकिंजल्कपिशंगवाससास्वलंकृ॰
तंमेखलयानितंबे ॥ हारेणचानंतधनेनवत्सश्रीवत्सवक्षस्थलवल्लभेन ॥ २८ ॥ ॥

मदुघंअंघ्रिपद्मंदर्शयंतं ॥ किंविशिष्टमभ्यसमर्पयंतं ॥ नखाएवेंदवस्तेषांमयूखास्तैर्भिन्नाःसंभिन्नाअंगु॰
लयएवचारूणिपत्राणियस्यतत ॥ २६ ॥ लोकार्तिहरंस्मितंयस्मिंस्तेनपरिस्फुरद्भ्यांकुंडलाभ्यांमंडितेनअधर॰
बिंबदीप्त्याशोणावदाचरितेनशोभननासिकेनसभ्रूणाशोभनयाभ्रुवाचप्रत्यर्हयंतंपूजकान्प्रतिपूजयंतंसंमान॰
यंतं ॥ २७ ॥ कदंबकिंजल्कवत्पिशंगंयद्वासःतेनमेखलयाचनितंबेस्वलंकृतंहेवत्सश्रीवत्सयुक्तंयद्वक्षस्थ॰
लंतस्यवल्लभेनवक्षसिस्रस्तेनअनर्घेणहारेणस्वलंकृतमित्यर्थः ॥ २८ ॥ ॥ २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पुरुषायुषा संवत्सरशतेन कालेनाभिप्रवृत्तः सन्निष्पन्नो योगः तेन विरूढ उत्पन्नो बोधो यस्य ॥ यत्पूर्वं विचिन्वन्नपि
नापश्यत तत्स्वयमेवांतर्हृदये अवभातं अपश्यत ॥ २२ ॥ यदपश्यत तद्वर्णयति मृणालेति नवभिः ॥ मृणालवद्गौ
रं द्यामवांश्च यः शेषस्य भोगो देहः ॥ स एव पर्यंकः तस्मिन् ऊर्ध्व स्थिते पर्यंके फणातपत्रैरायुताः सर्वतो भ्युक्ता ये
मूर्धानः तेषां रत्नानि किरीटस्थानि तेषां द्युभिः ॥ प्रभाभिर्हतं ध्वंतं युगांततोये ॥ २३ ॥ कथंभूतं पुरुषं हरितोपला
द्रेर्मरकतशिलामयपर्वतस्य प्रेक्षां शोभां क्षिपंतं स्वलावण्यातिशयेन तिरस्कुर्वंतं ॥ संध्याभ्रं नीवी परिधानं यस्य त

कालेन सोजः पुरुषायुषाभिप्रवृत्तयोगेन विरूढबोधः ॥ स्वयं तदंतर्हृदयेवभातमपश्यतापश्यत य
न्न पूर्वं ॥ २२ ॥ मृणालगौरायतशेषभोगपर्यंक एकं पुरुषं शयानं ॥ फणातपत्रायुतमूर्धरत्नद्युभिर्ह
तध्वांतयुगांततोये ॥ २३ ॥ प्रेक्षां क्षिपंतं हरितोपलाद्रेः संध्याभ्रनीवेरुरुरुक्ममूर्ध्नः ॥ रत्नोदधारौषधि
सौमनस्य वनस्रजो वेणुभुजांघ्रिपांघ्रेः ॥ २४ ॥

स्य
नवस्त्र्यपपश्यदि
त्यसैवानुषंगः २

यस्य सो भां पीतांबरेण क्षिपंतं उरु रुक्ममूर्ध्नः ॥ अनेकस्वर्णशिखरस्य किरीटैः रत्नानि च उदधाराश्च औषधयश्च सौ
मनस्यानि च पुष्पसमूहाश्च सुमनस एव वा तेषां वनस्रजो वनमाला यस्य वेणव एव भुजा यस्य अंघ्रिपा एव अंघ्र
यो यस्य स च असौ च ॥ तस्य अयमर्थः ॥ यदि तस्मिन्माला इव स्थिता रत्नादयो भवंति ॥ वेणव इव [illegible] भुजाः वृक्षा
अंघ्रिपा इव ॥ तर्हि तस्य शोभां ॥ स्वरत्नमुक्तातनसीपुष्पदामभिः अंघ्रिभिश्चाक्षिपंतमिति ॥ २४ ॥
भुजैः १ त १

प्रविष्टवतस्तस्य वितर्कमाह ॥ योसौ अहमब्जपृष्ठे एषः कः अनन्यदेकमेव एतदब्जं कुतो वा जातं ॥ यद्येतदधिष्ठितं तेनाधः
स्तात्तावत्तेनानेन ज्ञानिस्थितं भाव्यं स इत्थमुद्वीक्ष्येत्युत्तरेणान्वयः ॥ तथा च श्रुतिः ॥ सोपश्यत्पुष्करपर्णे तिष्ठन्सो
मन्यत ॥ अस्ति वै तत् ॥ यस्मिन्निदं तिष्ठतीति ॥ १८ ॥ तस्य च बहिर्मुखस्य प्रवृत्त्या महतापि कालेन तदप्राप्तिमाह ॥ स इति
द्वाभ्यां तस्याब्जस्य यन्नालं तस्य नाडीभिः तच्छिद्रैः तस्य खरनालस्य पद्मस्य यन्नालं तस्य नाभिमधिष्ठानं विचिन्वन् अर्वाग्ग

क एष योसावहमब्जपृष्ठ एतत्कुतो वाब्जमनन्यदप्सु ॥ अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सता
नु भाव्यं ॥ १८ ॥ स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरंतर्जलमाविवेश ॥ नार्वाग्गतस्तत्खरनालनाल ना
भिं विचिन्वंस्तदविंदताजः ॥ १९ ॥ तमस्यपारे विदुरात्मसर्गं विचिन्वतोभूत्सुमहांस्त्रिनेमिः ॥ यो देहभा
जां भयमीरयाणः ॥ परिक्षिणोत्यायुरजस्य हेतिः ॥ २० ॥ ततो निवृत्तोऽप्रतिलब्धकामः स्वधिष्ण्यमासा
द्य पुनः स देवः ॥ शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः ॥ २१ ॥ ॥

तोपि तन्नाभिं नाविंदत ॥ १९ ॥ आत्मसर्गं स्वकारणं त्रिनेमिः कालः ॥ अजस्य विष्णोर्हेतिः सुदर्शनरूपं शस्त्रं देहभाजां न
राणां भयमुत्पादयन्निति ॥ संवत्सरशतमतिक्रांतमित्यर्थं भवति ॥ २० ॥ अंतर्मुखत्वेन यावत् भगवंतं दृष्टवानित्याह
द्वाभ्यां ॥ ततोन्वेषणान्निवृत्तः न प्रतिलब्धः कामो मनोरथो येन स्वधिष्ण्यं पद्मं जितेन श्वासेन निवृत्तं संयतं [illegible] चि
त्तं यस्य स तथा एवमारूढः आश्रितः समाधियोगो येन तथाभूतः सन् न्यषीदत् उपाविशत् ॥ २१ ॥ ॥ २८

सतनीयानर्थः पद्मकोशः सहसा उदतिष्ठत् कर्माणि जीवादृष्टानि प्रतिबोधयति यः कालः तेन स आत्मा श्रीविष्णुर्योनिर्यस्य
॥१४॥ तल्लोकात्मकं पद्मं सर्वान् गुणान् जीवभोग्यानर्थान् अवभासयतीति तथा तत् यस्मात् जातं स एव विष्णुः उ इ
वी॰ २ ति संबोधने प्राविशत् ॥ प्रकर्षेण आत्मशक्तिरेव श्रेष्ठा तया मितया विवेश तस्मिन् विष्णुना अधिष्ठिते पद्मे विधाता ब्र
ह्माभूत् कथंभूतः स्वयमेव वेदमयः ॥ न तु अध्ययनेन प्राप्तवेदः ॥ कोसौ अदृष्टपितृत्वेन यं स्वयंभुवं वदंति स पा
द्मकल्पांते नारायणेन सह निद्रयैकीभूतश्चासीत् ॥ तस्मिन् प्रबुद्धे तत एव पाद्मे कल्पे पद्मद्वारेणाभिव्यक्तिं प्राप्तः

स पद्मकोशः सहसोदतिष्ठत् कालेन कर्मप्रतिबोधनेन ॥ स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क
इवात्मयोनिः ॥१४॥ तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासं ॥ तस्मिन्स्वयं वेदमयो वि
धाता स्वयंभुवं यं स्म वदंति सोऽभूत् ॥१५॥ तस्यां स चांभोरुहकर्णिकायामवस्थितो लोकमपश्यमानः
परिक्रमन्व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ॥१६॥ तस्माद्युगांतश्वसनावघूर्णजलोर्मिचक्रा
त्सलिलाद्विरूढम् ॥ उपाश्रितः कंजमु लोकतत्त्वं नात्मानमद्धाविददादिदेवः ॥१७॥ ॥

इत्यर्थः ॥१५॥ स च तस्मिन्कल्पे चतुर्मुखोऽभूदित्याह ॥ तस्यामिति परिक्रमन् ॥ तत्रस्थ एव ग्रीवां चालयन् ॥ लोकनि
रीक्षणार्थं विवृत्ते विचलिते नेत्रे यस्य ॥१६॥ तस्य च श्रीनारायणोपासनयैव आविर्भूतज्ञानक्रियाशक्तेर्लोककर्तुः
तेन स्वतन्त्रता निवृत्ता प्रथमं तस्य विमोहं तस्मात् ॥ सलिलाद्विरूढं उ अतं कंजमुपाश्रितोऽपि साकल्येन तत्कंजं लोकं तत्त्वं
चात्मानं च साक्षात् न ज्ञातवान् ॥ उ अति विस्मये कथंभूतात् युगांतश्वसनः प्रलयवायुः तेनावघूर्णितं च पतज्जलं
प्रकंपितं यज्जलं तस्मात् सवेत ऊर्मिचक्रं यस्मिन् ॥१७॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पुलस्त्येनोक्तः इत्यनेनैव मात्सर्यात् पितरं राक्षसभक्षितं श्रुत्वा पराशरो राक्षसवधसत्रप्रवृत्तो वसिष्ठवचनान्निवृत्तः॥ ततः पुलस्त्येन स्ववंशसंतानरक्षणात्संतुष्टेन वरो दत्तः॥ पुराणप्रवक्ता भविष्यसीति॥९॥ तदेवं संकर्षणात्संप्रदायप्रवृत्तिम् दर्शयन् विभूतिकथनाय प्रश्नोद्भवं वक्तुमाह॥ उदाप्लुतं एकार्णवोदके निमग्नं यत् यदा निमीलितदृक्॥ प्रतिरोहिताचिच्छक्तिरेव श्रीनारायणो नेत्रे निमीलितवानित्यर्थः॥ मायाविनोदं परित्यज्य॥ स्वात्मरतौ स्वरूपानंद एव कृ

प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यं॥ सोऽहं तवैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय॥९॥ उदाप्लुतं विश्वमिदं तदासीद्यन्निद्रयामीलितदृङ्न्यमीलयत्॥ अहींद्रतल्पेऽधिशयान एकः कृतक्षणः स्वात्मरतौ निरीहः॥१०॥ सोंऽतःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः॥ उवास तस्मिन्सलिले पदे स्वे यथानलो दारुणि रुद्धवीर्यः॥११॥ चतुर्युगानां च सहस्रमप्सु स्वपन्स्वयोदीरितया स्वशक्त्या॥ कालाख्ययासादितकर्मतंत्रो लोकानपीतान्ददृशे स्वदेहे॥१२॥ तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोऽर्थो रजसा तनीयान्॥ गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात्॥१३॥ ॥

तोत्सवः अत एव निरीहः निष्क्रियः सन्॥१०॥ कालशक्तेः उदीरणं पुनः सृष्ट्यवसरे प्रबोधनार्थं स्वपदे अधिष्ठाने वह्निरिव स्वप्रभावे दृष्टांतः यथानल इति॥ स्वयाविच्छिन्नया सह वर्तमान एव योगनिद्रया स्वपन् पूर्वं प्रबोधनार्थं नियुक्तया स्वकालशक्त्या आसादितं कर्मतंत्रं क्रियाकलापो यस्य सः॥ अपीतान् लीनान् ददृशे॥१२॥ लोकस्य सृष्ट्यर्थं सूक्ष्मे सत्त्वे भूप्ये अभिनिविष्टा दृष्टिर्यस्य सः कालानुसारिणा रजोगुणेन विद्धः संक्षोभितः सन् तनीयानतिसूक्ष्मोऽर्थः सृष्ट्युद्भविष्णुर्नाभिदेशादुद्गत इत्यर्थः॥१३॥ ॥ ६०

स्को ३ प्रापितं २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तमेवविशिनष्टिस्वमेवधिष्ण्यंस्वमात्रमंवासुदेवसंज्ञंयस्मात्तेदृष्ट्वंध्यानयच्छेनात्रभूयबहुमानयंतंसर्वो॰
त्कर्षेणपूजयंतंप्रत्यग्गृहीतमंतर्मुखीकृतंतेनेशांघ्रिजमंबुजमुकुलंकिंचिदुन्मीलयंतंकृपावलोकेनतत्कुमारा दीन
दीनांप्रबुद्धयार्थं ॥ ४ ॥ मुनीनांविशेषणेनसार्धेनस्वर्धुन्याउदकेनार्द्रैरिति ॥ श्रीभागवतश्रवणार्थंसत्यलो
कात्पातालंप्रतिप्रवतरंतोनिरंतर रंगांगामधस्तपवावतीर्णाइतिभावः ॥ चरणोउपधीयतेयस्मिन्तय॰
त्पीतदुपस्पृशंतोनमंतः ॥ कथंभूतंतदाह ॥ यत्पद्मंप्रेमसहितंयथाभवत्येवंनानोपहारैःपूजयंतिवरार्थंय॰

स्वमेवधिष्ण्यंबहुमानयंतंयंवासुदेवाभिधमामनंति ॥ प्रत्यग्गृहीतांघ्रिजकोशमीषदुन्मीलयंतं
विबुधोदयाय ॥ ४ ॥ स्वर्धुन्युदार्द्रैःस्वजटाकलापैरुपस्पृशंतश्चरणोपधानं ॥ पद्मंयदर्चंत्यहिराज
कन्याःसप्रेमनानाबलिभिर्वरार्थं ॥ ५ ॥ मुहुर्गृणंतोवचसानुरागस्खलत्पदेनास्यकृतानितज्ज्ञाः
किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रं ॥ ६ ॥ प्रोक्तंकिलैतद्भगवत्तमेननिवृत्तिधर्मा
भिरतायतेन ॥ सनत्कुमारायसचाहपृष्टः ॥ सांख्यायनायांगधृतव्रताय ॥ ७ ॥ सांख्यायनःपार॰
महंस्यमुख्योविवक्षमाणोभगवद्विभूतीः ॥ जगादसोस्मद्गुरवेन्वितायपराशरायाथबृहस्पतेश्च

तिकामाः ॥ ५ ॥ कृतानिकर्माणिगृणंतः ॥ केनानुरागेणस्खलंतिपदानियस्मिंस्तेनवचसा तानिजानंतीतित
ज्ज्ञाः सहस्रमेवसाहस्रं ॥ किरीटानां ॥ साहस्रंयेमणिप्रवेकाःरत्नोत्तमास्तैःप्रद्योतितमुद्दामफणानांसहस्रंयस्य
स्यतंप्रश्लोकमितिपूर्वेणैवान्वयः ॥ ६ ॥ तेनसंकर्षणेनसनत्कुमारायप्रोक्तं ॥ ७ ॥ पारमहंस्यधर्मेषुमुख्यःवि॰
वक्ष्यमाणइत्यात्मनेपदंतुवादेशास्यवचेरुभयपदित्वात् ॥ अन्वितायानुगताय ॥ ८ ॥

श्री भाग॰ टी॰ २९

गुरुं विना तत्र भवतीत्याह सत इति ॥ प्रश्नान्मे मित्रत्वात् स्निग्धत्वादिति ॥ अन्वयभेदात्क्रमेपदस्यैवोत्तरत्रं ॥ ४० ॥ न
नोयदेप्रेतजीवाभयप्रदानस्य ॥ ४१ ॥ पुराणे कल्प्यते प्रकाश्यते इति पुराणकल्पो वेदस्तस्यार्थः आपृष्टः पु राण
कल्पो येन मुनिप्रधानः स ॥ ४२ ॥ इति श्रीभावार्थे तृतीये सप्तमः ॥ ७ ॥ अष्टमे समभूद्ब्रह्मा नाभेरंबुजलशायिनः
तमज्ञानन्जले विष्वक्पश्यन्तोषयद्दिष्ट्यैतारमभिनंदति सत्सेवितं येगपः वताह्येयस्मात् ॥ इहास्मिं

स्वेतो तानें कुतः पुंसां भक्तिर्वैराग्यमेव च ॥ एतान्मे पृच्छतः प्रश्नान्हरेः कर्मविवित्सया ॥ ३९ ॥ ब्रूहि मेऽज्ञस्य
मित्रत्वादजया नष्टचक्षुषः ॥ ४० ॥ सर्ववेदाश्च यज्ञाश्च तपो दानानि चानघ ॥ भूताभयप्रदानस्य न कुर्वीर
न्कलामपि ॥ ४१ ॥ शुक उवाच ॥ स इत्थमापृष्टपुराणकल्पः कुरुप्रधानेन मुनिप्रधानः ॥ प्रवृद्धहर्षो भगव
त्कथायां संचोदितस्तं प्रहसन्निवाह ॥ ४२ ॥ इति श्रीभागवते तृतीये सप्तमः ॥ ७ ॥ मैत्रेय उवाच ॥ सत्सेव
नीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः ॥ बभूविथेहाजितकीर्तिमालां पदे पदे नूतनयस्यभीक्ष्
णं ॥ १ ॥ सोहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य ॥ प्रवर्तये भागवतं पुराणं यदाह सा
क्षाद्भगवानृषिभ्यः ॥ २ ॥ आसीनमुर्व्यां भगवंतमाद्यं संकर्षणं देवमकुंठसत्वं ॥ विविित्सवस्तत्वमतः परस्य
कुमारमुख्या मुनयोऽन्वपृच्छन् ॥ ३ ॥ ॥

वंशो बभूविथ यतोऽस्मि कथंभूतः भगवानेव प्रधानभूतो यस्य सः अत्र हेतुः ॥ अजितकीर्तिमालां नूतनयसि नवं नवं करो
षि ॥ १ ॥ क्षुल्लसुखाय महद्दुःखं प्राप्तानां तस्य दुःखस्य विरमाय प्रवर्तये प्रारंभे कोसौ भगवान् ॥ केभ्यः ऋषिभ्यः प्रा
ह ॥ कथं वक्तया प्राप्तं तत्र इत्यपेक्षायामाह ॥ आसीनमिति सप्तभिः उर्व्यां पातालतले अकुंठसत्वं ॥ अप्रतिहतज्ञा
नं ऋतः संकर्षणात्परस्य श्रीवासुदेवस्य ॥ ३ ॥ ॥

२९

रूपं लिंगशरीरमाचारः स्वभावः शमादि । वेदस्य विकर्षणं विभागं ॥२९॥ वितानानि विस्तारान् नैष्कर्म्यस्य ज्ञानस्य उपा-
यस्य च सांख्यस्य योगमार्गो तंत्रं चेत्यर्थः ॥३०॥ पाषंडानां पथः प्रवृत्तीः तदेव वैषम्यं ॥३१॥ निमित्तान्युपायान् परस्परावि-
रोधेन ग्रहादीनां कालचक्रेण संस्थितिं ॥३३॥ येन मार्गेण तन्नयेन येषामिति मया इष्टानां ॥३५॥ अनापृष्टमपि मि-

वर्णाश्रमविभागश्च रूपशीलस्वभावतः । ऋषीणां जन्मकर्माणि देवस्य च विकर्षणं ॥२९॥ यज्ञस्य च विताना-
नि योगस्य च पथः प्रभो । नैष्कर्म्यस्य च सांख्यस्य तंत्रं वा भगवत्स्मृतं ॥३०॥ पाषंडपथवैषम्यं प्रतिलोमनि-
वेशनम् । जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ॥३१॥ धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः ।
वार्तया दंडनीतेश्च श्रुतस्य च विधिः पृथक् ॥३२॥ श्राद्धस्य च विधिं ब्रह्मन् पितॄणां सर्गमेव च । ग्रहनक्षत्रता-
राणां कालावयवसंस्थितिं ॥३३॥ दानस्य तपसो वापि यच्चेष्टापूर्तयोः फलं । प्रवासस्थस्य यो धर्मो यश्च
पुंस उतापदि ॥३४॥ येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः । संप्रसीदति वा येषामेतदाख्याहि चा-
नघ ॥३५॥ अनुव्रतानां पुत्राणां शिष्याणां च द्विजोत्तम । अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः ॥ त-
त्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः । तत्रेमं क उपासीरन् क उ स्विदनुशेरते ॥३७॥ पुरुषस्य च संस्था-
नं स्वरूपं वा परस्य च । ज्ञानं च नैगमं यत्तद्गुरुशिष्यप्रयोजनं ॥ निमित्तानि च तस्येह प्रोक्तान्यनघ सूरि-
भिः ॥३९॥ ॥ श्री ॥ ॥

ष्टमपि मयोक्तं वक्तव्यमिति भावः ॥३६॥ प्रतिसंक्रमः प्रलयः तत्र प्रलये इमं परमेश्वरं शयानं राजानमिव चाम-
रग्राहिणः के वा अनुशेरते पार्श्वे शयानमनु स्वपंति ॥३७॥ पुरुषस्य च संस्थानं जीवस्य तत्त्वं परमेश्वरस्य स्वरूपं येये नोपश्ले-
षनतयोरैक्यं । तत्प्राप्त्यर्थं ज्ञानं च नैगमं मोक्षोपनिषदं ॥३८॥ यानि सूरिभिः प्रोक्तानि तस्य ज्ञानस्य साधनानि तानि ब्रूहि २५

श्री
भाग
टी
२५

प्रधानं स्वप्रहेन इत्युक्तमनुवदति त्रिभिः सृष्ट्वेति ॥ विकारैरिंद्रियादिभिः सहितानि उद्धृत्य तदंशैः ॥ २१ ॥ वैराजं स्वसृष्टं प्र-
विष्ट सहस्ररूपमाह ॥ यमिति विराजं विशिनष्टि यत्रेति तत्र इमे विश्वे सर्वे लोकाः सविकाशम् अवकाशेन ॥ २२ ॥ प्राणाद
यः पंचनागादयः पंचेत्येवं दशविधः प्राणः इंद्रियाणि चार्थाः च इंद्रियाणि चेति पुनरुक्तिः तद्देवतालक्षणार्थात्
त्रिवृतः सर्वोपबृंहकत्वात् ॥ प्राणस्य तत्त्वाद्धि मयं एवं त्रिवृत् त्रिविधः प्राणः त्वयेरित उक्तः तस्य विभूतीर्ब्राह्मणाः वि
सर्गेश्वरा वाच्याः ॥ २३ ॥ यत्र यस्मात् दृष्टं विश्वं ततं व्याप्तं ॥ २४ ॥ एवमेतन्नु वाहृष्टो मैत्रेयो भगवान् किलेति परीक्षितः प्रश्नो

सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् ॥ तेभ्यो विराजमुद्धृत्य तमनु प्राविशद्विभुः ॥ २१ ॥ यमाहुराद्यंपु
रुषं सहस्रांघ्र्यूरुबाहुकं ॥ यत्र विश्व इमे लोकाः सविकाशं समासते ॥ २२ ॥ यस्मिन्दशविधः प्राणः सेंद्रिया
र्थेंद्रियस्त्रिवृत् ॥ त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः ॥ २३ ॥ यत्र पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः
प्रजाविचित्राकृतय आसन्याभिरिदं ततं ॥ २४ ॥ प्रजापतीनां स पतिः चक्लृपे कान्प्रजापतीन् ॥ सर्गांश्चैवा
नुसर्गांश्च मनून्मन्वंतराधिपान् ॥ २५ ॥ एतेषामपि वंशांश्च वंशानुचरितानि च ॥ उपर्यधश्च ये लोका भूमे
र्मित्रात्मजासते ॥ २६ ॥ तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय ॥ २६ ॥ तिर्यङ्मानुषदेवानां सरीसृपपतत्त्रि
णां ॥ वद नः सर्गसंव्यूहं गार्भस्वेदद्विजोद्भिदां ॥ २७ ॥ गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयम्
सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमम् २८ ॥ ॥

परं तया विदुरमैत्रेयसंवादः प्रस्ताविनः पुनः तानेव विदुरेण कृतान् प्रश्नानाह ॥ यावत्समाप्तिः ॥ प्रजापतीनां पतिर्ब्र-
ह्मा स्यादिना वर्णयेति वक्ष्यमाणेनान्वयः विक्लृप्य प्रकल्प्य यत् सर्गान् विविधान् अनुसर्गास्तदुद्भवान् ॥ २५ ॥ हे मि-
त्रापत्य तत्संस्थां सन्निवेशं ॥ २६ ॥ सर्गाणां संव्यूहं संविभागं गार्भस्वेदद्विजोद्भिदां गार्भा जरायुजाः स्वेदाः स्वे-
दाभावजाताः स्वेदजाः द्विजाः उद्भिदस्तेषां ॥ २७ ॥ सर्गादीनाश्रयं एव सृजतः ॥ २८ ॥ ॥ २५

यस्मात्वयासाधुव्याहृतं किंतत्हरेः शक्तियोआत्ममायातीवविषयात दयनं तदाश्रयमेतत् उगात्वादिकं भातीतियद्यः
स्मात्त्वमिरः छेदादिवत् अपार्थं मवस्तुभूतं मूलमूतं वयस्मादस्य विश्वस्य मूलं सा तानं विनाबहिर्नास्ति २६ ॥ अं
त्यक्तवान्सर्वं मम संशयो जातइत्याह यस्त्वेति मूढतमः देहादयासक्तो बुद्धेः प्रकृतेः परमीश्वरं प्राप्तः तौ सुखं यथा भवः
ति तयापयेतेनीवेतेइत्यर्थः ॥ संशयं त्वत्प्राभावात् यस्तु दुःखानुसंधानमपि चेजिह्रासति स्वानंदसंवेदनाभावा
द्दावेन प्राज्ञोति सत्तु क्लिश्यतीत्यर्थः ॥ दुरंतीतदुहतार्थेस्मियतः त्वयास्य पायः छिन्नः केवलं चिंतावशुनिरेवावशिष्टा वाधितानुवृत्तिः १

साध्वेतद्व्याहृतं विद्वन्नात्ममायायनं हरेः ॥ आभात्यपार्थं निर्मूलं विश्वमूलं न यद्बहिः ॥ २६ ॥ यस्तु मूढतमो लो
के यश्च बुद्धेः परं गतः ॥ तावुभौ सुखमेधेते क्लिश्यत्यंतरितो जनः ॥ २७ ॥ अर्थाभावं विनिश्चित्य प्रतीतस्यापि
नात्मनः ॥ तां चापि युष्मच्चरणसेवयाहं पराणुदे ॥ २८ ॥ यत्सेवया भगवतः कूटस्थस्य मधुद्विषः ॥ रतिरा
सो भवेत्तीव्रः पादयोर्व्यसनार्दनः ॥ २९ ॥ दुरापा ह्यल्पतपसः सेवा वैकुंठवर्त्मसु ॥ यत्रोपगीयते नित्यं देवदे
वो जनार्दनः ॥ ३० ॥ ॥ ॥

नामपि युष्मत्प्रसादात्निवर्तिष्यत इत्याह ॥ नात्मनः अनात्मनः प्रपंचस्य प्रतीतस्यापि ॥ अर्थाभावमर्थो नास्ति किंतु तत्र
प्रतीतिमात्रमपि युष्मच्चरणसेवया निश्चित्य तां प्रतीतिमप्यहं ॥ पराणुदे अपनेष्यामीत्यर्थः ॥ २८ मधुद्विषः पाद
योः रतिरासः प्रेमोत्सवः तीव्रः दुर्वारः स्वाभाविकः व्यसनं संसारमर्दयति नाशयतीति तथा ॥ २९ ॥ अल्पोदुर्लभं
प्राप्तं मयेत्याह ॥ दुरापा दुर्लभा ॥ वैकुंठस्य विष्णोः ॥ तल्लोकस्य च वर्त्मसु मार्गभूतेषु महत्सु यत्र महत्सेवया हरि
कथाश्रवणं ततो हरौ प्रेम ॥ तेन च देहाद्यनुसंधानमपि निवर्तते इति तात्पर्यं ॥ ३० ॥ श्रेयस्ते ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अज्ञानमेव संकटं दुर्गं तस्मिन् तन्मानसं कश्मलं मोहं पराणुद अपाकुरु ॥ ७ ॥ चोदितः प्रार्थितः स्मयन्निव विस्मितवदिव वदन्
गतस्मयः ॥ ८ ॥ भगवतो विश्वप्रकृतेरीश्वरस्य सेयं माया यन्नयेन तर्केण विरुध्यत इत्युक्तं विरोधमेवानुवदति ॥ विमुक्तस्येव
पुंसो विषयाद्बन्धनं कार्पण्यं चेति ॥ ९ ॥ अत्रोदाहरणमाह ॥ यथा यथार्थेन शिरश्छेदादिना विना [illegible] उपद्रष्टुः स्वप्नसाक्षिणः स्वमेः
स्वशिरश्छेदात्मविपर्ययः केवलं मृषैव प्रतीयते तद्वत् ॥ १० ॥ ननु ईश्वरस्यापि किं न प्रतीयते तत्राह ॥ यथा जले प्रतिबिंबित-
सोमे चंद्रमसो जलोपाधिकृतः कंपादिधर्मो दृश्यते न त्वाकाशस्थितस्य तथा अनात्मनो दे[illegible]हादेर्धर्मोऽसन्नपि तदभिमानि-
नो द्रष्टुरात्मनो जीवस्यैव न त्वीश्वरस्येत्यर्थः ॥ ११ ॥ तन्निवृत्त्युपायमाह ॥ स वै अनात्मनो गुणः निवृत्तिधर्मेण वासुदेवानुकंपया ॥

एतस्मिन्मे मनो विद्वन्खिद्यतेऽज्ञानसंकटे ॥ तन्नः पराणुद विभो कश्मलं मानसं महत् ॥ ७ ॥ श्रीशुकः ॥ स इत्थं चोदि-
तः क्षत्त्रा तत्त्वजिज्ञासुना मुनिः ॥ प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः ॥ ८ ॥ श्रीमैत्रेयः ॥ सेयं भगवतो माया यन्न-
येन विरुध्यते ॥ ईश्वरस्य विमुक्तस्य कार्पण्यमुत बंधनं ॥ ९ ॥ यदर्थेन विनामुष्य पुंस आत्मविपर्ययः ॥ प्रतीयत उपद्र-
ष्टुः स्वशिरश्छेदनादिकः ॥ १० ॥ यथा जले चंद्रमसः कंपादिस्तत्कृतो गुणः ॥ दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गु-
णः ॥ ११ ॥ स वै निवृत्तिधर्मेण वासुदेवानुकंपया ॥ भगवद्भक्तियोगेन तिरोधत्ते शनैरिह ॥ यदेंद्रियोपरामोऽथ द्र-
ष्ट्रात्मनि परे हरौ ॥ विलीयंते तदा क्लेशाः ॥ १३ ॥ अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः ॥ कुतः
पुनस्तच्चरणारविंदपरागसेवारतिरात्मलब्धा ॥ १४ ॥ श्रीविदुरः ॥ संछिन्नः संशयो मह्यं तव सूक्तासिना विभो ॥

वतस्मिन्भक्तियोगः तेन तिरोधत्ते अदृश्यो भवति शनैरित्यनेन साधनानुसारेणोक्तं ॥ १२ ॥ ननु सर्वानर्थनिवृत्तिः कदे-
त्यपेक्षायामाह ॥ यदेंद्रियाणामुपरामो नैश्चल्यं कुत्र द्रष्टर्यात्मनि अंतर्यामिनि रूपेणैव ध्यानेन तदनंतरमेव कृत्स्नक्लेशा विलयमायांत्यत्र दृष्टां-
तः संसुप्तस्येवेति ननु पुनस्तत्स्थाने ॥ १३ ॥ भक्तियोगेन क्लेशनिवृत्तिं प्रदर्शयति ॥ अशेषेति गुणानामनुवादश्रवणं च
आत्मनि मतमिलन्याः श्रवणकीर्तनादेः तया स्मरणध्याने किं पुनर्वाच्यमित्याशयः ॥ १४ ॥ उभयमभिनंदन्नात्मनः कृतार्थतामाविष्करोति
संछिन्न इति सूक्तिः वि[illegible] रूपत्वाविरोधोऽपि ॥ कथमीश्वरस्य जगत्कर्तृत्वादिकं यद्वा जीवस्य संसारश्चेति यः संशयो ममासीत् ॥ मन व-
सज्ञो मोवयति किम् ॥ वाक्यमेवासिः खड्गः तेन संछिन्नः अत [illegible] मन उभयत्रापि ईश्वरस्वातंत्र्ये जीवपारतंत्र्ये च संप्रधावति ॥ सम्प्र-
कथं विशति ॥ एवं चाविलुप्तबोधो यस्मात्मनस्य कथमजया बंधः ज्ञानो वा न विहतिरिति संप्राय उभयत्रेति बंधमोक्षे चेत्यर्थः ॥ १५ ॥

संसुप्तस्येव कृत्स्न शः २

नथि ३

न

दृशाजीं २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यदुक्तं ॥ स त्वं विश्वसृजामीशो विज्ञापितमधोक्षज इत्यादिना अविद्योपाधेर्जीवस्य च भोगार्थमीश्वरः सृष्ट्यादि करोतीति
तदस्याहेतुमनुवदति ॥ अस्राक्षीदिति ॥ गुणमय्या आत्मनो जीवस्य कर्तृत्वभोक्तृत्वमोहोत्यादिकाया मायया तया सृष्ट
वान् ॥ तदुक्तं प्रथमे यया संमोहितो जीव आत्मानं त्रिगुणात्मकं ॥ परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते इत्यादिना ॥ अत्र च अ
तो भगवतो मायामायितामपि मोहिनीति संस्थापयति पालयति प्रत्यपिधास्यति प्रातिलोम्येन तिरोहितं करिष्य
ति ॥ यो ह्यात्नेश्वातिलेशेनात्मनि धारयिष्यति ॥ ४ ॥ एतच्च जीवस्याविद्याश्रयत्वे तु दूरे तन्न तत्संभवतीत्याह ॥ देशः
तद्वृत्ति ॥ योसौ देशादिभिरविलुप्तात्मबोधः आत्मा जीवः ब्रह्मस्वरूपत्वात् ॥ कथमजया अविद्यया युज्येत ॥ तत्र देश

अस्राक्षीद्भगवान्विश्वं गुणमय्यात्ममायया ॥ तया संस्थापयत्येतद्भूयः प्रत्यपिधास्यति ॥ ४ ॥ देशतः
कालतो योसाववस्थातः स्वतोन्यतः ॥ अविलुप्तावबोधात्मा स युज्येताजया कथं ॥ ५ ॥ भगवानेक एवैष
सर्वक्षेत्रेष्ववस्थितः ॥ अमुष्य दुर्भगत्वं च क्लेशो वा कर्मभिः कुतः ॥ ६ ॥ ॥ ॥

तोदीयस्य अवबोधलोपो नास्ति सर्वगतत्वात् ॥ न कालतो विप्लुत इव नित्यत्वात् ॥ नावस्थातः स्मृतिवत् ॥ अविक्रिय
त्वात् ॥ न च स्वतः स्वप्नवत् सत्यत्वात् ॥ नान्यतः घटादिवत् ॥ अद्वितीयत्वात् ॥ एवमेतैर्यस्य बोधो न लुप्यते ॥ स क
थमजया युज्येत ॥ अजा वा अविद्यैव न मायया तस्या अवबोधेन विरोधाभावात् ॥ ५ ॥ किंच ब्रह्मरूपत्वादेव जीवः
स्य संसारोपि न विद्यत इति आश्रयति ॥ सर्वक्षेत्रेष्ववस्थितो भोक्तापि वस्तुतो भगवानेव चिद्रूपत्वेन तद्व्यतिरेका
भावात् ॥ एवं च सत्यमुष्य जीवस्य दुर्भगत्वमानंदादिभ्रंशः कर्मभिर्हेतुभूतैः क्लेशो वा कुतः कर्मसंबंधाभावा

त् अन्यथा ईश्वरस्यापि तत्प्रसंगः स्यादिति भावः ॥ ६ ॥

श्री
भाग
टी॰
२२

नचात्मीयत्वात्तेनेतिर्वेषः कार्यः कर्तव्यः ॥ ब्रह्मणोपिइत्थंपत्वादित्याह ॥ आत्मनोहरेर्महिमायोगविषयकयापिसंवत्सर
सहस्रांतेपिऋषादिकविनाब्रह्मणापिकिमवसितइतिकाकुन्यापत्वावानितिनत्वात्तत्रैलुक्तं ॥ ३७ ॥ यद्यस्मात्स्व
यमपि आत्माहरिः ॥ आत्मवर्त्मस्वमायागतिमेतावदितिनवेद ॥ अनंतत्वात् ॥ ३८ ॥ अतोदुर्ज्ञेयत्वात्केवलंनम
स्करोति ॥ यस्मात्तान ॥ अप्राप्यवाचोपिमनसासहतत्प्राप्येवनिवर्त्तंतेदुर्ज्ञेयत्वात् ॥ नकेवलंवाङ्मनसेअहंकावस्था
प्यपिप्रातारूढायइमेरुद्रियाधिप्रातारोदेवाअप्येव ॥ ३८ ॥ इतिश्रीभावार्थेतृतीयेषष्ठः ॥ ६ ॥ सप्तमेसंशायछेदिह
तिनेयमनेवेषः ॥ पुनःतत्राकनानानाप्रश्नासमनुदीरिताः ॥ अथतेभगवल्लीलायोगेहितास्सत्यादिनामायात्र मायोप
अतोभगवतोमायामायिनामपिमोहिनी ॥ यत्स्वयंचात्मवर्त्मात्मानवेदकिमुतापरे ॥ ३७ ॥ यतोप्राप्यन्यवर्त्तंत
वाचश्चमनसासह ॥ अहंचान्यइमेदेवास्तस्मैभगवतेनमः ॥ ३८ ॥ इतिश्रीभागवतेतृतीयेषष्ठो
ध्यायः ॥ श्रीशुकउवाच ॥ एवंब्रुवाणंमैत्रेयंद्वैपायनसुतोबुधः ॥ प्रीणयन्निवभारत्याविदुरःप्रत्यभा
षत ॥ १ ॥ विदुरउवाच ॥ ब्रह्मन्कथंभगवतश्चिन्मात्रस्याविकारिणः ॥ लीलयाचापियुज्येरन्निर्गुणस्यगु
णाःक्रियाः ॥ २ क्रीडायामुद्यमोर्भस्यकामश्चिक्रीडिषान्यतः ॥ स्वतस्तृप्तस्यचकथंनिवृत्तस्यसदान्यतः ३
लीलीलयाभगवान्सृष्ट्यादिकरोतिइत्येवंब्रुवाणंभारत्याप्रार्थनारूपयाप्रीणयन्निवेति ॥ अभिप्रायमाहतेनाह्येया
त ॥ २ ॥ निर्विकारस्यक्रियाः ॥ निर्गुणस्यगुणाः कथंलीलयेत्युक्तिःप्रयोजनाभावंपरिहरतिनवस्तुविरोधइतिभा
वः ॥ २ ॥ अर्भकवल्लीलापिदुर्घटेत्याहक्रीडायामितिप्रवर्तयतीत्युद्यमः ॥ अर्भकस्यक्रीडायांप्रवृत्तिहेतुः
कामोभिलाषश्चान्यतःस्ववयस्यान्तरेणवालोतरप्रवर्त्तनेनवातस्यक्रीडेच्छाभवतिइत्थंस्वतस्तृप्तस्यतुकथंकामःअन्य
तःसदानिवृत्तस्यचासंगादद्वितीयस्यकथमन्यतःचिक्रीडिषेत्यर्थः ॥ ३ ॥ ॥ श्री ॥ य
२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्मांनिमित्तभूतायां यस्य वक्ष्याम्यहं हरेः स्वयमेवतत्ख्याति ॥ २१ ॥ यद्यस्माज्जाताः गुरुत्वाज्जनकत्वात्स्वेष्टनिप्रदत्वाच्चवि
ष्णोर्नारायणेनतेषांयथोधर्मइत्यर्थः ॥ २२ ॥ भोद्दानः दैवकर्मात्मरूपिणः कालकर्मस्वभावशक्तिमतः ॥ भगवतोयो
गमायावलेनोक्तं भिन्नमेतद्विराड्रूपं उपकार्तसाकल्येननिरूपयितुंकः अर्हत्याद्विश्वेन ॥ इच्छाम्यशक्त्यानत्विरू
पणेनहृदयमइत्यर्थः ॥ २४ ॥ अंगविदुरतत्रथापिहरेः कीर्तिंकीर्तयामियथाश्रुतंगुरुमुखात्तदपितस

यशोभगवतोजतेयुश्रूषायधर्मसिद्धये ॥ तस्माज्जातःपुरामृडोयहज्यात्तव्यते हरिः ॥ २१ ॥ एतेव
र्णाः स्वधर्मेणयजंतिस्वगुरुं हरिं ॥ श्रद्धयात्मविशुद्ध्यर्थंयज्जाताः सहवृत्तिभिः ॥ २२ ॥ एतत्क्षत्त
र्भगवतोदैवकर्मात्मरूपिणः ॥ कःश्रद्दध्यादुपाकर्तुंयोगमायावलोदयं ॥ २३ ॥ अथापिकीर्त
याम्यंगयथामतियथाश्रुतं ॥ कीर्तिंहरेःस्वांसत्कर्तुंगिरमन्याभिधासतीं ॥ २४ ॥ एकांतलाभंव
चसोनुपुंसांसुश्लोकमौलेर्गुणवादमाहुः ॥ श्रुतेश्चविद्वद्भिरुपाकृतायांकथासुधायामुपसंप्र
योगं ॥ २५ ॥ आत्मनोवसितोवत्समहिमाकविनादिना ॥ संवत्सरसहस्रान्तेधियायोगविपक्कया
॥ २६ ॥

वीतंत्रानाकिंतयथामतिस्वमत्यनुसारेण ॥ अन्याभिधाहविष्यतिरिक्तार्थाभिधानंतत्याअसतीम लिनां स्वी
यांवाचंसत्कर्तुंपवित्रीकर्तुं ॥ २५ ॥ एकांततोलाभंतन्निश्चितमाहुः श्रुतेःश्रोत्रस्यउपाकृतायांनिरूपितायांउ
पसंप्रयोगंसन्निधापयंतं ॥ २६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
२२

त्रिलोकोत्पत्तिमाह ॥ शीर्ष्णइति ॥ वृत्तयः परिणामाः ॥ २६ ॥ एतदेवप्रपंचयति द्वाभ्यां ॥ आत्यंतिकेनोर्जितेनपुण्यव
बहुक्लेषणेनयोगादिनाअवर्ततीतिपुण्यायोमनुष्याः तानन्वयेतदुपकरणभूतागवादयस्तेथस्वःप्रतिपेदिरे ॥ २७
तृतीयेनतमः जदीयेननामसेनउभयोर्द्यावापृथिव्योरंतरंमध्यंव्योमअंतरिक्षेनदेवभगवतोनाभिस्तमाश्रिताः
रुद्रपार्षदारुद्रस्यपार्षदाभूतादीनांगणाः ॥ २८ ॥ स्ववर्तेनप्रवृत्तेनब्रह्मवेदः यस्तुतन्मुखत्वान्मुखोद्भवत्वाद्वर्णानां
मुख्यः मुखमिवप्रथमोगुरुश्चाभूत सोपिमुखतोवर्ततेत्यनुषंगः ॥ अध्यापनादिनाब्राह्मणस्यवेदोवृत्तिः

शीर्ष्णोस्यद्यौर्धरापद्भ्यांखंनाभेरुदपद्यत ॥ गुणानांवृत्तयोयेषुप्रतीयंतेसुरादयः ॥ २६ ॥ आत्यंतिकेन
सत्वेनदिवंदेवाःप्रपेदिरे ॥ धरांरजःस्वभावेनपणयोयेचताननु ॥ २७ ॥ तार्तीयेनस्वभावेनभगवन्ना-
भिमाश्रिताः ॥ २८ ॥ उभयोरंतरंव्योमयेरुद्रपार्षदांगणाः ॥ मुखतोवर्ततब्रह्मपुरुषस्यकुरूद्वह
२९ ॥ यस्तून्मुखत्वाद्वर्णानांमुख्योभूद्ब्राह्मणोगुरुः ॥ २९ ॥ बाहुभ्योवर्ततक्षत्रंक्षत्रियस्तदनुव्रतः ॥ यो
जातस्त्रायतेवर्णान्पौरुषःकंटकक्षतात ॥ ३० ॥ विशोवर्तंततस्योर्वोर्लोकवृत्तिकरीर्विभोः ॥ वैश्य-
स्तदुद्भवोवार्तांनृणांयःसमवर्तयत ३१ ॥

तथाहृस्मासहमुखतोब्राह्मणोजातइत्यर्थः एवमुत्तरत्रवर्णेष्वपिज्ञातव्यम ॥ २९ ॥ तदनुपालनरूपावृत्तिः
तत्क्षत्रंअनुव्रतः अनुसृतः क्षत्रियोपिबाहुभ्योवर्ततेत्यर्थः तदनुव्रतत्वमेवाह ॥ यइति ॥ पौरुषः पुरुषस्यवि-
ष्णोरंशः कंटकाः चोरादयः तेभ्योयत्क्षतमुपद्रवस्तस्मात्त्रायतेरक्षति ॥ ३० ॥ विशः कृष्यादिव्यवसायः लोकस्य
वृत्तिकरीर्जीविकाहेतवः तस्यविभोरूर्वोः प्रवृत्ताः तदुद्भवऊरुजः वार्तांजीविकांयः स्वहस्तासंपादितवान ॥ ३१ ॥ २२

त्वचेचर्मणिओषधयः त्वगिंद्रियस्यैवस्थानभेदेनविषयद्वयंकंडूःस्पर्शश्चतत्रांशेनात्मभेदोदेवताभेदश्चेतिद्वितीय स्कंधएवव्याख्यातः १८ कः प्रजापतिः स्वर्पतिः वार्तयाक्रयविक्रयादिरूपयावृत्तिंजीविकां २१ विक्रियां

त्वचमस्यविनिर्भिन्नांविविशुर्धिष्ण्यमोषधीः॥ अंशेनरोमभिःकंडूंयैरसौप्रतिपद्यते॥ १८॥ मेढ्रंतस्य विनिर्भिन्नंस्वधिष्ण्यंकउपाविशत्॥ रेतसांशेनयेनासावानंदंप्रतिपद्यते॥ १९॥ गुदंपुंसोविनिर्भिन्नं मित्रोलोकेशआविशत्॥ पायुनांशेनयेनासौविसर्गंप्रतिपद्यते॥ २०॥ हस्तावस्यविनिर्भिन्नाविंद्रः स्वर्पतिराविशत्॥ वार्तयांशेनपुरुषोययावृत्तिंप्रपद्यते॥ २१॥ पादावस्यविनिर्भिन्नौलोकेशोविष्णुराविशत्॥ गत्यास्वांशेनपुरुषोययाप्राप्यंप्रपद्यते॥ २२॥ बुद्धिंचास्यविनिर्भिन्नांवागीशोधिष्ण्यमाविशत्॥ बोधेनांशेनबोद्धव्यंप्रतिपत्तिर्यतोभवेत्॥ २३॥ हृदयंचास्यनिर्भिन्नंचंद्रमाधिष्ण्यमाविशत्॥ मनसांशेनयेनासौविक्रियांप्रतिपद्यते॥ २४॥ आत्मानंचास्यनिर्भिन्नमभिमानोविशत्पदं॥ कर्मणांशेनयेनासौकर्तव्यंप्रतिपद्यते॥ २५॥ सत्वंचास्यविनिर्भिन्नंमहान्धिष्ण्यमुपाविशत्॥ चित्तेनांशेनयेनासौविज्ञानंप्रतिपद्यते॥ २६॥॥

संकल्पादिरूपं॥ २४॥ आत्मानमहंकारमभिमन्यतेऽनेनेत्यभिमानोरुद्रः॥ कर्मणामहंकृत्याकर्तव्यमिति क्रियां॥ २५॥ सत्वमितिबुद्धिचित्तयोरभेदेननिर्देशः॥ महानितिब्रह्मा चित्तेनचेतनया॥ २६॥॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र्वं श्लोकार्थो विवृणोति साध्यात्म इत्यादिना अध्यात्मादीनि इत्याणि तस्मादिनः विराडिति सर्वत्र ॥९॥ अध्यात्मादिभेदं प्रपंचयति
मारुत्स्मरन्निति ॥ विज्ञापितं यावद्विलिंगेन ज्ञरामेत्यादि स्वेन तेजसा चिच्छक्त्याग्रतपत् एवं कर्तव्यमीत्यालोचितवान्
यस्य तानमयं तत्पर्युतिष्ठ्वृतेः विवृत्तये विविधवृत्तिलाभाय ॥१०॥ मे गदतः शृणु ॥११॥ आयतनान्येवाह ॥ तस्याग्निरि

साध्यात्मं साधिदैवश्च साधिभूत इति त्रिधा ॥ विराट् प्राणो दशविध एकधा हृदयेन वा ॥९॥ स्मरन्विश्वसृ
जामीशो विज्ञापितमधोक्षजः ॥ विराजमतपत्स्वेन तेजसैषां विवृत्तये ॥१०॥ अथ तस्याभितप्तस्य कः
तिधायतनानि ह ॥ निरभिद्यंत देवानां तानि मे गदतः शृणु ॥११॥ तस्याग्निरास्यं निर्भिन्नं लोकपालोऽवि
शत्पदं ॥ वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यते ॥१२॥ निर्भिन्नं तालु वरुणो लोकपालोऽविशद्धरेः
जिह्वयांशेन च रसं ययासौ प्रतिपद्यते ॥१३॥ निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदं ॥ घ्राणेनां
शेन गंधस्य प्रतिपत्तिर्यतो भवेत् ॥१४॥ निर्भिन्ने अक्षिणी त्वष्टा लोकपालोऽविशद्विभोः ॥ चक्षुषांशेन
रूपाणां प्रतिपत्तिर्यतो भवेत् ॥१५॥ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् ॥ प्राणेनांशे
न संस्पर्शं येनासौ प्रतिपद्यते ॥१६॥ कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः ॥ श्रोत्रेणांशे
न शब्दस्य सिद्धिं येन प्रपद्यते ॥१७॥

त्यादि वक्तृदेवताभिः आस्यं निर्भिन्नं पश्यन्नात्मा पदं स्थानं स्वांशेन स्वप्राज्ञ्या वाचा सह प्राविशत् ॥ असौ जीवः वक्तव्यं
प्रतिपद्यते एवमुत्तरत्र यतो इत्यर्थः सर्वत्र यन्निर्भिन्नं तद्धिष्ण्यानं अग्न्यादि प्रथमांतमधिदैवं वागादि इंद्रियंतमो
ध्यानमध्यात्मं प्रतिपत्तव्यमधिभूतं ॥१२॥ हरेर्विराजः ॥१३॥ नासे अश्विनौ आदित्याः ॥ ॥ प्राणेनेति प्राणादेहव्यापिना

चेष्टारूपेण क्रियाशक्त्या कर्म तेषां क्रियाजीवानामदृष्टं च प्रबुद्धं कर्म क्रियाशक्तिर्येषां सः त्रयोविंशतेर्गणः दैवे- ने
श्वरेणा वोदितः मात्राभिरंशैरधिपूरुषं विराड्देहमजनयत् ॥४ जननमेवाह परेणेति परेणेश्वरेण विश्वसृजां तत्त्वानां गा॰
णः मात्रया चुक्षोभ परिणतः न तु सर्वात्मना यस्मिंल्लोकाः स्थिताः ॥५ स पुरुषः योऽधिपुरुषत्वेनोक्तः अण्डको॰
शे ब्रह्माण्डमध्ये सर्वैः सत्त्वैरुपष्ट यिभिर्जीवैः सहितः ॥६ गर्भः कार्यरूपो विराट् देवशक्तिः ज्ञानशक्तिः

सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणं ॥ भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥ ३ ॥ प्रबुद्धकर्मा दै
वेन त्रयोविंशतिको गणः ॥ प्रेरितोऽजनयत्स्वाभिर्मात्राभिरधिपूरुषं ॥ ४ ॥ परेण विशता स्वस्मिन्मात्र
या विश्वसृग्गणः ॥ चुक्षोभान्योन्यमासाद्य यस्मिंल्लोकाश्चराचराः ॥ ५ ॥ हिरण्मयः स पुरुषः सहस्र॰
परिवत्सरान् ॥ आण्डकोश उवासाप्सु सर्वसत्त्वोपबृंहितः ॥ ६ स वै विश्वसृजां गर्भो देवकर्मात्मश॰
क्तिमान् ॥ विबभाजात्मनात्मानमेकधा दशधा त्रिधा ॥ ७ ॥ एष ह्यशेषसत्त्वानामात्मांशः परमा॰
त्मनः ॥ आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ॥ ८ ॥

नयैकधा हृदयावच्छिन्नचैतन्यरूपेण कर्मशक्तिः क्रियाशक्तिः तया दशधा प्राणरूपेण प्राणादयः पंच नागः
कूर्मश्च कृकरो देवदत्तो धनंजयः ॥ इत्येते पंच ते च वृत्तिभेदेन दशविधः प्राणः आत्मशक्तिर्भोक्तृशक्तिः सा॰
या अध्यात्मादिभेदेन त्रिधात्मानं विभक्तं कृतवान् ॥ ७ ॥ एवं विभागसामर्थ्ययोग्यस्योत्कर्षमाह एष हीति
अशेषसत्त्वानां आत्मा वा ह्यीनां तदंशावतात् ॥ अंशो जीवश्च अवतारस्त्वोक्तिः तस्मिन्नारायणे विश्वीवाभिप्राये ए ८

प्राणिनां॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ३

अथ सर्वे वयं अस्माकं पश्चात्कार्यो पायोनां जीवानां वृत्तिः पर्यवसानीयान नकार्यादित्याहुः नोस्माकं सान्वयानां सकार
र्यणां यद्यप्यन्येनोत्पन्नत्वयः ॥ कारणानां महत्तानां त्वमेवाद्यः कारणं ॥ अत्र हेतवः ॥ कूटस्थ अविक्रियः अतएवादिपुरा
णः पुरातनः ॥ यतउपपादयति त्वमिति ॥ हे देव अज एव त्वं गुणानां सत्वादीनां कर्मणां जन्मादीनां च योनौ कारणभूता
यां शक्तौ मायायां प्रथमं रेतः आदधे आहितवानसि अयं च ॥ कोऽसौ एकविंसर्वं नेन महत्तत्त्वं ॥ ४९ ॥ ततो हे आत्मन् देव त्व
मत्प्रमुखा महदादयो यदर्थं बभूविम ॥ ततः किं ते कार्यं करवाम सृष्टिमिति चेदित्याहुः त्वं हि तस्मात् स्वचक्षुः
ज्ञानं शक्त्या सह परिदेहि प्रयच्छ ॥ यस्मात्त्वत्त एव अनुग्रहो येषां ते यदनुग्रहास्तेषामस्माकं क्रियार्थं इयाने ता

त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः ॥ त्वं देव शक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कवि
मादधेऽजः ॥ ४९ ॥ ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्करवाम किं ते ॥ त्वं नः स्वचक्षुः परिदेहि शक्त्या
५१ देव क्रियार्थे यदनुग्रहाणां ॥ ५० ॥ इति श्रीभागवते तृतीयस्कंधे पंचमोध्यायः ॥ ५ ॥ ऋषिरुवाच ॥ इति ता
सां स्वशक्तीनां सतीनामसमेत्य सः ॥ प्रसुप्तलोकतंत्राणां निशाम्य गतिमीश्वरः १ कालसंज्ञां तदा दे
वीं बिभ्रच्छक्तिमुरुक्रमः ॥ त्रयोविंशति तत्त्वानां गणं युगपदाविशत् ॥ २ ॥ ॥ ॥

तानत्र अनुग्रहो येषां अस्मिल्लोके वा पदं त्वदीयं तान क्रियाशक्तिभ्यामेव वयं स्रष्टुं समर्था नानायेत्यर्थः ॥ ५० ॥ इति श्रीभावा
र्थे तृतीये पंचमोध्यायः ॥ ५ ॥ षष्ठे तु ईश्वराविष्टैः सृष्टिमाह विराट् ततो आधिदैवादिभेदं च तत्रैव भगवत्कृतं
स्वशक्तीनां महदादीनां असमेत्य अमिलित्वा स्थितानां प्रसुप्तलोकतंत्रं विश्वरचनायां सा ॥ यद्वा प्रसुप्तं जीव
वोपकरणानां गतिं स्थितिं दृष्ट्वा आविशदित्युत्तरेणान्वयः ॥ १ ॥ कालेन संज्ञानं बोधो यस्याः कालयति क्षोभयति
स्वकार्योन्मुखी करोतीति वा कालसंज्ञा प्रकृतिः तां शक्तिं प्रकृत्या सह प्रवेश पञ्चत्रयोविंशति तत्त्वानां इत्युक्ते अन्तर्यामितया आवि

॥ ९ ष्ठ २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पतन्देवस्फुरयति पानेनेति वैराग्यसारो वलेयस्य बोधस्य तं लब्ध्वा अवी पुरुषाः सुयुः ॥ अकुंठधिष्ण्यं वैकुंठलोकं ॥ ४५
आत्मनि समाधिः मनः स्थैर्यं स एव योगः उपायः तस्य बलेन ज्ञानयोगातः ॥ श्रमेणामोहः सत्संगतः ॥ त्वत्कथाश्रवणा१
दि नाम्नवनायासेनैव अहंममतानिष्ठानीतकर्यद्विदिति भावः तदेवं त्वत्प्राप्तिर्यत्नेचतत्रभिः तत्र त्वमात्रे हैश्चायतेवदी१
यावयं ॥ यस्माल्लोकानां त्वत्सृष्टयान्वया अत्रत्वत्सृष्टाः क्रमेणोत्पादिताः त्रिभिरात्मभिः सत्वादिस्वभावैः ॥ अत एवविरुद्ध
स्वभावत्वादि पृथक्ताः सन्तः यदर्थं सृष्टाः ॥ तत्त्वविहारतंत्रं त्वक्रीडोपकरणं ब्रह्मांडं तेन त्वभ्यं प्रतिहर्तुं समर्पयितुं न शक्नुमः
तू १
प्रतिहर्त्तवे १

कू २

पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये ॥ वैराग्यसारं प्रतिलभ्य बोधं यथांजसान्वीयुरकुंठधि
ष्ण्यं ॥ ४५ ॥ तथापरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठां ॥ त्वामेव धीराः पुरुषं विशंति तेषां श्रमः
स्यान्न तु सेवया ते ॥ ४६ ॥ तत्ते वयं लोकसिसृक्षयाद्य त्वयानुसृष्टास्त्रिभिरात्मभिः स्म ॥ सर्वे वियुक्ताः स्वविह
हारतंत्रं न शक्नुमस्तत्प्रतिहर्तवे ते ॥ ४७ ॥ यावद्बलिं तेज हराम काले यथा वयं चान्नमदाम यत्र ॥ यथो
भयेषां त इमे हि लोका बलिं हरंतोन्नमदंत्यनूहाः ॥ ४८ ॥

अतस्तं नः ॥ सर्वदः यदि देहीति चेत् प्राणिनां लोकानां च तत्र यैनानवयः ॥ ४७ ॥ असामर्थ्यमेव स्पष्टयति तं कार्यं स्यादिति वैविध्य
माहुः ॥ भो अज काले तत्तदवसरे बलिं भोग्यं यावत्त्वं स्वाकल्पेन तेन हराम समर्पयामः ॥ यथा येन प्रकारेणान्नमदा
म भक्षयाम तत्र तेनान्नमात्रमस्माकमेष्वर्येणातु भोगास्तु वै वेद्युतं ॥ उभयेषां तवास्माकं च यत्र स्थिता इमे जीवा अन्नूहा
अप्रमत्ताः निर्विघ्नाः ॥ यद्वा अन्नूहा अवितर्काः निःसंशया याश्चर्थः तथा च श्रुतिः ॥ तापत्रमद्भुवन्नाश्चायतनं नः प्रजा
नोद्विग्यस्मित्यतिष्ठिताश्च अन्नमदामेति ४८ ॥

श्री भाग. टी. ११

न तु विषयाकृष्टचित्तानां कथमस्य दर्शनं ॥ तत्राहुः यच्छ्रद्धयाहृदये ग्रवधार्य ध्यानाद्वैराग्यबलेन यस्येन ज्ञाते न धीरा भवंति सरागो विजेष्यान मेव कृतः ॥ श्रद्धया श्रवणादि विकयाभक्त्या संमृज्यमाने शोध्यमाने ॥ ४१ ॥ भक्तयाद्युग्रं रूंसदेव श्राकृः विष्णुरेषेति ॥ ४२ ॥ अंतर्यामि नयानियंत्र सन्निहितेऽनर्थकं व्रजंतमित्याशंक्याहुः यदिति ॥ सा तु वं येनोपकर्षे प्रसति तत्के स्युपुर्यो देहएव सद्रूदंडप्राप्यं ॥ ४३ ॥ न तु यदि दृढदिस्य सा पिय द्वयं के षांचित्स्वहृदंत तर्हि अन्येषामपि त एव स्यात् ॥ अविशेषादित्याशंक्याहुः नातितिप्रसहृतिभिः वहिर्मुखैरविशिमिंद्रियैः ॥ परादृञ्जते हृत्य यहृजन्मंततःस्य

ॐ यच्छ्रद्धयावृक्षानसर्वभक्त्यासंमृज्यमाने हृदयेवधार्य ॥ ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेंघ्रिसरोज पीठं ॥ ४२ ॥ विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते ॥ व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसां ॥ ४३ ॥ यत्सानुबंधेसति देहगेहे ममाहमित्यूढदुराग्रहाणां ॥ पुंसां सुदूरे वसतोपि पुर्यां भजेम तत्ते भगवन्पदाब्जं ॥ ४४ ॥ तान्वा असदृत्तिभिरक्षिभिर्ये पराहृतांतर्मनसः परेश ॥ अथो न पश्यंत्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ॥ ४५ ॥ ५ ॥ श्री ॥

सतो येषां ते ॥ अथो न पश्यंते नूनं ते न पश्यंतीति वैशमिदं ॥ कुतः पुनस्तेषां तत्संगः स्यात् ॥ कान् ते न वपदन्यासः यासनं तस्याविलासो विभ्रमः तस्य लक्ष्मीः शोभा तस्या येन लीलाकथादिभिः ॥ शोभमानाः तं अकान् नित्यर्थः ॥ पदन्यासविलासलक्ष्म्याः पाठे तन्न्यादयासविलासोलक्षणो येषां तान्यथः ॥ त्वन्मार्गभूतान्सतो मार्गो वा श्रवणादी त्र पश्यंतीत्यर्थः यद्वा यदेवं भूता भागवता स्ते नात्मन्नतान् ते नैव पश्यंतीत्यन्वयः ॥ सत्संगाभावेन हरिकथाश्रवणाभावाद्धृदिस्थितमपि तेषां सुदूरमिति भावः ॥ ४५ ॥ श्री ॥ श्री ॥ श्री ॥

२५

श्रियः सर्षिभिस्सवो देवानभिलंतः परस्परं विप्रवकर्म त्यन्तीप्रानां तिविस्ताहृहरिमीडिरे ॥ प्रपन्नानां तापोपशमे आतप-
त्रं छत्रं ॥ तत्र हेतुः यस्य पदारविंदस्य मूलं केतनं ॥ केतन आश्रयो येषां ते बहिरुत्क्षिपंति परित्यजंतीति ॥ २७ ॥ यथार्थं पृथाः
स्वपदृष्टप्राप्यमार्गाश्रमपि वृक्षमंविनिरदेवयंतत्राहुः ॥ हेधातः पितः यद्यस्मात् भवे संसारे आत्मन् त्रितिआत्मनि सं-
वीयं तेवा ॥ शर्म सुखं न लभंते यदिति पाठे ॥ यत्पादमजनं ते वृत्ताश्च शर्म न लभंते ॥ न तु तावता दत्तान हृतं तत्तापो निवर्तते किं
मदंघ्रिच्छायाश्रयणेन तत्राहुः सविद्यां तद्याश्रयणमेव विद्याप्रापकमित्यर्थः ॥ २८ ॥ अत्तान स्याश्रयणे योगान्नगुः

देवा ऊचुः ॥ नमाम ते देव पदारविंदं प्रपन्नतापोपशमातपत्रं ॥ यन्मूलकेता यतयोंऽजसोरुसंसारदुःखं ब-
हिरुत्क्षिपंति ॥ २७ ॥ धातर्यदस्मिन्भव ईश जीवास्तापत्रयेणाभिहता न शर्म ॥ आत्मंल्लभंते भगवंस्त-
वांघ्रिच्छायां सविद्यामत आश्रयेम ॥ २८ ॥ मार्गंति यत्ते मुखपद्मनीडैश्छंदस्सुपर्णैर्ऋषयो विविक्ते ॥ य-
स्याघमर्षोदसरिद्वरायाः पदं पदं तीर्थपदः प्रपन्नाः ॥ ४ ॥ ॥ ॥

तमाश्रयेमाहुः ॥ मार्गंति अन्वेषयंति ॥ यत्तीर्थपदस्तव पदं वयं प्रपन्नाः कैः मार्गंति छंदःसुपर्णैः वेदपक्षिभिः
तैवेवमुखपद्मनीडं येषां ॥ यथा पक्षिणो नीडादुत्थाय ततस्ततः परिक्रम्य पुनस्तत्रैव विशंति ॥ तथा वेदा अ-
पि त्वन्मुखादुत्थाय सर्वत्र परिक्रम्य त्वय्येव पर्यवस्यंति ॥ अतो वेदानाश्रित्याऽपि त्वत्पदं मृगयंतीति ॥ विविक्ते असंगे मनसि ॥ किं-
चाघमर्षं अघनाशकमुदकं यस्याः सा सरिद्वरा गंगा यस्याः पदं मंगलमस्थाने ॥ अतो गंगामसेवमाना अपि

श्री
भाग
टी०
७८

तैजसान्वैकारिकाच्च यः तान् मया नंशान्निकजवर्गं का मा भूदित्येवकारः तामसोभूतसूक्ष्मस्पर्शाद्रूपादिकारणं ॥ यतः
शब्दात् नभसा काशं भवति ॥ आत्मनो लिंगं स्वगुणं प्रवृत्त्येण प्रकाशके हृदयाकाशतयाच ॥ यद्वा लिंगं शरीरं
आकाशशरीरं ब्रह्मेति श्रुतेः ॥ २१ ॥ नभसः सकाशादनुसृतं स्पर्शं विकुर्वन्नुत्तरोत्तरमानयत् ॥ एवं सर्वत्र तत
न्मात्रद्वारा भूतोत्पत्तिरिति ज्ञातव्यं ॥ २२ ॥ नभसा सहितः स्पर्शवान्वायुः बलान्वितः ततो ज्योतिः लोचनं प्रकाशकं
२३ ॥ २४ ॥ २५ ॥ इत्यन्वयविदुः ॥ पाठांतरे भावे कार्यं ॥ यद्यद्वरमवरं कार्यं तेषां कार्याणाम् यैः कारणैः ॥ अन्वसंसर्गा

तैजसानींद्रियाण्येवज्ञानकर्ममयानि वा ॥ तामसोभूतसूक्ष्मादिर्यतः खं लिंगमात्मनः ॥ २१ ॥ काल
मायांशयोगेन भगवद्वीक्षितं नभः ॥ नभसोनुसृतं स्पर्शं विकुर्वन्निर्ममेनिलं ॥ २२ ॥ अनिलोपि विकुर्
वाणो नभसोरुबलान्वितः ॥ ससर्जरूपतन्मात्रं ज्योतिर्लोकस्य लोचनं ॥ २३ ॥ अनिलेनान्वितं ज्योति
र्विकुर्वत्परवीक्षितं ॥ आधत्तांभो रसमयं कालमायांशयोगतः ॥ २४ ॥ ज्योतिषांभोनुसंसृष्टं विकुर्वद्ब्र न
ह्मवीक्षितं ॥ महीं गंधगुणामाधात्कालमायांशयोगतः ॥ २५ ॥ भूतानां नभआदीनां यद्यद्भव्यावरावरं
तेषां परानुसंसर्गाद्यथासंख्यं गुणान्विदुः ॥ २६ ॥ एते देवाः कला विष्णोः कालमायांशयोगिनः ना
नात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुं ॥ २७ ॥

दन्वयात् यथासंख्यं यथाक्रमं ॥ उत्तरोत्तरमधिकान् गुणान्विदुः ॥ तथाहि नभसः शब्द एव गुणः अन्वयाभावा
त् वायोस्तु शब्दस्पर्शौ आकाशान्वयाद्धेतुः ॥ एवं तेजसस्त्रीन् रूपं च अपां चत्वारि भूम्याः पंच ॥ सर्वे देवा महदादयः
अभिमानिनः विष्णोः कलांशाः कालं लिंगं विकृतिः मायालिंगो विक्षेपः ॥ अंशो लिंगं चेतनानानात्वाद्विद्यते येषु
अतः समस्तेन नानात्वात् परस्परसंबंधात् ॥ स्वक्रियायां ब्रह्मांडरचनायाम् अनीशा असमर्थाः संतो विभुं एवमेवं

॥ श्रीभा० टी० ७८

कालप्रेरितादव्यक्तात्प्रायातः तत्त्वपदं परित्यज्य महतो लक्षणं ॥ अतः पुंलिङ्गनिर्देशो विज्ञानात्मेति सत्त्वप्रधा
नत्वात् स्वदेहस्थं विश्वं व्यंजन् ॥ बीजगतिमंकुरादिरूपं वृत्तमिव प्रकाशयन् ॥ तमोनुदतीति तमोनुदः ॥ तदुक्तं धं२
सात्वततंत्रे ॥ विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः ॥ प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं ॥ तृतीयं
सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते इति ॥ २३ ॥ अहंकारोऽस्मिन्निमामहसार्धं भूतो ॥ सोऽपीति ॥ अंशाः चिदाभासो नि
मित्तं ॥ गुणाः उपादानं कालः क्षोभकः ॥ तदधीनो भगवानीर्वीक्षतः ॥ तद्दृष्टिगोचरः सन्स्वयमात्मानं व्यकरो

का२

ततोऽभवन्महत्तत्त्वमव्यक्तात्कालचोदितात् ॥ विज्ञानात्मात्मदेहस्थं विश्वं व्यंजंस्तमोनुदः ॥२३
सोऽप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः ॥ आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया ॥
२४ ॥ महत्तत्त्वाद्विकुर्वाणादहंतत्त्वं व्यजायत ॥ कार्यकारणकर्त्रात्मा भूतेंद्रियमनोमयः ॥ २४ ॥ वै
कारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ अहंतत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत् ॥ २५ ॥ वैका
रिकाश्च ये देवा अर्थाभिव्यंजनं यतः ॥ २६ ॥ ॥

त ॥ रूपांतरमन्वयम् ॥ २४ ॥ अहंकारस्य लक्षणमाह ॥ कार्यमधिभूतं कारणमध्यात्मं कर्ताधिदैवं
तेषामात्मा आश्रयः ॥ अत्र हेतुः भूतेंद्रियमनोमयः तद्विकारत्वेन मनइति ॥ देवानामप्युपलक्षणं ॥ २४ ॥ प
तदेव विभागतः प्रपंचय ति ॥ वैकारिक इत्यादिना ॥ वैकारिकः सात्त्विकः तैजसो राजसः ॥ देवाश्च वैकार
रिकाः कार्यभूता इत्यर्थः ॥ यतो येभ्य इंद्रियाधिष्ठातृभ्य अर्थाभिव्यंजने ज्ञानादिप्रकाशो भवति ॥ २५ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नान्यत् द्रष्टृदृश्यात्मकं किंचिदासीत् कारणात्मना सत्त्वेपि पृथक्प्रतीत्यभावादित्याह भगवानात्मनामनुप लक्षणः ३

किंच भवानिति ज्ञानः यस्य ज्ञानोपदेशाय मामादिष्टवान् तं कारणात्स्वयमपि स्मृत्यैवोपदिष्टवानिति ॥२१॥ विश्वस्थित्याद्यर्था योगमायया संभृताः ॥२२॥ तत्र सृष्टिलीलां वर्णयितुं पुनः सर्वावस्थामाह ॥ इदं विश्वमग्रे सृष्टेः पूर्वमेव परमात्मानमात्मना भगवानेक एव आस आसीत् आत्मनां जीवानामात्मा स्वरूपं विभुः स्वामी च नानाद्रष्टृदृश्यादिमतिभिर्नोपलक्ष्यत इति तथा । यद्वा प्रकारद्वयं दर्शयन्नेवायमर्थः ॥ यः सृष्टौ नानामतिभिरुपलक्ष्यते ॥ स तदा एक एवासीदिति कुत आत्मेच्छा मायया तस्यानुगतौ लये सति यद्वा आत्मन एकाकित्वेनावस्थाने इच्छायामनुवर्तमानायामित्यर्थः

भवान्भगवतो नित्यं संमतः सानुगस्य च ॥ यस्य ज्ञानोपदेशाय मादिशद्भगवान्प्रभुः ॥२१॥ अथ ते भगवल्लीला योगमायोपबृंहिताः ॥ विश्वस्थित्युद्भवान्तार्था वर्णयाम्यनुपूर्वशः ॥२२॥ भगवानेक आसेदमग्र आत्मात्मनां विभुः ॥ आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः ॥२३॥ स वा एष तदा द्रष्टा नापश्यद्दृश्यमेकराट् ॥ मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक् ॥२४॥ सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका ॥ माया नाम महाभाग ययेदं निर्ममे विभुः ॥२५॥ कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः ॥ पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ॥२६॥

२३ तत्र प्रथमं मायोद्भवप्रकारमाह द्वाभ्यां स वै द्रष्टा सन् दृश्यं नापश्यत् ॥ यत एकराट् एक एव तस्मिन्समये प्रकाशते अतः असंतमिव मेने दृश्याभावे द्रष्टृत्वाभावात् तदाह सुप्ता मायायाः शक्तयो यस्य सः ॥ न त्वसंतमिव मेने सुप्तदृक् अलुप्तज्ञानः कचित् चिच्छक्तिर्यस्येति ॥२४॥ सा वै द्रष्टुर्दृश्यानुसंधानरूपा सदसदात्मिका कार्यकारणरूपा ॥ यद्वा सद् दृश्यम सत् अदृश्यं आत्मस्वरूपं तयोरात्मा यस्यास्तदुभयानुसंधानरूपत्वात् ॥२५॥ कालवृत्त्या कालशक्त्या गुणमय्यां क्षोभितगुणायां मायायामधोक्षजः परमात्मा आत्मांशभूतेन पुरुषेण प्रकृत्यधिष्ठात्रा रूपेण वीर्यं चिदाभासमा

यानि२ तानिकर्माणिविस्ताराद्वद २

श्रीकृष्णस्यकथाकथनीयेत्याशयेनाह सइति योविश्वसर्गाद्यर्थंगृहीतशक्तिः सएवपुरुषेषुकृतावतारः सन्पुरुषानतिक्रम्यवर्तमानानिचकार पुंसांनिःश्रेयसमेवार्थःप्रयोजनंतेनहेतुनापृष्टःबहुमानमेवाह ६
साधुपृष्टमितिपंचभिः अधोक्षजएवात्माआश्रयोयस्यतस्यात्मनःस्वस्यकीर्तिंचप्रसंगाद्वितन्वता ॥१८॥ हरिर्येदृशी
नी।

सविश्वजन्मस्थितिसंयमार्थेकृतावतारःप्रगृहीतशक्तिः ॥ चकारकर्माण्यतिपूरुषाणियानीश्व
रःकीर्तयतानिमह्यं ॥१६॥ श्रीशुकउवाच ॥ एवंभगवतापृष्टःक्षत्त्राकौषारविर्मुनिः ॥ पुंसांनिःश्रेय
सार्थेनतमाहबहुमानयन् ॥१७॥ श्रीमैत्रेयउवाच ॥ साधुपृष्टंत्वयासाधोलोकान्साध्वनुगृह्णता
कीर्तिंवितन्वतालोकेआत्मनोधोक्षजात्मनः ॥१८॥ नैतच्चित्रंत्वयिक्षत्तर्बादरायणवीर्यजे ॥ गृहीतोनन्य
भावेनयत्त्वयाहरिरीश्वरः ॥१९॥ मांडव्यशापाद्भगवान्प्रजासंयमनोयमः ॥ भ्रातुःक्षेत्रेभुजि
ष्यायांजातःसत्यवतीसुतात् ॥२०॥

ननुबादरायणवीर्यजोधृतराष्ट्रोपिभवतिपरंतुत्वयिविशेषइत्याह गृहीत नइति १
तःएतच्चित्रंनभवति कुतोबादरायणवीर्यजे ॥१९॥ तर्हिकथंशूद्रत्वंकथंचलोकानुग्राहकत्वंतत्राह मांड
व्यशापादिति भ्रातुर्विचित्रवीर्यस्यक्षेत्रेक्षेत्रत्वेनस्वीकृतायांभुजिष्यायांदास्यांयमएवत्वंजातोसि ॥२०॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
९६

महाभारतस्याप्येवं तात्पर्यमित्याह ॥ मुनिः श्रीकृष्णो वेदव्यासः भगवद्गुणान्मोक्षधर्मान्नारायणीयाख्याने वक्तुमि-
च्छुः सन् ॥ पुरुषार्थकामादिवर्णनेन तद्द्वारिकथायां तन्मतिप्रवेशार्थमेवेत्याह ॥ यस्मिन्निति ॥ नृणां मतिः ग्राम्यसुखानुवादैः
हास्यैस्तैः नु निश्चितं ॥ हरेः कथायां गृहीता नीता ॥ तदुक्तमितिहाससमुच्चये कामिनो वर्णयन्कामं लोभं लुब्धस्य व-
र्णयन् ॥ नरः किं फलमाप्नोति कूपेऽन्धमिव पातयन् ॥ लोकचित्तावतारार्थं वर्णयित्वा ततस्ततो इतिहासैः पवित्रार्थैः पु-
नरेवं निरूपितो ॥ अन्यथा घोरसंसारबन्धहेतुजनस्य तान्वर्णयेत्स कथं विद्वान्महाकारुणिको मुनिरिति ॥ १२ ॥ हरिका-

व्यासः

मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः ॥ यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः
कथायां ॥ १२ ॥ सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः ॥ हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखा-
प्ययमाशु धत्ते ॥ १३ ॥ तान्शोच्यशोच्यानविदोऽनुशोचे हरेः कथायां विमुखानघेन ॥ क्षिणोति देवोऽनिमिष-
स्तु येषामायुर्वृथावादगतिस्मृतीनां ॥ १४ ॥ तदस्य कौषारव शर्मदातुर्हरेः कथामेव कथासु सारं ॥ उद्धृत्य पु-
ष्पेभ्य इवार्तबन्धो शिवाय नः कीर्तय तीर्थकीर्तेः ॥ १५ ॥

थायां मतिप्रवेशस्य फलमाह ॥ सा कथा मतिर्वा ॥ अन्यत्र ग्राम्यसुखे ॥ ततः किमत आह ॥ हरेरिति ॥ १३ ॥ एवंभूतायां कथा-
यां ये न रमन्ते ॥ तान्शोचति शोच्या ये तेषामपि शोच्यांस्तत्त्वाविदः भारततात्पर्यानभिज्ञान्शोच्यान् ॥ येन तु ता हरेः
कथायां विमुखाः तानघेन अपि शोच्यानिति ॥ अनिमिषः कालो येषामायुः क्षपयति ॥ अघहेतुः वृथैव वार्तादि-
स्मृतयो वाग्देहमनोव्यापाराः येषां ॥ १४ ॥ तत्तस्मात् हे कौषारव ॥ अस्य विश्वस्य शिवाय कथासु सारभूतां हरेः कथामेवो-
द्धृत्य नः कीर्तय यथा पुष्पेभ्यो मधु मधुप उद्धरति तद्वदुद्धृत्य ॥ १५ ॥ ९६

योयं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पुनर्विशेषं प्रभुर्मोक्षकामो विधत्तेऽति ॥ सप्तलोकाः प्रणयकीर्तयः तेषां मौलिरिवाधिकेन विराजमानः तस्येत्यर्थः लो
कनाथाधिपतिः ॥ अलोकालोकालोकपर्वता हरिगीतान ॥ अचीक्लृपत्कल्पयामास ॥ यत्र येषु सर्वाणि यानि स
त्त्वानि तेषां भेदः ॥ तत्र कर्माधिकारी आश्रित इति वा ॥ ८ ॥ उत्पाद्य येन प्रकारेण प्रजानां जीवानामात्मस्वभावं त
त्कृतं रूपं तत्कृता अभिधाः तासां भेदं कृतवान् ॥ विश्वसृष्टा स्वयमात्मयोनिः स्वतःसिद्धः ॥ ९ ॥ तत्र महाभारते त

तेषां निका याः ३

तत्कृतं कर्म

मनो न तत्प्रत्ययपि प्रणवतां नः सप्तलोकमौले सुरितामृतानि ॥ येऽलं त्वभेदे धिल्लोकनाथो लोकानलो
कान्सहलोकपालान् ॥ ॥ अचीक्लृपद्यज्ञहविः सर्वसत्त्वनिकायभेदोऽधिकृतः प्रतीतः ॥ ८ ॥ येन प्रजाना
मुत आत्मकर्मरूपाभिधानो च भिदाविधत्ते ॥ नारायणो विश्वसृगात्मयोनिरेतत्त्वनो वर्णय विप्रवर्य ॥ ९ ॥
परावरेषां भगवद्व्रतानि श्रुतानि मे व्यासमुखादभीक्ष्णं ॥ अतृप्नुम क्षुल्लसुखावहानां तेषामृते कृष्णक
कथामृतौघात् ॥ १० ॥ कस्तृप्नुयात्तीर्थपदोऽभिधानात्सत्रेषु वः सूरिभिरीड्यमानात् ॥ यः कर्णनाडीं पु
रुषस्य यातो भवप्रदां गेहरतिं भिनत्ति ॥ ११ ॥

यासर्वेषु कृतमेव तत्राह ॥ परे वैवर्णिकाः अवरे मन्वादयः तेषां व्रतानि धर्माः मे मया अभीक्ष्णं पुनः पुनः तेषां श्रवणे
नातृप्नुम तृप्ताः स्म तेषां तत्क्षुल्लसुखावहत्वात् ॥ यस्मात्तत्र श्रीकृष्णकथामृतौघः स्रवितः तस्मात्तेन तत्वतः स्वबुद्धितो
लीनत्वर्थः ॥ १० ॥ तदेवाह कस्तृप्नुयात्तीर्थपदः कृष्णस्य अभिधानात्कथामृतात् ॥ सत्रेषु समाजेषु सूरिभिर्नारदादि
भिः ॥ ११ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी २५

प्रश्नानेवाह ॥ तैः कर्मभिः सुखं चान्यस्य दुःखस्योपशमं वेत्यर्थः ॥ अथवा अन्यद्दानं विंदते ॥ किं तर्हि तस्य पेक्षायां न तैः सुखं निर्दे
शः उपारमं चेति ॥ ततः तैः कर्मभिः पुनः पुनर्दुःखमेव विंदेत ॥ अत एवं विधे संसारे नोस्माकं यद्युक्तं कर्तव्यं तत्सर्वे नो भ
गवान् वदेत् निरूपयतु ॥ २ ॥ दैवात्प्राचीनात्कर्मणो निमित्तभूतात्कस्माद्विमुखस्यातो अधर्मशीलस्यातः सुदुःखितस्य ज
नस्यानुग्रहाय भव्यानि मंगलानि भवंतः परोपकारस्वभावा एवेत्यर्थः ॥ ३ ॥ तत्तस्मात् हे साधुवर्य शं सुखरूपं नः आदिश
कथय येन कर्मणा संराधितो हृदि स्थितः सन् ॥ तत्त्वाधिगमं आत्मापरोक्ष्यं तत्सहितं पुराणं च अनादि वेदप्रमाणकं

विदुर उवाच ॥ सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा ॥ विंदेत भूयस्तत एव दुःखं यदत्र
युक्तं भगवान्वदेन्नः ॥ २ ॥ जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ॥ अनुग्रहायेह चरंति
नूनं भूतानि भव्यानि जनार्दनस्य ॥ ३ ॥ तत्साधुवर्यादिश वर्त्म शं नः संराधितो भगवान्येन पुंसाम् ॥ हृदि स्थितः
यच्छति भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणम् ॥ ४ ॥ करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्य
धीशः ॥ यथा ससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ॥ ५ ॥ यथा पुनः स्वे ख इदं निवेश्य शेते गु
हायां स निवृत्तवृत्तिः ॥ योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथासीत् ॥ ६ ॥ क्रीडन्विधत्ते द्विजगोसु
राणां क्षेमाय कर्माण्यवतारभेदैः ॥ ७ ॥

४ ॥ करोति कर्माणीत्यादिना वर्णयति ॥ पंचमश्लोके क्रियासंबंधः ॥ यथा येन प्रकारेण प्रकृतस्वरूपेण कृतावतारः ॥ ८ ॥
सन् ॥ त्रिगुणमायानियंता अतः स्वतंत्र एव यानि कर्माणि करोति ॥ ५ ॥ कर्माण्येव विशेषतः पृच्छति यथेत्यादिना
निरीहो निष्क्रियोपि निःस्पृहो वा संस्थाप्य सुस्थितिं कृत्वा वृत्तिं जीविकां ॥ ५ ॥ स्वीये स्वे हृदये आकाशे निवेश्य स्थापयित्वा
निवृत्ता वृत्तयो यस्य गुहायां योगमायायां बहुधा ब्रह्मादिरूपेण ॥ ६ ॥ मत्स्याद्यवतारभेदैः क्रीडन्यानि यथा कर्माणि वि

अध्याय ५

स्कं ३ २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मय्युद्धवरतेसतितस्यानमर्हतीतितानयोग्योभवति ॥ ३० ॥ मत्तःसकाशादीषदपिन्यूनोनभवतियद्यस्मात् गुणैर्नर्दितोभिभूतः
मद्वयुनं मद्वयुनंमज्ज्ञानंलोकस्योपदिशन् ॥ ३१ ॥ एवमनेनाभिप्रायेणशब्दयोनिनाब्रह्मणकर्त्राईजेपूजयामास ॥ ३२ ॥ पशुतुल्या
नांविक्लवात्मनामधीरचित्तानां ॥ ३४ ॥ मनसेक्षितंवीक्षितं ॥ ३५ ॥ कालिंद्याःसकाशात्सिद्धएवविदुरःकतिपयैर्दिनैः
स्वःसरितंगंगांप्रापयत्प्राप्तः ॥ ३६ ॥ इतिश्रीभावार्थदीपिकायांतृतीयेचतुर्थः ॥ ४ ॥ पंचमेमहत्वह्लीलांतत्राः

अस्माल्लोकादुपरतेमयिज्ञानंमदाश्रयं ॥ अर्हत्युद्धवएवाद्धासंप्रत्यात्मवतांवरः ॥ ३० ॥ नोद्धवोण्वपिमन्न्यू
नोयद्गुणैर्नार्दितःप्रभुः ॥ अतोमद्वयुनंलोकंग्राहयन्निहतिष्ठतु ॥ ३१ ॥ एवंत्रिलोकगुरुणासंदिष्टःश
ब्दयोनिना ॥ बदर्याश्रममासाद्यहरिमीजेसमाधिना ॥ विदुरोप्युद्धवाच्छ्रुत्वाकृष्णस्यपरमात्मनः ॥ क्रीड
योपात्तदेहस्यकर्माणिश्लाघितानिच ॥ ३३ ॥ देहन्यासंचतस्यैवंधीराणांधैर्यवर्धनं ॥ अन्येषांदुष्करतरं
पशूनांविक्लवात्मनां ॥ ३४ ॥ आत्मानंचकुरुश्रेष्ठकृष्णेनमनसेक्षितं ॥ ध्यायन्गतेभागवतेरुरोदप्रेमविह्व
लः ॥ ३५ ॥ कालिंद्याःकतिभिःसिद्धअहोभिर्भरतर्षभ ॥ प्रापद्यतस्वःसरितंयत्रमित्रासुतोमुनिः ॥ ३६ ॥
इतिश्रीभागवतेतृतीयस्कंधेचतुर्थोध्यायः ॥ ४ ॥ श्रीशुकउवाच ॥ द्वारिद्युनद्याऋषभःकुरूणांमैत्रेय
मासीनमगाधबोधं ॥ क्षत्तोपसृत्याच्युतभावशुद्धःपप्रच्छसौशील्यगुणाभितृप्तः ॥ १ ॥ ॥ श्रीः ॥

एवंसमहामुनिः ॥ प्रोवाचमहदादीनांसर्गंतेषुहरेःस्थितिं ॥ उक्तःचतसृभिरध्यायैःक्षत्तृमैत्रेयसंगमः ॥ संवादस्तु
तयोःस्कंधेदशद्वयेनाथनिरूप्यते ॥ द्युनद्यागंगायाद्वारिहरिद्वारेआसीनंक्षत्ताकर्मव्यग्रतत्रदेहेतदगाधो परिच्छिन्नोबोधोयस्य
स्यतिमैत्रेयस्यसौशील्यमार्जवादिगुणास्तैःकरुणादयःतैरभितृप्तःप्राप्तंतंतस्मिन्नतिसंततहेमैत्रेयं ॥ १ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ४

मृदु परोपद्रवशून्यं तीव्रं दुश्चरं दीर्घमाकल्पांतं तेपाते तपश्चेरतुरित्यर्थः लोकभावनौ लोकानुग्रहकारकौ ॥२२॥ ज्ञा
नेन विवेकेन ॥२३॥ विस्रंभात विश्वासात ॥२४॥ यद्यस्मात्त्वमप्रयोजनसाधकाः संतः चरंति ॥ नहि तेषां कृतार्थानां
नामन्यत्कृत्यमस्तीत्यर्थः ॥२५॥ तत्त्वसंराध्य इति अयं भावः ॥ भगवतैव स्मरणमात्रेण तावत तत्त्वमुपदिष्टं प्रायेण केव
लमसंभवादि नि हरे स्वेच्छानीकं चिदाराध्यः स च तत्त्वाराध्यो मैत्रेयो न त्वहं ममांतिक एवं तदुपदेशो तस्मादित्यादि

यत्र नारायणो देवो नरश्च भगवानृषिः ॥ मृदु तीव्रं तपो दीर्घं तेपाते लोकभावनौ ॥२२॥ श्रीशुक उवाच ॥ इत्य
द्धवादुपाकर्ण्य सुहृदां दुःसहं वधं ॥ ज्ञानेनाशमयत्क्षत्ता शोकमुत्पतितं बुधः ॥२३॥ स तं महाभागवतं व्र
जंतं कौरवर्षभः ॥ विस्रंभादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे ॥२४॥ विदुर उवाच ॥ ज्ञानं परं स्वात्मरहःप्र
काशं यदाह योगीश्वर ईश्वरस्ते ॥ वक्तुं भवान्नोर्हति तद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतः चरंति ॥२५॥
उद्धव उवाच ॥ ननु ते तत्त्वसंराध्य ऋषिः कौषारवोंतिके ॥ साक्षाद्भगवतादिष्टो मर्त्यलोकं जिहासता ॥२६॥
श्रीशुक उवाच ॥ इति सह विदुरेण विश्वमूर्तेर्गुणकथया सुधया प्लावितोरुतापः ॥ क्षणमिव पुलिने यमस्
वसुस्तां समुषित औपगविर्निशां ततो गात ॥२७॥ राजोवाच ॥ निधनमुपगतेषु वृष्णिभोजेष्वधिरथ
यूथपयूथपेषु मुख्यः ॥ स तु कथमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः ॥२८॥ श्रीशुक उवाच
ब्रह्मशापापदेशेन कालेनामोघवांछितः ॥ संहृत्य स्वकुलं नूनं त्यक्ष्यन्देहमचिंतयत ॥२९॥ ॥

ति ॥२६॥ प्लावितोऽपनीतः उरुस्तापो यस्य यमस्वसुर्यमुनायाः ॥ पुलिने तीरे तां निशां क्षणमिव समुषितः औपगवि
रुद्धवः ॥२७॥ ब्रह्मशापेन निधनं प्राप्तेषु यत ॥ यस्मात्त्वया पाणां ब्रह्मादीनामीश्वरो हरिरपि आकृतिं मनुष्याकारं त्यक्तवान
॥२८॥ ब्रह्मशापापदेशेनामितं यस्य तेन कालेन समर्थाकृतेनामोघवांछितेन यस्य तस्य शापः प्रभुः किं न भगवांदिः

॥ श्री ॥ भागवतटीका ४

प्ठो२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ष्ठंरस्मानावरोमर्षयंति ॥ कर्माणीति अनीहस्य निष्क्रियस्य निस्पृहस्य वा अभवस्य अजन्मनो न भवो जन्म कालात्मनः त
तोऽरिभयाद्दुर्गाश्रयः पलायनं च ॥ स्वात्मनिरतिर्यस्य तस्य बह्वीभिः स्त्रीभिः सह गृहाश्रय इति स्त्रीरहस्याश्रम इति यत्र
गृहाश्रमित्वविषये विदुषामपि धीः ॥ संशयेन खिद्यति ॥ १६ ॥ किंच मंत्रेष्विति तेषु सत्सु मामाहूय यत्प्रश्नो पृच्छेः अपृच्छः अकुं
ठितः कालादिना अखंडः सदा ॥ ततः सदात्मा संयमादि सहितो बोधो यस्य प्राक्रियस्य मुग्ध इवाहं तत् ॥ अप्रमत्तः अ

कर्माण्यनीहस्य भवोऽभवस्य दुर्गाश्रयोऽथारिभयात्पलायनं ॥ कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन्रतेः
खिद्यति धीर्विदामिह ॥ १६ ॥ मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबोधः ॥ पृच्छेः प्रभो मुग्ध इवाप्रम
त्तः तन्नो मनो मोहयतीव देव ॥ १७ ॥ ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान्समग्रं ॥ अपि क्षमं नो
ग्रहणाय भर्तर्वदांजसा यद्वृजिनं तरेम ॥ १८ ॥ इत्यावेदितहार्दाय मह्यं स भगवान्परः ॥ आदिदेशारविंदाक्ष
आत्मनः परमां स्थितिं ॥ १९ ॥ स एवमाराधितपादतीर्थादधीततत्त्वात्मविबोधमार्गः ॥ प्रणम्य पादौ परिवृ
त्य देवमिहाहमायां विरहातुरात्मा ॥ २० ॥ सोऽहं तद्दर्शनाह्लादवियोगार्तियुतः प्रभोः ॥ गमिष्ये दयितं तस्य
बदर्याश्रममंडलम् ॥ २१ ॥

वर्द्धितः सन् ॥ १७ ॥ स्वात्मनः तत्त्वरहः रहस्यं तत्त्वं तेन स्वप्रकाशकं कस्मै ब्रह्मणे सर्वेनामनमार्गेण ॥ अस्माकं ग्रहणा
योग्यतासंपदादियोग्यं ते त्वं वद भर्तः स्वामिन् यत् यतः संसारदुःखमनायासेन तरिष्यामः ॥ १८ ॥ आवेदितो हार्दो हृ
दिस्थो अभिप्रायो येन तस्मै ॥ १९ ॥ आराधितपादो भगवान्स एव तीर्थं गुरुः तस्मादधीत अधिगतः तत्त्वात्मविबोधस्य प
रमात्मज्ञानस्य मार्गो येन तं देवं परिवृत्य प्रदक्षिणीकृत्य ॥ २० ॥ तस्य दर्शनेन आह्लादः वियोगेनार्तिश्च ताभ्यां युतः बद

श्री भाग टी र

तेमनसीप्सितंस्वहृन्मतःस्योवेदवेद्मि ॥ विश्वसृजांवसूनांचमिलितानांसत्रेहेवसोइतिपुराप्रथमजन्मनित्वंवसुरभूःतदामत्प्रा- जन्मनेभवा

प्तिकामेनत्वयाइष्टःअहमिष्टः ॥ अतस्तत्साधनंददामिदास्यामिअन्यैर्मत्स्वाद्युर्दुरवापं ॥ ११ ॥ तस्यभाग्यमभिनंदति ॥ सएषभवो

नांमध्येचरमःयत ॥ यस्मिन्मदनुग्रहःआसादितोलब्धःयत्त्वंनेमांरहसिएकांतेविशदानुवृत्त्याएकांतभक्त्याददृश्वान्दृष्टवानसि

एतावदिष्टमहदजातमित्यर्थः ॥ नृलोकान्नृशब्देनजीवाःतेषांलोकान्उत्सृजंतंवैकुंठंगच्छंतमित्यर्थः ॥ १२ ॥ दृष्टमीतिय

दुक्तंप्रपातन्देवनिर्दिशति ॥ पुराप्रथमेस्मिन्पाद्मेकल्पेआदिसर्गेसर्गोपक्रमेममममहिमालीलाप्रवभासयतेयेनततत ॥ १३ ॥ इ-

श्रीभगवानुवाच ॥ वेदाहमंतर्मनसीप्सितंतेददामियत्तद्दुरवापमन्यैः ॥ सत्रेपुराविश्वसृजांवसूनांमत्सिद्धिका-

मेनवसोत्वयेष्टः ॥ ११ ॥ सएषसाधोचरमोभवानामासादितस्तेमदनुग्रहोयत् ॥ यन्मांनृलोकान्रहउत्सृजंतंदि-

ष्ट्याददृश्वान्विशदानुवृत्या ॥ १२ ॥ पुरामयाप्रोक्तमजायनाभ्येपद्मेनिषण्णायममादिसर्गे ॥ ज्ञानंपरंमन्महिमाव-

भासंयत्सूरयोभागवतंवदंति ॥ १३ ॥ इत्यादृतोक्तःपरमस्यपुंसःप्रतिक्षणानुग्रहभाजनोहं ॥ स्नेहोत्थरोमा-

स्खलिताक्षरस्तंमुंचञ्छुचःप्रांजलिराबभाषे ॥ १४ ॥ कोन्वीशतेपादसरोजभाजांसुदुर्लभोर्थेषुचतुर्ष्वपीह

तथापिनाहंप्रवृणोमिभूमन्भवत्पदांभोजनिषेवणोत्सुकः ॥ १५ ॥ ॥

त्येवमादृतइत्यादृतउक्तश्चाहं ॥ प्रतिक्षणंकृपावलोकएवअनुग्रहःतस्यभाजनःपात्रभूतःपाठांतरेप्रतिक्षणमनुग्रहस्य

पात्रमितिप्रशुचः ॥ अश्रूणिमुंचन् ॥ आबभाषेउक्तवानस्मि ॥ १४ ॥ नहिस्वात्मानंनिवृत्तिमात्रकामोहंकिंतुत्वन्निषेवणोत्सु-

कइत्यर्थः ॥ त्वयिप्रावर्तमानोचरणोदृष्टामेमोहोभवति ॥ अतस्त्वंतत्वज्ञानंदेहिइतिप्रार्थयितुमाह ॥ कोन्वीशतेचतुर्षु र

धर्मादिषुतथापितान्अहंनप्रवृणोमि ॥ १५ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

...मेव मैरेयं तस्य दोषेण निम्लोचति अस्तं गच्छति सति ॥ मर्दनं करदने ॥ २ ॥ उपस्पृश्य सरस्वत्यामाचम्य ॥ ३ ॥ अहं चोक्तः
सर्वमेव हारकार्यं ॥ ४ ॥ तदभिप्रेतं कुलसंहारादिकं ॥ ५ ॥ कृतकेतं कृतावासं अकेतनमनाश्रयम् ॥ ६ ॥ विरजं विरजसं वि
दितं लक्षितं ॥ कौशं कौशेयं कौशांबरेण पीतांबरेण ॥ ७ ॥ अधिश्रित्य उपरि स्थापयित्वा अपाश्रितः पृष्ठतो वष्टब्धः अ

तेषां मैत्रेयदोषेण विषमीकृतचेतसां ॥ निम्लोचति रवावासीद्वेणूनामिव मर्दने ॥ २ ॥ भगवानात्ममायाया
गतिं तामवलोक्य सः ॥ सरस्वत्यामुपस्पृश्य वृक्षमूलमुपाविशत ॥ ३ ॥ अहं चोक्तो भगवता प्रपन्नार्तिहरे
ण ह ॥ बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ॥ ४ ॥ अथापि तदभिप्रेतं जानन्नहमरिंदम ॥ पृष्ठतोन्वगमं
भर्तुः पादविश्लेषणाक्षमः ॥ ५ ॥ अद्राक्षमेकमासीनं विचिन्वन्दयितं पतिं ॥ श्रीनिकेतं सरस्वत्यां कृतकेतम
केतनं ॥ ६ ॥ श्यामावदातं विरजं प्रशान्तारुणलोचनं ॥ दोर्भिश्चतुर्भिर्विदितं पीतकौशांबरेण च ॥ ७ ॥ वाम ऊरा
वधिश्रित्य दक्षिणांघ्रिसरोरुहं ॥ अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलं ॥ ८ ॥ तस्मिन्महाभागवतो
द्वैपायनसुहृत्सखा ॥ लोकाननुचरन्सिद्ध आससाद यदृच्छया ॥ ९ ॥ तस्यानुरक्तस्य मुनेर्मुकुंदः प्रमोदभावा
नतकंधरस्य ॥ आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच ॥ १० ॥ ॥

र्भको बालः कोमलो अश्वत्थो येन तं त्यक्तं पिप्पलं विषयसुखं येन ॥ तथाप्यकृशमानंदपूर्णं ॥ ८ ॥ द्वैपायनः सुहृत्सखा
च यस्य सः स्वगुरुपुत्रत्वात् पराशरशिष्यो मैत्रेयः ॥ ९ ॥ प्रमोदेन भावेन चानता कंधरा यस्य ॥ पाठांतरे अनुरागेण हासो
यस्यां तया समीक्षया विश्रमयन् विगतश्रमं कुर्वन् ॥ १० ॥ ॥ प्रमोदस्वभावेन १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
ती०
१२

यदास्वाधीनेष्वपिभगवतोविरागःतदादैवाधीनेषुकोविस्रंभेतविश्वासंप्रीतिंवाकःकुर्यात् ॥ योगेनत्वेवयोगेश
रंश्रीकृष्णमनुव्रतः ॥ २३ ॥ शेपुःशापंददुःभगवतोमते ऽभिप्रायेकोविदाःअभिज्ञाः ॥ २४ ॥ २५ ॥ वयःशीलादिब
हुगुणोपेताःगावःताः ॥ २६ ॥ कन्याश्चवृत्तिकरींजीविकापर्याप्तां ॥ २७ ॥ भगवदर्पणंयथाभवतितथागोविप्रार्थाअ

दैवाधीनेषुकामेषुदैवाधीनःस्वयंपुमान् ॥ कोविस्रंभेतयोगेनयोगेश्वरमनुव्रतः ॥ २३ ॥ पुर्यांकदा
चित्क्रीडद्भिर्यदुभोजकुमारकैः ॥ कोपितामुनयःशेपुर्भगवन्मतकोविदाः ॥ २४ ॥ ततःकतिपयैर्मासैर्वृ
ष्णिभोजांधकादयः ॥ ययुःप्रभासंसंहृष्टारथैर्देवविमोहिताः ॥ २५ ॥ तत्रस्नात्वापितॄन्देवानृषींश्चै
वतदंभसा ॥ तर्पयित्वाथविप्रेभ्योगावोबहुगुणाददुः ॥ २६ ॥ हिरण्यंरजतंशय्यांवासांस्यजिनकंबला
न् ॥ यानंरथानिभान्कन्याधरांवृत्तिकरीमपि ॥ २७ ॥ अन्नंचोरुरसंतेभ्योदत्वाभगवदर्पणं ॥ गोविप्रार्था
सवःशूराःप्रणेमुर्भुविमूर्धभिः ॥ २८ ॥ इतिश्रीभागवतेतृतीयस्कंधेतृतीयोध्यायः ॥ ३ ॥ श्रीउद्धवः ॥
अथतेतदनुज्ञाताभुक्त्वापीत्वाचवारुणीं ॥ तयाविभ्रंशितज्ञानादुरुक्तैर्मर्मपस्पृशुः ॥ १ ॥ ॥

सवोयेषां ॥ २८ ॥ इतिश्रीभावार्थदीपिकायांतृतीयेतृतीयोध्यायः ॥ चतुर्थेवंधुनिधनंश्रुत्वान्मत्तानलव्यये उ
द्धवस्यापदेशेनतज्ज्ञामैत्रेयमागमत् ॥ तेब्राह्मणैरनुज्ञाताः वारुणींपैष्टीमदिरां ॥ १ ॥ ॥ श्री ॥ १२

नचान्यउपायःप्रभवतीतिकिंतत्रमधुनायग्रामदः सर्वतोमदः तेनाताम्रविलोचनानामेषांविवादोयदाभविष्यति
तदायुपानेवेषांवधोपायः अतोस्मिन्नास्तिएकात्मनोपिमह्यंयतेसतिस्वयमेवविवादेंतोंतर्दधीरतिसंबंधः ॥२५
एवंश्लोकद्वयेनोक्तक्रमेणसंचिंत्यस्वराज्येस्थापयित्वा ॥२६॥ धृतः रक्षितः ॥२७॥ अनुजैः सह ॥२८॥ सांख्यंप्र

मिथोयदैषांभवितांविवादोमध्वामदाताम्रविलोचनानां ॥ नैषांवधोपायइयानतोस्योमह्यंयतेंतर्दधतेस्व
यंस्म ॥२५॥ एवंसंचिंत्यभगवान्स्वराज्येस्थाप्यधर्मजं ॥ नंदयामाससुहृदः साधूनांवर्त्मदर्शयन् ॥२६
उत्तरायांधृतः पूरोर्वंशः साध्वभिमन्युना ॥ सवैद्रौण्यस्त्रसंछिन्नः पुनर्भगवताधृतः ॥२७॥ अयाजयत्
धर्मसुतमश्वमेधैस्त्रिभिर्विभुः ॥ सोपिक्ष्मामनुजैरक्षन्रेमेकृष्णमनुव्रतः ॥२८॥ भगवानपिविश्
वात्मालोकवेदपथानुगः ॥ कामान्सिषेवेद्वार्वत्यामसक्तः सांख्यमास्थितः ॥२९॥ स्निग्धस्मिताव
लोकेनवाचापीयूषकल्पया ॥ चरित्रेणानवद्येनश्रीनिकेतेनचात्मना ॥३०॥ इमंलोकममुंचैवर
मयन्सुतरांयदून् ॥ रेमेक्षणदयादत्तक्षणस्त्रीक्षणसौहृदः ॥३१॥ तस्यैवंरममाणस्यसंवत्सर
गणान्बहून् ॥ गृहमेधेषुयोगेषुविरागः समजायत ॥३२॥ ॥ श्री ॥

दत्तः तुल्यया
कृतिपुरुषविवेकं ॥२९॥ स्निग्धोयःस्मितसहितोवलोकः तेनपीयूषकल्पयासुधायापाठांतरेसुधापूर्वाह
रूपयावाश्रीआत्मनादेहेन ॥३०॥ क्षणदयारात्र्यादत्तोणोवसरः उत्सवोवायासांस्त्रीणांतासुक्षणेषुसौहृदं
यस्यसः गृहमेधेषुगृहस्थधर्मेषुकामयोगोपायेषुविरागोउदासीन्यंजातमित्यर्थः ॥३२॥ ॥ श्री ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी०
११

सर्वतः सर्वैर्गुणैः स्वतन्त्रात् निःप्रकृतेर्मायाया विविधं भवनं विस्तारं तदिच्छया यदृच्छा प्रकृतेर्हेतोः विविधं भवितुमि
च्छया कालः कालयवनः रुंधतः आह्वयतः मुचुकुंदभीमादिभिः निमित्तमात्रैः स्वयमेवाजीवनत् वा तिन्नवा र
तु तेषां तेन स्वस्वपुंसां तेजः प्रभावं कीर्तिं वा दत्तवान् ॥ १० ॥ शंबरद्विविदबल्वलानन्यानपि कंसदैत्यमुरासादिभिः
वानयत् वा नयत् त्रिभिर्वा पाठः दंतवक्त्रादीन् स्वयमवधीत् नृपानघातयदित्येव वेदाः ॥ ११ ॥ कथंभूतान् कुरुक्षेत्र

श्रवानयत्

नासैन्यमानिजनयद्यांम्नत्नाविसर्वतः ॥ एकैकसंख्यादशदशाप्रकृतेर्विवुभूया ॥ स कालमायायमा
स्त्वादीननीकैः रुंधतः पुरं ॥ अजीवनत्स्वयंदिव्यं स्वपुंसां तेजआदिशत् ॥ १० ॥ शंबरं द्विविदं बाणं मुरं
बल्वलमेव च ॥ अन्यांश्च दंतवक्त्रादीनवधीत्कांश्च घातयत् ॥ ११ ॥ अथ ते भ्रातृपुत्राणां पक्षयोः पतितान्
नृपान् ॥ चचाल भूः कुरुक्षेत्रे येषामापततां बलैः ॥ १२ ॥ स कर्णदुःशासनसौबलानां कुमंत्रपाकेन
हतश्रियायुषं ॥ सुयोधनं सानुचरं शयानं भग्नोरुमुर्व्यां न ननंद पश्यन् ॥ १३ ॥ कियान्भुवोयं क्षपितो
रुभारो यद्द्रोणभीष्मार्जुनभीममूलैः ॥ अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनां
१४ ॥ ॥ ॥

मायतनंतंगमागच्छतां येषां बलैः सैन्यैर्भूः सर्वापि चचाल ॥ १२ ॥ स कृष्णः हताश्रीरायुश्च यस्य भग्नावूरू यस्य तं उर्व्यां शया
नं पश्यन्नपि न ननंद तोषं नाप ॥ १३ ॥ अनभिनंदनप्रकारमेवाह ॥ कियानिति द्रोणादिभिर्मूलैः कारणभू
तैः यद्विनियः ॥ अष्टादशाक्षौहिणीयुक्तः कुरुसैन्यमार्गं क्षपितः उरुर्भारोयं कियान् ॥ अल्पत्वादपर्याः ॥ यस्मान्म ११
दंशैः प्रद्युम्नादिभिर्हेतुभूतैः दुर्विषहं बलमास्ते ॥ १४ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कऊ यतो वृषभान् ॥ अविद्रुनासिकाँहू नेतिवाने वृषभैस्तद् मनेनव ॥ भग्नोमानोयेषांतथापितान्दध्यतः कामयमा
नान् ॥ अतयवासान्वासभृतोरातः नक्तुस्तैरत्ततणवजवान ॥ ४ ॥ यदाअदित्याः ऊंडलेनाटंकदयंदातं स्वर्गगतः
नदाप्रभुः ॥ स्वनंत्रोपिग्रामः स्त्रीपरतंत्रश्व प्रियायाः सत्यभामायाः प्रियं विधातुमिच्छुः ॥ युनरूपाविज्ञानमानीः
नवान् यदर्थेयत्रिमितंक्रसंवज्रीह्रीप्रेरितोयोदुमत्वथावत ॥ सकार्यसाधकेनतेनगुद्धोयमस्तस्याप्रक्रमः

कऊयनोविड्नसोदमितासयंवेस्नाग्रजितीमवाह ॥ तद्ग्रमानानपिरध्यतोसान जक्षेदनः श
स्त्रभृतः सशस्त्रैः ॥ ४ ॥ प्रियंप्रमग्रीमयश्च प्रियायाविधित्सरा छेघुनस्यदर्थे ॥ वज्रमन्यथावत्सग
तोस्वांधः क्रीडामृगोन्नमयंवस्तो ॥ ५ ॥ सतेमृयेवेवगुणाग्रसेनद स्नानाभोन्मथितंयवि
मा अमंवितसननयायप्रोवंदत्तातंदतःपुरमाविश्य वेम्रा६ तत्राहनास्तानरदेवकन्याः ऊजेनद
स्नाहविमार्तवेधु उत्थायसयोजनरस्यःप्रहर्षव्रीडानुरागप्रहितावलोकैः ॥ ७ ॥ आसामहतेय
कस्मिन्नानागारेगुयोषितां सविधंजगहेह्यपाणीनतु नृपः समायया ॥ ८ ॥ ॥ । ॥

वतुल्याह क्रीडामृगडवेतिमयंवज्री ॥ ५ ॥ स्वनामेनचक्रेणउन्मथितेहतेस्नेतभोमंद स्नानस्यमात्रा
परिग्रामभूम्याग्रामंवितः प्रार्थितः सन् नसतनयायमगादनायहतप्रोषंराजपदवा ॥ ९ ॥ नत्रांतःपुरे
ऊजेनभोमेनयाप्राहृतास्ताः प्रहर्षव्रीडाचानुरागाश्वैतैःप्रहिताःप्रेषितायेअवलोकाः तैर्जयरस्यः
सीहनवत्सः ॥ ७ ॥ आसांयोषितांयाणीमतनदतु नृपः सन् सविधंविवाहोचितप्रकारसहितंयथाभवति ८

इति श्रीभावार्थे तृतीये द्वितीयः ॥२॥ तृतीये मथुरामेत्य व्रजानां कंसवधादिकं ॥ यत्कृतं द्वारकायां च कृष्णेन तद्वर्ण्य-
ते प्रामित्यन्वयः पित्रोः स्वावस्य विकीर्षयेत्यर्थः ॥ तेगाद्युजमेवात ॥ रिपुयूथनाथं कंसं व्यसोरपि निकर्षणाय
त्रोः स्वार्थं ॥१॥ ब्रह्मवेदं सविस्तरं षडंगादिसहितं ॥ पंचजनोदरविदारणाद्वारा गुरुपुत्रमानीयेत्यर्थः ॥२॥ भीष्मक-
कन्यया रुक्मिण्या ये राजान आहूताः ॥ कृष्णवत्समाधं समाहूता इति पाठे आहूता इत्यर्थः ॥ केन साधनेन श्रियो-
लक्ष्म्याः सवर्णेन समानेन रूपेण यया पितया केवलं श्रीकृष्ण एवाहूतः न सर्वे तया पितस्यालावण्ये तेषामाग

इति श्रीभागवते तृतीये द्वितीयः ॥२॥ श्रीउद्धव उवाच ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं ब-
लदेवसंयुतः ॥ निपात्य तुंगाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसुमोजसोर्व्याम् ॥१॥ सांदीपनेः सकृत्प्रो-
क्तं ब्रह्माधीत्य सविस्तरं ॥ तस्मै प्रादाद्वरं पुत्रं मृतं पंचजनोदरात् ॥२॥ समाहुता भीष्मककन्यया ये श्रि-
यः सवर्णेन बुभूषयैषां ॥ गांधर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ॥३॥ ॥

मनेद्वैन्नविनितयैवाहूताउन्मनले ॥ एषां मिषतां मूर्ध्नि पदं दधत् ॥ तया सह गांधर्ववृत्त्या परस्परसमयरूपया-
बुभूषया भवितुमिच्छया जह्राव ॥ कथंभूतां स्वभागं लब्धं शास्त्रात्तया आत्मनोर्पितत्वाच्च सुपर्णः सुपतनः यद्वा
सुपर्णो गरुडवत्स्वभागं सुधामित्यर्थः ॥ यद्वा श्रियो रुक्मिण्याः समानेव वर्णो द्वयं वाचकं यस्य सः श्रियः सवर्णो रु-
क्मी तेन समाहूताः शिशुपालादयः किमर्थं भीष्मककन्यया सह तेषां बुभूषया भूतिर्भवत्वित्येतदर्थं तत्र-
शिशुपालस्याह्वानं वरत्वेन बुभूषया जरासंधादीनां तद्विवाहो न स्वेषां शेषं पूर्ववत् ॥३॥ ॥ ॥ १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सर्ववाधिकं वयः प्राप्तः सन्नलक्ष्म्याः शोभादिसंपदो निकेतनं सितः गोवृषाय यस्मिन्नानावर्णा गोसंघेरणं अंकवेन्द्रवे॰
सर्वाधिकं वयः प्राप्तः सन्नलक्ष्म्याः शोभादिसंपदो निकेतनं सितः गोवृषाय यस्मिन्नानावर्णा गोसंघेरणाङ्कवेन्द्रवे॰
णा रयं स्य शरीरमतरमयामासेव्यवत्स जवानक्रीडनकांस्त्णादिनिर्मितान सिंहादीन्यथौ विपन्नान्नन्तान्नगोपा
न गावश्च निगास्तोन्या प्यतरेवतोयं प्रकृतिस्थितेति निर्विघं ॥ २१ ॥ इंद्रस्यज्ञाभंगेन क्रुनागवांपुनैवगोसवः तेनगोपरा

मपवगोधनं लक्ष्म्या निकेतं सितगोवृषं ॥ चारयन्नत्नगानोयानरणाहेरणरिरमत ॥ २९ ॥ प्रयुक्ताभोज
राजेन मायिनः कामरूपिणः ॥ लीलयामव्रदन्तांस्तान्बालक्रीडनकानिव ॥ ३० ॥ विपन्नान्विषपा
नेन निगृह्य भुजगाधिपं ॥ उत्थाप्यापाययद्गावः तत्तोयं प्रकृतिस्थितं ॥ ३१ ॥ प्रयाजयद्गोसवेन गो॰
पराजं द्विजोत्तमैः ॥ विभ्रस्यचोरुभारस्यचिकीर्षन्सह्यायें विभुः ॥ ३२ ॥ वर्षतींद्रे व्रजः कोपाद्भग्नमानेति॰
विह्वलः ॥ गोत्रलीलातपत्रेणत्रातोभद्रानुगृह्णता ॥ ३३ ॥ शरच्छशिकरैर्मृष्टं मानयन्रजनीमुखं ॥ गा
यन्कलपदं रेमे स्त्रीणां मंडलमंडनः ॥ ३४ ॥ ॥

जेनेंदं विभ्रस्य चेतिवकारादिं दृश्यमानमंगेगोकुवेन ॥ उरुभारस्यातिसमृद्धस्य ॥ ३२ ॥ कोपाद्वर्षतिगोत्रः पर्वतएवलीला
तपत्रं तेनदेभद्र ॥ ३३ ॥ मृष्टमुज्वलं मंडयतीतितथा ॥ ३४ ॥ ॥

स्त्रीणां मंडलं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नत्वसाधवमतेनैव भगवानुग्रह्णातीति मन्ये ॥ असुरानप्यहं भागवतानेव मन्ये यतो भागवतास्त्र्यधीशे त्रिभगवद्या
नाभिनिवेशेन भगवंतमपरोक्षं पश्यंतीत्याह संरंभः ॥ क्रोधावेशः तेन मार्गेणाभिनिविष्टचित्ता ये तान् अतएव
व संयुगे तार्क्ष्यः कश्यपः तस्य पुत्रं गरुडं अंसे स्कंधे सुनाभायुधः चक्रायुधो हरिर्यस्य तमचक्षत पश्यन्नतस्मा
नेषु प्रयुतप्रहरोद्युक्तरूपवेत्यर्थः ॥ वक्ष्यति च तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेदिति ॥ २४ ॥ इदानीं तस्या

मन्येऽसुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् ॥ ये संयुगेऽचक्षत तार्क्ष्यपुत्रमं
से सुनाभायुधमापतंतं ॥ २४ ॥ वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने ॥ चिकीर्षुर्भगवानस्याः
शमजेनाभियाचितः ॥ २५ ॥ ततो नंदव्रजमितः पित्रा कंसाद्विबिभ्यता ॥ एकादश समास्तत्र
गूढार्चिः सबलोऽवसत् ॥ २६ ॥ परीतो वत्सपैर्वत्सांश्चारयन्व्याहरन्विभुः ॥ यमुनोपवने कूजद्द्वि
जसंकुलितांघ्रिपे ॥ २७ ॥ कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसां ॥ रुदन्निव हसन्मुग्धबाल
सिंहावलोकनः ॥ २८ ॥ ॥

तर्थान्प्रकारेव जन्मादि तत्त्वारभ्य तच्चरितं संक्षेपतः कथयति ॥ वसुदेवस्य भार्यायां जातः भोजेंद्रः कंसः तस्य
बंधनागारे अस्याः पृथिव्याः शं सुखं कर्तुं चिकीर्षुः ॥ अजेन ब्रह्मणा याचितः सन् पित्रा हेतुभूतेन नंदव्रजमितः गतः
समाः संवत्सरान् गूढार्चिः गुप्ततेजाः ॥ २६ ॥ व्याहरन् आक्रीडन् कूजद्भिर्द्विजैः ॥ पक्षिभिः संकुलिता व्याप्ताः
अंघ्रिपा यस्मिन् ॥ २७ ॥ रुदन्निवेति स्वप्रभुत्वस्य ... सर्वेषामप्यन्वयः मुग्धो बालश्चासौ सिंहः ॥ तद्वदवलो

तदेवं परमैश्वर्यं प्रियदर्शनेनानुवर्तितं तन्मनस्यानन्दं प्रथयतीत्याह ॥ स्वयं त्वएवंभूतः तस्य तत्कैंकर्यं नोऽस्मान्वि-
स्मापयतीति उत्तरेणान्वयः ॥ न साम्यातिशयौ यस्य यमपेतान्यस्य साम्यमतिशयश्च नास्तीत्यर्थः ॥ तत्र हेतुः तवः
त्र्यधीशः पुरुषार्थानामधीशः स्वाराज्यलक्ष्म्या परमानंदस्वरूपसंपत्त्यैव प्राप्तसमस्तभोगः ॥ बलिं करं भ्रंशं तेषां
हरद्भिः समर्पयद्भिः चिरकालीनैः लोकपालैः किरीटाग्रेणेडितस्तत्पादपीठं यस्य प्रणतकिरीटसंघट्टनधाने

स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः ॥ बलिं हरद्भिश्चिरलोकपालैः कि-
रीटकोटीडितपादपीठः ॥ २१ ॥ तत्तस्य कैंकर्यमलंभृतान्नो विस्मापयत्यंग यदुग्रसेने ॥ तिष्ठन्निषण्णं पर-
ष्ण्ये मेष्ठिधि न्यबोधयद्देव निधारयेति ॥ २२ ॥ अहो बकी यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ।
लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥ २३ ॥

न्यबोध २ ष्ठि ष्ण्ये

रेव स्तनितं ते नो स्मोदयते ॥ २१ ॥ अंग विदुर भक्ता नन्यनादउग्रसेनेयत्किंकरत्वं तत्देवाह ॥ परमेष्ठिधिष्ण्ये राजासने निषण्ण-
मासीनं स्वयं तिष्ठन् ॥ हे देव अवधारयेति यद्विज्ञापितवान् ॥ २२ ॥ एवमनन्यत्वेऽपि कृपयैवेति स्वयं तत्रपि कारिण्यपि
तस्य कृपालुतां दर्शयन्नाह ॥ अहो आश्चर्यं हन्तुमिच्छया यापि स्तनयोः संभृतं कालकूटं विषं यमपाययत् ॥ ब-
कीं पूतना असाध्वी दुष्टापि धात्र्याः यशोदाया उचितां गतिं लेभे भक्तवेषमात्रेणाय तद्भक्तिं दत्तवान् ततोऽन्यं कं वा व्र-

॥ २४ ॥ भ्रम

नतु जातो यं यरावरणामीपाः पावतं यप्रनीतेस्तत्राह ॥ मामयेनन दुर्विनिकंर्डचेटंचवेदयति ॥ नदेवाह ॥ वसुदे
वगेहे जन्मनो यहिडंबनं प्रतुकरणं नतत्सिंहवदकस्मादाविर्भावः कंसभयादिवनिलीयपुत्रेवास ॥ का
लायवनादिरिपुभयादिवपुरात्मथुरायाः द्वावात्ती तप्रपलायन ॥ २६ ॥ यततद्वहरे स्तुविंतेसमरतोममचेतः कर्म
मूतंडलोतिक्षयपतितेदेवदर्शयति ॥ यदाहेतिहेतान हेअवपुवांप्रसीदंतप्रसादंकरुतं ॥ नहूतानिहृतिः

मोत्वे दयमेतदजस्यजन्माविडंबनं यद्वसुदेवगेहे ॥ व्रजेचवासोरिभयादिवस्वयंपुराद्व्यवात्सीयदनंतवी
र्यः ॥ २६ ॥ इतोनिवेतः स्मरतोममैतद्यदाहपादावभिवंद्यपित्रो ॥ तातांवकंसादुरुशंकितानांप्रसी
दतंनोकृतनिष्कृतीनां ॥ २७ ॥ कोवाअमुष्यांघ्रिसरोजरेणुंविस्मर्तुमीशीतपुमान्विजिघ्रन् ॥ योविस्फु
रद्भ्रूविटपेनभूमर्भारंकृतांतेनतिरश्चकार ॥ २८ ॥ दृष्टाभवद्भिर्ननुराजसूयेचैद्यस्यकृष्णंद्विषतोपिसं
सिद्धिः ॥ यांयोगिनः संस्पृहयंतिसम्यग्योगेनकस्तद्विरहंसहेत ॥ २९ ॥ नथैवचान्येनरलोकवीराय
आहवेकृष्णमुखारविंदं ॥ नेत्रैः पिवंतोनयनाभिरामंपार्थास्त्रपूताः पदमापुरस्य ॥ ३० ॥ ॥ ॥ ॥

सुत्रस्यवत्तंयैस्ते एवांनो ॰ स्माकं वकुवक्तनं रामायणिप्रायं ॥ २७ ॥ नवनर्भिस्त्र यीश्वर पवकिंनस्यात ॥ नवनद्व
ड्यामातव मे नवनचाह त्रिभिः ॥ कोवाअंघ्रिसरोजेयोरेणुः नमपिविजिघ्रन्सेवमानः विस्मर्तेमीशीतनशक्नुयात
विस्फुरत्भ्रूविटपः भ्रूलतासएवकृतांतः तेन ॥ २८ ॥ नवनस्पृहयंतंसाधनीयंभवद्भिरपिदृष्टत्वान्नइत्याह दृष्टे
तियासिद्धिः सम्यग्योगेन प्राप्तुंवांछंति ॥ २९ ॥ आहवेयुद्धे पार्थस्यास्त्रैः पूतानिष्पापाः संतः ॥ ३० ॥ ॥ ॥ ॥ ८

तदेवविंविंबगतोवतिविभिः॥ यन्मर्त्यलीलास्वौपयिकं योग्यं स्वस्यापि विस्मयजनकं यतः सौभगर्द्धेः सौभाग्यातिश
यस्य पदं यद्वा काष्ठा भूषणानां भूषणान्यंगानि यस्मिन्॥ १२॥ दृग्भ्यां स्वस्त्ययनं यस्मात्तद्दृक्स्वत्रिभुवनस्थो लोकः
प्राणिमात्रं स्तद्यदा नीरीक्ष्य विधेरर्वाक्सृतावर्वाचीनसमये निर्माणे यत्कौशलं तेन पुण्यजनकात्स्न्येन गतं प्राप्तं
मन्यते स्म तं नत्वा कौशलं अस्मिन्नेव मेनेन तत्त्वे विधातुः सृजतामवधिलोकसमृद्धि इयत्ता॥ १२॥ अनुरागे
ण प्लुतः आर्द्रः हासः रासो विनोदः लीलावलोकस्तैः सत्कृतहासा यथा तं प्रतिलब्धो मानो याभिस्ताः दृग्भिः

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं॥ विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषण
भूषणांगं॥ १२॥ यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः॥ कार्त्स्न्येन चाद्येह गतं वि
धातुरर्वाक्सृतौ कौशलमित्यमन्यत॥ १३॥ यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमाना
नाः॥ व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशेषाः॥ १४॥ स्वशान्तरूपेष्वितरैः स्वरूपैर
भ्यर्द्यमानेष्वनुकंपितात्मा॥ परावरेशो महदंशयुक्तो ह्यजोऽपि जातो भगवान्यथाग्निः॥ १५ ॥

मत्कृत्यवशेषं चात्रागतं मेवानुगतानि धियो यासां ताः कृत्यशेषो यासां ताः असमापितकृत्या एवतस्थुः॥ १४
एवं भक्तजनविंवप्रदर्शनेप्रकारमाह॥ स्वीयान्येव शान्तानि च रूपाणि यत्र शान्तरूपेषु इतरैः घोररूपैरनेषु
अनुकंपितः कृपान्वितः यस्य आत्मा यस्य अजोऽपि जातः आविर्भूतः महता भूतरूपेण नित्यसिद्ध एवाग्निर्यथा का
ष्ठेष्वाविर्भवति न तद्वत् जन्मनिरूपणे मत्कृत्यमत्स्यमेषाः कोर्यलेशो यस्य तन्महदंशेन युक्त इति॥ १५॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
७

श्रीकृष्णविरहेणसंतप्यमानःप्रत्याह ॥ श्रीकृष्णएवद्युमणिःसूर्यःतस्यनिम्लोचेअस्तमयेसतिअजगरेणकालम
हासर्पेणगीर्णेषुनिगलितेषुनोस्मद्गृहेषुनत्स्वष्टानांवधूनांकिंनुब्रूयां ॥ ७ ॥ अहोशोचन्नाह ॥ दुर्भगोभाग्यहीनः
येसंवसंतोविदुर्हरिंयेइतिनविदुःयथाक्षीरसमुद्रेजातमप्युडुपंचंद्रमसंमीनाःकेवलंकमनीयःकश्चिज्जलच
रःइत्येवंविदुःनतुअमृतमयइतितद्वत् ॥ यद्वाजलेप्रतिबिंबितंचंद्रंयथेति ॥ ८ ॥ भाग्यहीनत्वादेवनविदुःनतुज्ञा
नसामग्र्यभावादित्याह ॥ इंगितेनाभिप्रायंजानंतीतितथापुरुअतिशयेनप्रौढाःनिपुणाःएकस्मिन्नेवस्थानेआ

उद्धवउवाच ॥ कृष्णद्युमणिनिम्लोचेगीर्णेष्वजगरेणहि ॥ किंनुनःकुशलंब्रूयांगतश्रीषुगृहेष्वहं ॥ ७ ॥
दुर्भगोवतलोकोयंयदवोनितरामपि ॥ येसंवसंतोनविदुर्हरिंमीनाइवोडुपं ॥ ८ ॥ इंगितज्ञाःपु
रुप्रौढाएकारामाश्चसात्वताः ॥ सात्वतामृषभंसर्वेभूतावासममंसत ॥ ९ ॥ देवस्यमाययास्पृष्टायेचा
न्यदसदाश्रिताः ॥ भ्राम्यतेधीर्नतद्वाक्यैरात्मन्युप्तात्मनोहरौ ॥ १० ॥ प्रदर्श्यातप्ततपसामवितृप्तदृशां
नृणां ॥ आदायांतरधाद्यस्तुस्वबिंबंलोकलोचनं ॥ ११ ॥ ॥

रमंतीतितथा ॥ एवंभूताअपिभूतानामावासमीश्वरंसंतं ॥ सात्वतोऋषभंसात्वतश्रेष्ठंअमन्यंत ॥ ९ ॥ ययादेवः
देवमायाव्यामाःयादवोयस्मद्बंधुरितिवदंतियेचाप्यन्येशिशुपालादयः ॥ असद्देवान्यहेरमाश्रिताःनिंदंतितेषांवा
क्यैःआत्मनिहरावुप्तात्मनोनिहितमनसःममबुद्धिर्नभ्राम्यतेमोहंनप्राप्यतेअन्येतमूढाएवेत्यर्थः ॥ १० ॥
कोसौहरिरित्यपेक्षायामाह ॥ प्रदर्श्येति ॥ अतप्तंतपोयैः ॥ अतोअवितृप्ताद्दृशोयेषांस्वबिंबंमूर्तिंएतावंतंकालं
दर्शयित्वायोंतर्हितवान् ॥ लोकस्यलोचनमादायाच्छिद्यनाद्दृश्यास्यान्यस्यविलोकनीयस्याभावात् ॥ ११ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्कन्द

इति श्रीभावार्थे तृतीये प्रथमः ॥ १ ॥ द्वितीये कृष्णविश्लेषपारवश्योवदथोद्धवः ॥ तद्वैबालचरित्राणि कृष्णस्यावर्णय
त्कचित ॥ तदेवं प्रियवार्त्तां पृष्टस्योद्धवस्य श्रीकृष्णविरहोत्कंठावेशेन प्रतिवचनासामर्थ्यमाह ॥ षड्भिः इतीति
स्मारित ईश्वरो यस्य ॥ १ ॥ सदैवकैर्मन्यमानायेन प्रपंचयति द्वाभ्यां ॥ यः पंचवर्षोपि बाललीलया कृष्णसंकेव
स्यरिकल्पपरिकल्पितैरेव साधनैः परिचर्यां कुर्वन् प्रातर्भोजनार्थं प्रार्थितोपि तन्नेच्छत ॥ २ ॥ जरसंवृद्ध

इति श्रीभागवते तृतीयस्कंधे प्रथमोध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ इति भागवतः पृष्टः क्षत्रा वार्तां प्रियाश्रयां
प्रतिवक्तुं न चोत्सेह औत्कंठ्यात्स्मारितेश्वरः ॥ १ ॥ यः पंचहायनो मात्रा प्रातराशाय याचितः ॥ तन्नैच्छ
द्रचयन्यस्य सपर्यां बाललीलया ॥ २ ॥ स कथं सेवया तस्य कालेन जरसं गतः ॥ पृष्टो वार्तां प्रतिब्रूया
द्भर्तुः पादावनुस्मरन् ॥ ३ ॥ स मुहूर्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशं ॥ तीव्रेण भक्तियोगेन निमग्नः सा
धु निर्वृतः ॥ ४ ॥ पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः ॥ पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ॥ ५
शनकैर्भगवल्लोकान्नृलोकं पुनरागतः ॥ विमृज्य नेत्रे विदुरं प्रत्याहोद्धव उत्स्मयन् ॥ ६ ॥ ॥

तस्यामेव तीव्रेण

त्वंगतः प्राप्तः ॥ ३ ॥ श्रीकृष्णांघ्रिसुधया साधु निर्वृतः विवशानाथाद्यकेन भक्तियोगेन भृशं निमग्नश्च ॥ ४ ॥ पुलकै
रुद्भिन्नान्युज्जृंभितानि सर्वाण्यंगानि यस्य मीलन्त्या दृशा शुचः अश्रूणि मुंचन् ॥ तेन विदुरेण पूर्णार्थः कृतार्थो
लक्षितः यतो भगवानेव यः स्नेहप्रसरः स्नेहपूरः तस्मिन् संप्लुतो निमग्नः ॥ ५ ॥ भगवानेव लोकः तस्मात् नृलो
कं देहानुसंधानं उत्स्मयन् यदुकुलसंहारादि भगवच्चान्तर्ध्यं स्मरणेन विस्मयं प्राप्नुवन् ॥ ६ ॥ ॥ ॥ श्री ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननु कृष्णः किमेवं लीलया येन स्वभक्तानां वनवासादिक्लेशप्राभवेत्तेषां स्वचरिते एवं पनो दर्पमादिपराभवः तत्कृतं तेः
षामपराधानंतरमेव हननं तेनापराधोपेक्षा इत्यत आह ॥ नूनं निस्थितं त्रिभिर्मदैः तस्य पथानामसहनानां वधादेनोः अ
पन्नानामार्तिजिहीर्षयाऽऽशः अ एवमयमेव हेतुः समर्थोऽपि कुरूणामघमुपैक्षत ॥ तदानीमेव तेषां वधे सर्वदुः
ष्टराजवधो न स्यादित्याशयेनेत्यर्थः विद्यामदो धनमदस्तथैवाभिजनो मदः ॥ एते मदा मदांधानां त एव हि सतां
दमाः ॥ ४३ ॥ सर्वदुष्टहननं वधार्थमेव भगवतो जन्मकर्माणीति नास्त्येतत्केवलमिति कथ्यायेनाह ॥ अजस्यापि जन्म
इति त्रयो दमाः ।

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः ॥ वधात्प्रपन्नार्तिजिहीर्षयेशोऽप्युपैक्षता
घं भगवान्कुरूणां ॥ ४३ ॥ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां ॥ नन्वन्यथा र
को ऽर्हति देहयोगं परो गुणानामुत कर्मतंत्रं ॥ ४४ ॥ तस्य प्रपन्नाखिललोकपानामवस्थितानामनुः
शासने स्वे ॥ अर्थाय जातस्य यदुष्वजस्य वार्तां सखे कीर्तय तीर्थकीर्तेः ॥ ४५ ॥ ॥ ॥ ॥

अकर्तुः कर्माणि पुंसां ग्रहणाय कर्मसु प्रवृत्तये ॥ अन्यथा न चेदेवं तर्हि भगवतो जन्मादिकथा तावदास्तां र
को वान्योऽपि गुणानां परो गुणातीतो देहयोगं कर्मविस्तारं वाऽर्हतीति ॥ तस्मादेवंभूतां स्वेच्छया मायाविनोदरूपक
थां कथयेत्याह ॥ तस्य प्रपन्ना ये प्राखिललोकपालास्तेषामवस्थितानां च स्वीये अनुशासने स्थितानामर्थाय प्रयोजना
य यदुषु जातस्य तीर्थं संसारवनतारिणी कीर्तिर्यस्येति ॥ ४५ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हृष्यायाः किंच कृपालेशहेश्च यतस्तस्याः पांडुनाविनाप्राणधारणमेवाश्चर्यमित्याह ॥ अहोइति ॥ म्रियतेजीव
तितवाअन्याश्चर्यंयतोअर्भकार्थे म्रियतेनभोर्थेनयापिवाश्चर्यमेवेत्याह ॥ तेनतथाभूतेनविनातदेवाह ॥ य१
स्मिन्नित्यत्रैवद्वितीयंसहायोयस्यहृष्याअर्भकार्थेजीवतीतिप्रश्नमेवेत्याह ॥ ४ ॥ द्रैतोस्यांतंसहूतस्तांजीवंतम
नुशोचामि ॥ तत्किमथःपंतंतंतत्रदेहेनःपरेतायमृतायभ्रात्रेपांडवे तम्पुत्रद्रोहेरणयोविडडुहेद्रोहंकृतवान्

अहोहृष्यायिम्रियतेर्भकार्थेराजर्षिवर्येणविनापितेन ॥ यस्त्वेकवीरोधिरथोविजिग्येधनुर्द्वितीयः
ककुभश्चतस्रः ॥ ४ ॥ सोस्यानुशोचेतनयःपतंतंभ्रात्रेपरेतायविडडुहेयः ॥ निर्यापितोयेनसु१
हृत्स्वपुर्याअहंस्वपुत्रान्समनुव्रतेन ॥ ४१ ॥ सोहंहरेर्मर्त्यविडंबनेनदृशोनृणांचालयतोविधातुः
नान्योपलक्ष्यःपदवीप्रसादाच्चरामिपश्यन्गतविस्मयोत्र ॥ ४२ ॥ ॥ ॥ ॥ श्री ॥ ॥

किंचजीवितोपिभ्रातृमेमापकृतवानित्याह ॥ येनसुहृद्भ्राता ॥ अहंस्वपुर्याःसकाशात्निर्यापितःविवासितः
४१ ॥ अहोखलुविस्मयोजाततोपितस्यैवंदुश्चेष्टितं ॥ यतःत्वंसाधुरपिडःख्यापितोसीत्यतआह ॥ सोहंहरेः
प्रसादात्तस्यपदवीमाहात्म्यंपश्यन्गतविस्मयः ॥ अत्रभूतलेनान्योपलक्ष्यःसर्वंविचरामि कथंभूतस्यम
र्त्यविडंबनेनपैश्वर्याच्छादनेनमानुष्यानुकरणेननृणांदृशःचित्तवृत्तीःचालयतःभ्रामयतः ॥ ४२ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भार·
टी·
५

द्ध्यानी जातृसृष्टु निवद्धिः अपि किं स्वदोर्भ्यां वा कृवन् वर्त्तमानाभ्यां विजयाच्युताभ्यां अर्जुनेन कृष्णाभ्यां तथ मर्मार्गेणथ
मोधुधिष्ठिरः मेनं धर्ममर्यादां पवित्यानि यस्य स भार्यां विजयाच्युतम्याजयपं दे यस्या अर्जुन स्वमेव यंतिवा एवं भूतं य
मेस्वयं तुल्यश्चेः ॥ २८ ॥ तावै दुकृतानायकावेषु ऊरुषु स्वकर्तृक मचेदी वेन मंत्र कृकाल विंतितं अहिवदस्य मर्षी
भीमः किं अस्मं वज्रो वा गदाया वि विचित्रं विविधं मार्गं चरतः ॥ ३० ॥ तथा पृथ्यया नाम यशोयशोधया कीर्तिधारी यद्वा र

अपि स्वदोर्भ्यां विजयाच्युताभ्यां यथेमेणाय धर्मः पवि पातिमेतं ॥ दुर्योधनो नश्यति यस्य भार्यां सा स्वाज्यल
द्रुम्या विजयाच्युतभ्या ॥ २९ ॥ किं वा कृतान्वेषुव मनस्म मर्षी भीमो हि वद्वीर्यवनमंत्रं मंचन् ॥ यस्यां विपा
नेर्वणा मूर्तमेमेष्टे मार्गं गदाया स्वरतो विचित्रं ॥ ३० ॥ कच्चिद्यशो धारयथ्य स्मृथ्यया नाम गांडीवधन्वोपरता
विरोक्ते अस्ति दिनोयच्छुरं क्रूरं गूढ़ो मायाकिरातो गिरिशस्तुतो य ॥ ३१ ॥ यमौ तु नस्विन्नयोः
छायाः पार्थैर्न नोपजन्मभिरदिनिणी वैमानुद्याय स्वयेस्व रिकर्म्यं य नन्तयणी विवव ज्विवक्रान्तु ॥ ३२

स्वीयानां तेषां कीर्तिप्रदः उपचरता अर्द्धयोयस्मात् यस्य स्पष्टार्थकूटेन वाणसमूहेन गरूफ प्राच्छन्नः ॥ ३१ ॥ उतस्वित्किं
स्वित् । यमौ नकुलसहदेवौ रेमाते क्रीडते उभयर्थः ॥ मार्द्रसाः स्तनावपिप्प्यायाः स्तनावपिप्यायाः पुत्रे हेतो स्वयं र
सोविबुधेरमाते । किं हत्वा अपमानात् दुर्योधनात् स्वविक्त्य स्वीयं राज्यं उद्दाय अग्रान्तिण्यवज्रिवज्राद्दिं दृष्टमस्त्वोतत्
स्वविक्य समृद्धं तं गरुडुद्धुवेति । यद्वा सुपर्णो विवेति । यदि हो गरुडो अमृत मानयेता नर्हिं तद्धतं अर्णी वेनिमणी

॥ श्री ॥ उद्योगपर्व ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देवकन्या मायो भोजः तस्य पुत्र्या देवक्याः विष्णुः प्रजा पुत्रो यस्याः तस्या देवमातुरदितेरिव कच्चिच्छिवं ॥ यत्त विनानः
मर्थं त्रयी यथा प्रकाशकतया बिभर्ति तथा दधार ॥ २३ ॥ सात्वतानामुपासकानां कामान्वदो ... यिथ सूर्यतीतिका
मदुघः भगवांस्तु देवः यं शास्त्रस्य शास्त्रस्य योनिं कारणमामनंति देवाः ऊतः मनोमयं मनसः प्रवर्तकं तत्त्वतः स
त्वस्य अंतःकरणस्य वर्तविषस्य ... तरीयं तत्त्वं वत्तर्यमधिदैवं चित्ताहंकारबुद्धिमनसां अंतःकरणभेदा
नां क्रमेण वासुदेवसंकर्षणप्रद्युम्नानिरुद्धा अधिष्ठातारः मनस्तु शास्त्रयोनित्वे प्रसिद्धं मनः सर्वं तृप्यं वा सत्त्वरत्

कच्चिच्छिवं देवकभोजपुत्र्या विष्णुप्रजाया उत देवमातुः ॥ या वै स्वगर्भेण दधार देवं त्रयी यथा यस्त
विनान मर्थं ॥ २३ ॥ अपि स्विदास्ते भगवान्सुखं वो यः सात्वतां कामदुघोनिरुद्धः ॥ यमामनंति स्म हि
शास्त्रयोनिं मनोमयं सत्वतुरीयतत्त्वं ॥ २४ ॥ अपि स्विदन्ये च निजात्मदैवमनन्यवृत्त्या समनुव्रता ये ॥ हृदी
कसत्यात्मजचारुदेष्णगदादयः स्वस्ति चरंति सौम्य ॥ २५ ॥ ॥ ॥

यं वेनि तथा अन्ये वां तदात्मा मनोमय इति प्रसक्त्यत्तस्य यजुरेव शिरः ऋग्दक्षिणः पक्षः सामोत्तरः पक्ष इत्यादि
श्रुतेः ॥ तथा च शिक्षायां ॥ आत्मा बुद्ध्या समेत्यार्थान्मनो युंक्ते विवक्षया मनः कायाग्निमाहंति स प्रेरयति
मारुतमित्यादि ॥ २४ ॥ अपि स्विदिति किं स्वित् अन्ये च स्वस्ति चरंति निजस्य देहादिव्यतिरिक्तस्यात्मनो दैवं श्रीकृष्ण
मनन्यवृत्त्या एकांतभक्तिभावेन ये समनुव्रता अनुवृत्ताः स्तनाः हृदीकस्तु सत्यभामायामात्मजः चारुदेष्णः
चारुदेष्णश्चेति पाठः आदिर्येषां तेपि ॥ २५ ॥ ॥

मारुतं स्ताहमनस्तूरसि चरन्मंद्रं २

श्री भाग टी ४

पुष्टमंगमालेश्वस्तुतिनवभिः ॥ भामः श्रन्यः शौरिर्वसुदेवः ॥ यद्वा भामो भगिनीभर्ता कुंतीवसुदेवस्य भगिनी ॥ अतो
देवकीपांडोर्भगिनीति लोकव्यवहारः ॥ वरानर्थान्वदत्यः सत्पुत्रादः वराणां तत्पतीनां तर्पणेन संतोषणेन सह
१७ ॥ वरूथाधिपतिः सेनानीः आदिसर्गे पूर्वजन्मनि स्मरं कामं सं तं अभिलेभे पुत्रं लब्धवती ॥ १८ ॥ सात्वतादीनाम
धिपउग्रसेनः प्रानयन्नेवः श्रीकृष्णः नृपासनाशां राज्याभिलाषं परित्यज्य प्राणभयेन दूरे स्थितमित्यर्थः ॥ १९ ॥

कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमंग शौरिः ॥ यो वै स्वसॄणां पितृवद्ददाति वरा
न्वदान्यो वरतर्पणेन ॥ १७ ॥ कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः ॥ यं रुक्मिणी भ
गवतो भिलेभे आराध्य विप्रान्स्मरमादिसर्गे ॥ १८ ॥ कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणा
मधिपः स आस्ते ॥ यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् ॥ १९ ॥ कच्चिद्धरेः सौम्य सु
तः सदृक्ष आस्तेग्रणी रथिनां साधु सांबः ॥ असूत यं जांबवती व्रताढ्या देवं गुहं योंबिकया धृतोग्रे
२० ॥ क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः ॥ लेभेंजसाधोक्षजसेवयैव गतिं
तदीयां यतिभिर्दुरापां ॥ २१ ॥ कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः ॥ यः कृष्ण
पादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ॥ २२ ॥

हे सौम्य हरेः सुतः तेन सदृक्षः सदृशः साधु सुखमास्ते गुहं स्वामिकार्तिकेयं अग्रे पूर्वजन्मनि यो अंबिकया गर्भे धृ
तस्तं ॥ २० ॥ युयुधानः सात्यकिः क्षेमं कुशलमास्ते फाल्गुनादर्जुनाल्लब्धं धनुर्वेदरहस्यं येन तदीयां भगवत्संबं
धिनीं ॥ २१ ॥ श्वफल्कपुत्रोऽक्रूरः बुधो विद्वान् ॥ अतो भगवंतं प्रपन्नः अतएव सन् अनमीवः निरामयः भ
क्तो लिंगयो चेष्टत अचलठत ॥ प्रेम्णा विभिन्नं विदीर्णं धैर्यं यस्य सः स्वस्ति क्षेममास्ते ॥ २२ ॥ ॥ श्री ॥ ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततश्च मारेषु परस्परं स्पर्धया निमित्तभूतया स्वस्व हरां कौरवाणां विनष्टिं विनाशमस्मरणात् ॥ परस्परं नाशो हृष्टांतः वे
णुजं वह्निं संश्रयते यद्वनं तद्यथा दग्धं भवति तथा प्रत्यक उद्गमाभिमुखं ॥ २१ ॥ त्रिताद्दीनामेकादशानां तीर्थानि
तत्र त्राश्रा प्रसिद्धान्यासेवितवान् ॥ २२ ॥ हिजदेवैः संघिभिर्देवैश्च कृतानि श्रंगमुंगेश प्रतिवं तेते इति प्रसंगान्यापु
यानि तेषु स्थानेषु चक्रं तेनो कितानि मूर्धन्य हेमकुंभेषु चिह्नितानि येषु तानि नानाविधानि विस्मोरायतनानि दे
वालयानी थानि चाभिषेके येषां चक्रांकितमंदिरस्वतां दर्शनात् ॥ २३ ॥ प्रतिव्रज्य प्रतिक्रम्य यावदुद्धवः शामः ताव

तदायमुष्पावसत्तद्दिनष्टिं वनेयथा वेणुजवह्निसंश्रयं ॥ संस्पर्धया दग्धमथानुशोचन्सरस्वतीं प्रत्यगि
याय तूष्णीं ॥ २४ ॥ तस्यां चितस्योपानसोमनोस्पृष्टयोरथाश्रेष्मित स्ववायोः ॥ तीर्थं सदा मस्यावोशुह
स्पयक्रुद्दहदेवस्य सत्रासिषेवे ॥ २५ ॥ अन्यानि वेदृहिजदेवदेवैः कृतानि नानायतनानि विस्मोः ॥ प्रत्यंग
मुख्यांकितमंदिराणि यद्दर्शनात्कृष्णमनुस्मरंति ॥ २६ ॥ ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कु
रुजांगलांश्च ॥ कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भागवतं ददर्श ॥ २७ ॥ स वासुदेवानुचरं प्रशांतं बृह
स्पतेः प्राक्तनयं प्रतीतं ॥ आलिंग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद्भगवत्प्रजानां ॥ २८ ॥ कच्चित्पुराणौ
पुरुषौ स्वनाभ्यपद्मानुवृत्येह किलावतीर्णौ ॥ आसात उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे ॥ २९

इयमपि यमुनामुपेत्य सविदुरः ॥ प्राक्तनयं पूर्वं शिष्यं नीतिशास्त्रे पाठं तेनेशमोनयो नीतिशास्त्रं येन तं प्रतीतं प्र
ख्यातं स्वानां ज्ञातीनां भद्रमपृच्छत् प्रश्नं हेतुः भगवतः प्रजानां पोष्याणां ॥ २७ ॥ प्रथमं तावद्रामकृष्णयोः कुश
लं पृच्छति ॥ कच्चिदिति पुराणौ स्वनाभो भवः स्वनाभः पद्मः ब्रह्मा तस्यानुवृत्या प्रार्थनया इहावतीर्णौ कुशलमासा
ते वर्तेते कृतक्षणोद्धावसुरौ सर्वेषां कृतोत्सवाविति वा ॥ तयोर्नित्य कुशलत्वेपि उक्त विशेषणविशिष्टौ शूरसेनस्य
गृहे कच्चिदिति आसाते इति प्रश्नः ॥ २९ ॥ ॥

निना २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ८९

न च मुक्तिरात्मज्ञानादेव न तु तत्त्वलक्षणज्ञानात् तमेव विदित्वातिमृत्युमेतीति श्रुतेः ॥ अत आह ज्ञानमिति आत्मदर्शनं च हृ
यज्ज्ञानेन अत एव तत् हृदयग्रंथिभेदनं अहंकारनिवर्तकं प्रकृतिर्येयो निःश्रेयसमिति सांख्याः निःश्रेयसप्रयोजनाय यदाहुः
तत्त्वेव गणयामि तत्त्वलक्षणज्ञानादेव विविक्तात्मज्ञानं भवतीति भावः ॥ २ ॥ तत्र पुरुषलक्षणमाह अनादिरिति आ ... केवलपुरुषः
तत्त्वेव गणयामि तत्त्वलक्षणज्ञानादेव विविक्तात्मज्ञानं भवतीति भावः
पुरि पुरि शेत इति कोसावात्मा प्रत्यक्षप्रतिलोमधामतेजः स्फूर्तिर्यस्य तस्मात् कुपतेव्यावर्तयति अनादिरिति निरुपाधिः
प्रकृतिस्तु सूक्ष्मामिति ॥ तथापि चोक्तं सांख्यैः सोऽस्य तत्र उपलब्धिनीभावकार्यतस्त उपलब्धेः महदादि तच्च कार्यं प्र
कृतिविरूपं चेति त्रिगुणत्वादित्वात् ॥ सारूप्यञ्चादिहेतुमतः प्रकृतिरहेतुमतो इति विरूपं संसारिकपरव्यावर्त
यति प्रकृतेः परः अयोऽसंगः स्वादिगुणाकर्तेवाभयति गुणाः ॥ ता ते तस्य स्वरूपमवमीमांसकाद्यभिमतं ज्ञानवि

ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनं ॥ यदाहुर्वर्णये तत्ते हृदयग्रंथिभेदनं ॥ २ ॥ अनादिरात्मा पुरुषो नि
र्गुणः प्रकृतेः परः ॥ प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितं ॥ ३ ॥ स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं
विभुः ॥ यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥ ४

मीमांसकः
षयत्वं वारयति स्वयंज्योतिः अनेन प्रभाकराभिमतं ज्ञा
नाधारत्वेन स्फुरणमिति निरस्तं स्वयंज्योतिष्ट्वे हेतुर्विश्वं येन समन्वितं प्रकाशत इति शेषः ॥ एतैर्विशेषणैरभि
पुरुषस्य प्रकृतेः परत्वमपि सिद्धं ॥ ३ ॥ आवरणविक्षेपशक्तिभेदेन प्रकृतिर्द्विविधा तत्रावरणशक्त्यात्मसेनोपाधि
रविद्याविक्षेपशक्त्यात्मा सैव माया पारमेश्वरी पुरुषश्च जीवेश्वररूपेण द्विविधः तत्राद्यः प्रकृत्यविवेके न संसरति स
जीवोऽयस्तु प्रकृतिं वशीकृत्य विश्वसृष्ट्यादि करोति स परमेश्वरः ॥ शरीरादिकार्योपाधिरयं जीवः
कारणोपाधिरीश्वरः स ईशो यद्वशे मायेति जीवो यस्तयार्दितः ॥ तत्र प्रकृत्यविवेकेन जीवस्य संसारप्रकारमाह स
एष इति पंचभिः सूक्ष्मामव्यक्तां दैवीं देवस्य विष्णोः शक्तिं लीलयोपगतां यदृच्छयैवाभ्यपद्यतेत्यन्वयः ॥ ४ ॥

वजीर

सद्रूपं २ ८९

मर

एवंभूतानां मुक्तिं एकांतभक्तेभ्यो ददामीत्याह इममिति द्वाभ्याम् २

उभयायिनं लोकद्वयगामिनं आत्मानं सोपाधिकं आत्मानमनु ये पुत्रकलत्रादयः ये च पश्वादयो रायः धनानि ३९ ॥ अतिपारये ४० ॥
अन्यांश्च परिग्रहान् मृत्योः संसारात् अतिपारये अतितारयामि ॥ ४१ ॥ अभक्तानां तु कथं विदपि न मोचयाम्यहम् ॥
मद्भगवतो नान्यत्र भगवतो मत्तो विना सर्वभूतानामात्मनः भगवदादिविशेषणत्रयेण सामर्थ्यं
निरूपितं हितकारित्वं चोक्तं ॥ ऐश्वर्यं स्फुटयति ॥ भीषास्माद्वातः पवते भीषोदेति सूर्यः ॥ भीषास्मादग्निश्चेन्द्रश्च
मद्भयादिति १

इमं लोकं तथैवामुम् आत्मानमुभयायिनं ॥ आत्मानमनु ये चेह ये रायः पशवो गृहाः ॥ ३९ ॥ विसृज्य सर्वा-
नन्यांश्च मामेवं विश्वतोमुखं ॥ भजन्त्यनन्यया भक्त्या तान्मृत्योरतिपारये ॥ ४० ॥ नान्यत्र मद्भगवतः प्रधानपु-
रुषेश्वरात् ॥ आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ॥ ४१ ॥ मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात् ॥
वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ॥ ४२ ॥ ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः ॥ क्षेमाय पा-
दमूलं मे प्रविशन्त्यकुतोभयं ॥ ४३ ॥ एतावानेव लोकेऽस्मिन्पुंसां निःश्रेयसोदयः ॥ तीव्रेण भक्तियोगेन
मनो मय्यर्पितं स्थिरं ॥ ४४ ॥ इति श्रीभागवते तृतीये पंचविंशः ॥ २५ ॥ श्रीभगवानुवाच ॥ अथ ते संप्र-
वक्ष्यामि तत्त्वानां लक्षणं पृथक् ॥ यद्विदित्वा विमुच्येत पुरुषः प्रकृतेर्गुणैः ॥ १ ॥

इत्थं मन्तव्यं वर्तितव्यं च मद्भयादिति ॥ ४३ ॥ मद्भजनादेव मोक्ष इति ॥ अथ सदाचारं प्रमाणयति तावनेति उपसंहरति एतावानिति
॥ ४४ ॥ मय्यर्पितं सन्मनः स्थिरं भवतीति यत् एतावानेव ॥ ४४ ॥ इति श्रीभावार्थदीपिकायां तृतीये पंचविंशः ॥ २५ ॥ षड्विंशे प्र-
कृत्यात्मविवेकाय प्रवर्ण्यते ॥ सांख्येन सर्वभावानां जन्मलक्षणभेदतः ॥ धात्रा पुत्राय यशोक्तं तत्रैव मिश्रास्ते नवधर्म-
माज्ञे सांख्यं तरां व्याख्यातं प्रधानेनाह तत्त्वानामिति ॥ तत्त्वा प्रायं यस्य वदंति मोक्षमार्ग भक्तियोगात्रिति त्रयस्य पवित्रं नवम॰

तस्या लीलामाह ॥ गुणैरिति तत्त्वं गूहति आवृणोतीति ज्ञानगूहा तया यथा च श्रुतिः ॥ अजामेकां लोहितकृष्णां ब
ह्वीः प्रजा जनयंतीं सरूपां अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः इति श्रुतेः आत्मनावेस्व
तवान् पराभिध्यानेन प्रकृत्यध्यासः अन्यस्मिन्नन्यधर्मावभासोध्यासः तेन प्रकृतेर्गुणैः कर्मसु क्रियमाणेषु क
र्तृत्वमात्मनि मन्यते ॥६॥ तदिति कर्तृत्वमननमेवास्य पुरुषस्य साक्षिमात्रत्वादकर्तैव मतः कर्मभिर्बंधः ईशस्य
स्वतंत्रस्यैव कर्मबंधकृते भोगे पारतंत्र्यं निर्वृतात्मनः सुखात्मकस्यैव संसृतिर्जन्ममृत्युप्रवाहः ॥ प्रकृत्याविवेक
कृतमेतत्सर्वं भवतीत्यर्थः ॥७॥ ननु चैतन्यस्य सामानाधिकरण्येन ॥ एवं कर्तृत्वादिप्रतीतेर्वा पश्चात्तीप पुरुषस्य प्रकृतिका

गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ॥ विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥५॥ एवं पराभि
ध्यानेन कर्तृत्वं प्रकृतेः पुमान् ॥ कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥६॥ तदस्य संसृतिर्बंधः पारतं
त्र्यं च तत्कृतं ॥ भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥७॥ कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः
भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम् ॥८॥ देवहूतिरुवाच ॥ प्रकृतेः पुरुषस्यापि लक्षणं पुरुषो
त्तम ॥ ब्रूहि कारणयोरस्य सदसच्च यदात्मकं ॥९॥

रणं विदुः कूटस्थस्य स्वतो विकाराभावात् ॥ प्रकृतिपरिणामभूतदेहाद्यहंकारकृतमेव कर्तृत्वादिकमित्यर्थः
भोक्तृत्वे पुरुषं कारणं विदुरित्यस्यायं भावः ॥ यद्यप्यहंकारगतमेव कर्तृत्वादिकमित्यर्थः ॥ भोक्तृत्वे तु पुरुषं का
रणं विदुरित्यस्यायं भावः ॥ यद्यप्यहंकारगतमेव कर्तृत्वादिके भोक्तृत्वे च ॥ तथापि विकारस्य जडत्वात्स्वानन्दत्वादुपा
धिप्राधान्येन भोगस्य चिदंशान्वयात्तदुपहितत्वं यथाध्यासमिति ॥८॥ तदेवं संसारिणं पुरुषं तद्धेतुं प्रकृतिं च ज्ञात्वेदानीं ज
गत्कारणमीश्वरं तत्स्वरूपं च पृच्छति प्रकृतेरिति ॥ अस्य विश्वस्य सदसच्च स्थूलसूक्ष्मं च कार्यं यदात्मकं तयोः प्र
कृतिपुरुषयोः ॥९॥

वि २
अन्यधर्माध्यासः

तत्स्यैव तत्कृतमिति
यत्नेनेत्याह का
र्यं शरीरं कारणमि
न्द्रियं कर्तृ देवता
वर्गो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्प्रकृतिं लक्षयति यत्तत्प्रधानं तदेव प्रकृतिं प्राहुः ॥ किं तत्प्रधानं यतो विशेषं सत्वरजस्तमसां साम्यावस्थाः इति वचना-
त् विशेषवत् विशेषैर्गुणैर्महदादिकार्याणामाश्रयत्वात् ॥ किं तत् त्रिगुणं सत्वरजस्तमोमयं त्रयो गुणाः यस्य तत् अव्यक्तं स-
त्वादीनामात्मगुणानेनित्यं किं महत्त्वादीनामकार्यं महत्तत्त्वं कार्यमिति भावः किं कलादि नित्यं सदसदात्मकं
कार्यकारणरूपं किं जीवः प्रकृतिः नित्यं प्रधानमित्यर्थः ॥१०॥ प्रधानस्य तत्त्वानां लक्षणं च तत्त्वानि गणयति पंचभि-
र्महाभूतादिसंख्याभेदे नवतत्त्वचतुर्विंशतिकं एतानि चतुर्विंशतितत्त्वानि गणो प्राधानिकं प्रधानकार्यात्मकं ब्रह्म
विदुः ॥११॥ एतदेव गणो विभजन्महाभूतानीति त्रिभिः तावंति पंचैव ॥१२॥ संकल्पविकल्पात्मकं मनः निश्चयात्मिका बु-

श्रीभगवानुवाच यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकं ॥ प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥१०॥
पंचभिः पंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा ॥ एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ॥११॥ महाभूतानि पंचैव
भूरापोग्निर्मरुन्नभः तन्मात्राणि च तावंति गंधादीनि मतानि मे ॥१२॥ इंद्रियाणि दश श्रोत्रं त्वग्दृग्रसन
नासिकाः वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते ॥१३॥ मनो बुद्धिरहंकारः चित्तमित्यंतरात्मकं चतु-
र्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥१४॥ एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह ॥ सन्निवेशो मया प्रो-
क्तो यः कालः पंचविंशकः ॥१५॥ प्रभावं पौरुषं प्राहुः कालमेके यतो भयं ॥ अहंकारविमूढस्य कर्तुः प्रकृ-
तिमीयुषः ॥१६॥ प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि ॥ चेष्टा यतः स भगवान्काल इत्युपलक्षितः ॥१७॥

द्धिः अंतरात्मकमंतःकरणं लक्षणरूपया असाधारणवृत्त्या मनसो वृत्तिः संकल्पो बुद्धेर्निश्चयः अहंकारस्या-
भिमानो चित्तस्य चिंता एतावानेव संख्यातः गणितः तत्त्वसंख्यालेन मतद्वयमाह यः कालः स एव पंचविंशकः प्र-
कृतेरेवावस्थाविशेषः इत्यर्थः ॥ यद्वा पूरुषः इति प्रसिद्धः कालः पंचविंशकः ॥१५॥ पक्षांतरमाह प्रभावं पौरुषं ईश्वरस्य प्रभा-
वं प्रभावलक्षणं विक्रमं कालमाहुः तमेव कालं हेतुलक्षणया लक्षयति यतः भयं भवति कस्य प्रकृतिमीयुषः प्राप्तस्य अतएव
देहे आत्माभिमानिनः अहमेवं कर्तेति अहंकारेणाविमूढस्य अनेन संहारकत्वेन लक्षितः इत्युक्तं तेनैव लक्ष्यति-

अंतःसर्वप्राणिनांयःपुरुषरूपेणनियंतृत्वेनसमन्वेतिसम्यक्॥ नहिकालरहितएवानुस्यूतोवर्ततेबहिश्च
कालरूपेणैवभगवान्॥ यद्वा यःपुरुषइतिप्रसिद्धः॥ सकालः॥ पंचविंशकः॥ एकेनपुरुषस्यप्रभावेणका
लमाहुः॥ प्रभावस्यैवलक्षणंपुनर्द्वितिपुरुषस्यैव कालत्वेहेतुःप्रकृतेरिति॥ उभयथाविवक्षायांहेतुः
अन्तरितिपौरुषंसमानेनदैवंप्रकृतेः॥ चतुर्विंशतिभेदाः जीवेश्वरयोःवैक्यविवक्षया षड्विंशतिर्भवंति॥ उ
देनैतत्त्वानामनुस्मृतिःपूर्वंकेलक्षणान्याह॥१७॥ एतानामसंहत्येनतःप्राक्तनेनग्रंथेनविवृतस्यैवाहेति एवंकेल
क्षणमाहचतुर्भिःदैवात्क्षोभिताद्वक्षुभितधर्मिगुणाःयस्यांयोनौप्रभिव्यक्तिस्थानेप्रकृतौवीर्यंचिच्छक्ति
साप्रकृतिर्महत्तत्त्वमसूत महतःस्वरूपमाहहिरण्मयंप्रकाशबहुलम्॥१९॥ विश्वमहंकारादिप्रपंचमा

अंतःपुरुषरूपेणकालरूपेणयोबहिः॥ समन्वेत्येषसत्वानांभगवानात्ममायया॥१८॥ दैवात्क्षु
भितधर्मिण्यांस्वस्यांयोनौपरःपुमान्॥ आधत्तवीर्यंसासूतमहत्तत्वंहिरण्मयम्॥१९॥ विश्वमा
त्मगतंव्यंजन्कूटस्थोजगदंकुरः॥ स्वतेजसापिबत्तीव्रमात्मप्रस्वापनंतमः॥२०॥ यत्तत्सत्वगुणंस्व
च्छंशांतंभगवतःपदम्॥ यदाहुर्वासुदेवाख्यंचित्तंतन्महदात्मकं॥२१॥ ॥ ॥

त्मगतंस्वस्मिन्॥ सूक्ष्मरूपेणस्थितंव्यंजन्महान्तमोपिबत्॥ कूटस्थोलयविक्षेपशून्यः॥ आत्मानंप्रस्वा
पयतीतितथा यत्सर्वप्रलयसमयेमहत्तत्त्वंप्रकृतौविलापयामासेत्यर्थः॥ प्रसंगात्चतुर्थव्यूहोपासनमाह॥ २
सर्वोपासनप्रसिद्धत्वमाह॥ स्वच्छंशांतंरागादिरहितंभगवतःपदमुपलब्धिस्थानंमनएववासुदेवाख्यंय
दाहुःअयमर्थःअभिभूतरूपेणतत्स्यैवमहानितिसत्ताख्यात्मरूपेणचित्तमितिउपास्यरूपेणवासुदेव
इतिअधिष्ठाता तत्तस्यदेवता॥ एवमहंकारेसंकर्षणउपास्यःरुद्रोधिष्ठातामनस्यनिरुद्धउपास्यःचं
द्रोधिष्ठाताबुद्धौप्रद्युम्नउपास्यो ब्रह्माधिष्ठातेतिज्ञातव्यं॥२१॥ ॥ ॥ ॥ ॥ ॥ ॥

पंचविंशतिस्त्वानिभवंति तयोर्भेदविवक्षया ४

यत्तदित्यादिना २

विशदं २

बुद्धे २

श्री भाग टी ११२

स्वच्छत्वंभगवद्विंबग्राहित्वंअविकारित्वंलयविक्षेपराहित्यंअपांप्रकृतिःफेणतरंगादिरहितावस्थापरा शांतं
प्रशांतीसायथास्वच्छत्वंपानाचमनादिसामर्थ्यः ॥ अहंकारस्योत्पत्तिपूर्वकंलक्षणमाहत्रिभिः ॥ क्रियाश
क्तिर्यस्यसाक्रियाशक्तिः ॥ त्रैविध्यमाह ॥२३॥ तस्यकार्यमाह ॥ यतोयस्मात्मनआदीनांभवउत्पत्तिः तमित्युपा
स्य स्वरूपमाह ॥२४॥ २५ ॥ कर्तृत्वंदेवतारूपेण करणत्वमिंद्रियरूपेण ॥ कार्यत्वंभूतरूपेण शांतत्वादिकंतुत
त्कारणगुणत्रयरूपेण मनसउत्पत्तिपूर्वकंलक्षणमाहद्वाभ्यां ॥२६॥ संकल्पःचिंतनंविकल्पोविशेषविकल्पः

सहस्रशिर महति ८ २

स्वच्छत्वमविकारित्वंशांतत्वमितिचेतसः ॥ वृत्तिभिर्लक्षणंप्रोक्तंयथापांप्रकृतिःपरा ॥२२॥ महत्तत्त्व
ाद्विकुर्वाणाद्भगवद्वीर्यसंभवात् ॥ क्रियाशक्तिरहंकारस्त्रिविधःसमपद्यत ॥२३॥ वैकारिकस्तैज
सश्चतामसश्चयतोभवः ॥ मनसश्चेंद्रियाणांचभूतानांमहतामपि ॥२४॥ सहस्रशिरसंसाक्षाद्य
मनंतंप्रचक्षते ॥ संकर्षणाख्यंपुरुषंभूतेंद्रियमनोमयं ॥२५॥ कर्तृत्वंकरणत्वंचकार्यत्वंचेतिलक्षणम् ॥
शांतघोरविमूढत्वमितिवास्यादहंकृतेः ॥२६॥ वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत ॥ यत्संकल्प
विकल्पाभ्यांवर्ततेकामसंभवः ॥२७॥ यद्विदुर्ह्यनिरुद्धाख्यंहृषीकाणामधीश्वरं ॥ शारदेंदीवर
श्यामंसंराध्यंयोगिभिःशनैः ॥२८॥ तैजसात्तुविकुर्वाणाद्बुद्धितत्त्वमभूत्सति ॥ द्रव्यस्फुरणविज्ञा
नमिंद्रियाणामनुग्रहः ॥२९॥ ॥

तेयस्यमनसः संकल्पविकल्पाभ्यांकामसंभवोवर्ततेअतिकाम ... लक्षणंवेनोक्तंतेन
प्रद्युम्नव्यूहोत्पत्तिःतस्य संकल्पादिकार्यत्वाभावात् ॥ उपास्यस्वरूपस्यानिरुद्धस्योक्तेः ॥२७॥ शारत्कालीननीलो
त्पलवत्श्यामंशनैःसंराध्यंवशीकर्तव्यंपदग्रहणात् ॥ बुद्धेरुत्पत्तिपूर्वकंलक्षणमाहद्वाभ्यां ॥२८॥ हेसतिद्रव्यस्फुरणंवि
ज्ञानमितिचित्तस्याहंकार्यंप्रत्यक्षंइंद्रियाणामनुग्रहइतिसविकल्पंतानेहृषीकाणामधीश्वरःनियंतातेनत्रिविक

च्छया २

संशयादिः विपर्यासो मिथ्याज्ञानं निश्चयः प्रमाणज्ञानं स्वापो निद्रा प्रमाणविपर्यासविकल्पनिद्रास्मृतयश्चेति
पातंजलोक्तेः इंद्रियाण्यपि व्यनक्ति माह ॥ ३० ॥ तैजसानि तैजसाहंकारजानानि ज्ञानेंद्रियाणां वैकारिकत्वशेकानि
वृत्यर्थमेवकारः द्विविधान्यपींद्रियाणि तैजसान्येवं त्वयः तत्र केनतः प्राणस्येति क्रियस्मात् प्राणस्य क्रियाश
क्तिः बुद्धेश्च विज्ञानशक्तिता अतः प्राणस्य तैजसत्वात् क्रियाशक्तिमतामिंद्रियाणां तैजसत्वं यथा बुद्धेस्तैजसत्वा
त्तृतीयज्ञानशक्तिमतामपींद्रियाणां तैजसत्वमित्यर्थः तन्मात्रोत्पत्तिरेवं क्रमाकाशादिमहाभूतोत्पत्तितः
लक्षणं चाह यं च दशभिः ॥ ३१ ॥ श्रोत्रं त्वक् चक्षुर्जिह्वा घ्राणमित्यादिभिर्विषयोत्पन्नेनं तत्तत्क्षेत्रमात्रं कथ्यानेन

संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च ॥ स्वापश्च कथ्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ॥ ३० ॥ तैजसा
नींद्रियाण्येव क्रियाज्ञानविभागशः ॥ प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ॥ ३१ ॥ तामसाच्च वि
कुर्वाणाद्भगवद्वीर्यचोदितात् शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं च शब्दगम् ॥ ३२ ॥ अर्थाश्रयत्वं शब्दस्य
द्रष्टुर्लिंगत्वमेव च ॥ तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ॥ ३३ ॥ भूतानां छिद्रदातृत्वं बहिरंत
रमेव च प्राणेंद्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम् ॥ ३४ ॥ नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः
स्पर्शोऽभवत्ततो वायुस्त्वक् स्पर्शस्य च संग्रहः ॥ ३५ ॥ ॥

प्रश्रोत्रेति २

त्पत्तिः श्रोत्रेवैस्य नवानशब्दं गच्छति शब्दग्रहणं शब्दस्य लक्षणमाह ॥ ३२ ॥ अर्थाश्रयत्वमर्थवाचकत्वं द्रष्टुर्लिंग
त्वं कुड्यांतरितस्य वक्तुः ज्ञापकत्वं तदुक्तं लिंगे यदुष्टं हृदयोरिति तन्नभसस्तन्मात्रत्वं शब्दस्य लक्षणमित्यन्
वयः ॥ ३३ ॥ छिद्रदातृत्वमवकाशदातृत्वं बहिरंतरं व्यवहारास्पदत्वं प्राणेंद्रियात्मनः प्राणादीनां धिष्ण्यत्वमा
श्रयत्वेनाघ्राणादि छिद्ररूपेण आवृत्तिकार्यमेव लक्षणमेव मनन वा प्राप्य केनचित्क्रमेण तन्मात्रमहाभूतयोरु
त्पत्तिः ॥ द्वितीयेन तन्मात्रलक्षणं तृतीयेन महाभूतलक्षणमित्यनुसंधेयं ॥ ३४ ॥ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ५२

कासान्नत्वक्स्पर्शो स्पर्शसंग्रहः सम्यक्ग्रहणं तु संवलितलिंगत्वात् ॥ यद्वा स्पर्शो स्पर्शसंग्रहोऽस्य ततो भवतीति शेषः ॥ प्रा
हुतस्माञ्चादिस्यादिति मात्राणामन्तरान्तरानुपार्थं मुक्तं ॥ ३४ ॥ स्पर्शत्वं तदूपलक्षणमित्यर्थः ॥ तन्मसृणो वायोस्त
न्मात्रत्वं ॥ ३५ ॥ चालनं वृक्षशाखादेः व्यूहनं मेलनं तृणादेः प्राप्तिः संयोगः द्रव्यस्य गंधवतो घ्राणं प्रति नयास्ते:
स्यादिमनः स्पर्शनं प्रतिपाद्य स्पशोत्रं प्रतिनेतृत्वं सर्वेंद्रियाणामात्मत्वं तम्मपोषकत्वं कर्मणां कार्याणामभिलक्ष
णं भावे ल्युट् कर्मैवाभिलक्षणं ... विग्रहेमकरणं ॥ ३६ ॥ ३७ ॥ द्रव्याकृतित्वं द्रव्यस्याकारसमर्पकत्वं गुण
त्वं द्रव्यसर्जनेन प्रतीतिरित्यर्थः तेन शाहुस्यत्वात् तेजोऽवस्रतिः प्रथमस्य द्रव्यस्य पदादेरपि स्वात् तेजोवस्री

माः ॥ ४२ ॥ मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वमेव च ॥ एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ॥ चालनं व्यूहनं प्राप्तिर्नेतृ
र्द्रव्यशब्दयोः ॥ सर्वेंद्रियाणामात्मत्वं वायोः कर्माभिलक्षणं ॥ ३६ ॥ वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् ॥
समुत्थितं ततस्तेजश्चक्षू रूपोपलंभनं ॥ द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च ॥ तेजस्त्वं तेजसः साध्वि रूप
मात्रस्य वृत्तयः ॥ ३८ ॥ द्योतनं पचनं पानमदनं हिममर्दनं ॥ तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ॥ ३९ ॥ रूपमात्राद्वि
कुर्वाणात्तेजसो दैवचोदितात् ॥ रसमात्रमभूत्तस्मादंभो जिह्वा रसग्रहः ॥ कषायो मधुरस्तिक्तः कट्वम्ल इति नै
कधा ॥ भौतिकानां विकारेण रस एको विभिद्यते ॥ क्लेदनं पिंडनं तृप्तिः प्राणनाप्यायनोंदनं ॥ तापापनोदो
भूयस्त्वमंभसो वृत्तयस्त्वि

तिः स्पष्टत्वं तैवमिति तत्स्वांविशेषउक्तः व्यक्तिसंस्थात्वं द्रव्यस्य यासंस्थासन्निवेशः सैवसमर्पयस्य द्रव्यवीति ता
तया प्रतीतिरित्यर्थः तेजस्त्वं तेजस्तया भासमानत्वं ॥ ३८ ॥ द्योतनं प्रकाशनं पाचनं तंडुलादेः क्षुत्तृड् इच्छा भोजना
द्यपिपासा च तद्वारेण पानमदनं च ॥ ३९ ॥ जिह्वारसनेंद्रियं रसो गृह्यतेनयेति रसग्रहः यद्वा रसग्रहस्ततो भवतीति
शेषः कषायादिभिः लक्षणं पिंडस्य भौतिकानां संसर्गिद्रव्याणां ये एको मधुर एव सन्नेवमनेकथा भिद्यते स रसउक्त
र्थः ॥ ४१ ॥ क्लेदनमाद्रीकरणं पिंडनं मृदादेः पिंडीकरणं तृप्तिः तर्पयितृत्वं प्राणनं जीवनं आपोमयः प्राण इति श्रुतेः आ
प्यायनं तर्द्दैत्यनिवर्त्तकं उंदनं मृदुकरणं नुदनमिति पाठमे पवार्थः भूयस्त्वं कूपादावुद्धृतस्यापि पुनरुद्गमः ॥ ४२ ॥

।।ार

गंधप्राप्नोतीति गंधमाः ॥ ४४ ॥ कर्णेऽसौ मिश्रणीयः यथा अंजनादीनां हिंस्रादि संस्कारेण प्रतिबोधिः इंद्रियः सोऽयं क
सेवादेः श्रोत्रः प्राणवत्रादेः उग्रोलब्धादेः संसर्गिणा द्रव्यावयवानां वैषम्याय पञ्चविभिद्यते समगंधः अन्ययः ॥
जलादिविलक्षणं नयानेरूपे दृष्टा स्थितिः यावता
४५ ॥ ब्रह्मणो भावने प्रतिमादिरूपेण साकारतापादने परिच्छेदकत्वेन सर्वेषां सत्वानां प्राणिनां चतुस्त्वादीनां उद्वे
जलाद्याधारत्वे समतामाकाशादीनां विशेषेण परिच्छेदकत्वेन सर्वेषां च लक्षणेन दर्वेत्याह नभसो गु
दः ॥ यदि प्रविशेषैः प्रकटीकरणं श्रोत्रादीनां शब्दादि ग्राहकत्वमन्त्रे तेषां च लक्षणे ॥ ४७ ॥ ४८ ॥ परस्यका
लविशेषः श्रोत्रं यस्य योऽविषयः गुणविशेषः शब्द्यते दर्शयति परस्येति
गंधमात्रमभूतत्वान्स्पर्शी घ्राणत्वगंधगः ॥ ४४ करेण
रसमात्राहि रूर्वाणादंमसोदैवचोदितात् ॥ गंधमात्रमभूतस्मात्स्पर्शीघ्राणत्वगंधगः ॥ ४४ करेण
दसमात्राहि कुर्वाणादंमसो दैवचोदितात् ॥ रूपं चैकं विविचते ॥ ४५ ॥ भावनं ब्रह्मणः
इति सोऽवध्यप्राणतो ग्राम्यादिभिः पृथक् द्रव्यावयववैषम्यात् पृथक् विविद्यते ॥ ४६ ॥ नभो गुणविशेषोऽर्थो यस्य त
स्थानं धारणं सहिष्णुत्वं सर्वसत्त्वगुणोद्भवः पृथिवीवृत्तिलक्षणं ॥ नभो गुणविशेषोऽर्थो यस्य तत्
च्छ्रोत्रमुच्यते वायोर्गुणविशेषोऽर्थो यस्य तत्स्पर्शनं विदुः ॥ ४७ ॥ तेजोगुणविशेषोऽर्थो यस्य तच्चक्षु
रुच्यते ॥ अंभोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः ॥ भूमेर्गुणविशेषोऽर्थो यस्य स घ्राण उच्यते ॥ ४८
परस्य दृश्यते धर्मो ह्यपरस्मिन्समन्वयात् ॥ अतो विशेषो भावानां भूमावेवोपलक्ष्यते ॥ ५० ॥ एता
न्यसंहत्य यदा महदादीनि सप्त वै ॥ कालकर्मगुणोपेतो जगदादिरुपाविशत् ॥ ५१ ॥ ततस्तेनानुवि
द्धेभ्यो युक्तेभ्योऽण्डमचेतनं ॥ उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ॥ ५२ ॥
रणस्य धर्मः शब्दादि परस्मिन् कार्ये वाय्वादौ कारणत्वयान्तर्दृश्यते अतो भावानामाकाशादीनां विशेषो गुणाः
सर्वे पिशब्दादिः भूमावेवोपलभ्यन्ते न गुणानां तत्रान्वयात् जलादिषु यथान्वयमेव
नसर्वः आकाशे न त्वयान्वया वाटकपवेति एवं कारणान्यानि मूर्त्या कार्योत्पत्तिमाह समार्थैः ॥ ४९ एतान्यसंहत्य
त्यामिलित्वा यदा स्थितानि तदा जगदादिरीश्वरः प्रविशत् सत्तैकत्वेन प्राधान्याभिप्रायेण अत्र प्रवेशसमये
वैषापि विवक्षितनयव ॥ ५१ ॥ अनुविद्धेभ्यः ततभिन्नेभ्यः यस्मात् अंडात् असौ विराट् पुरुषः उदतिष्ठत् ॥ ॥ ॥

सहलुणानां ५
पंचभिः ४४।४५

त्रिभिः २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग द्वि स्क

भगवतो रूपमिति विशेषाख्यमेतदभिप्रायेणात्तस्मिन् यथा प्राप्यतां त्वादिविभागमाह नवभिः ५२ उत्थाय उदासीनं विविक्ताय
यत्तमाविश्य कार्यपिद्धाय महादेवः खं बिभेद ५२ वाण्या सह वह्निरभवत् प्राविशत् नासे निरभिद्येतां
प्राणोन ऊनः सूत्रे स वन घ्राणमभूत्तयोर्नासिकयोरभवदित्यनुषङ्गः ५४ घ्राणादनन्तरं वायुरुद्भूतः घ्राणेन तु निविशे

एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः ॥ तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ५२ ॥ तमाविश्य
महादेवो बहुधा निर्बिभेद खं ५३ ॥ निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् ५२ ॥ वाण्या वह्नि
रथो नासे प्राणोतो घ्राण एतयोः ॥ ५४ ॥ घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः ॥ तस्मात्सूर्यो व्य
भिद्येतां कर्णौ श्रोत्रं ततो दिशः ॥ ५५ ॥ निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः ॥ तत ओषधयश्चा
सन् शिश्नं निर्बिभिदे ततः ॥ ५६ ॥ रेतस्तस्मादाप आसन्निरभिद्यत वै गुदं ॥ गुदादपानोऽपानाच्च मृ
त्युर्लोकभयंकरः ॥ ५७ ॥ हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् ॥ पादौ च निरभिद्येतां गतिः
ताभ्यां ततो हरिः ॥ नाड्योऽस्य निरभिद्यन्त ताभ्यो लोहितमाभृतं ॥ नद्यस्ततः समभवन्नुदरं निरभिद्यत
क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् ॥ अथास्य हृदयं भिन्नं हृदयान्मन उत्थितं ॥ मनस
श्चन्द्रमा जातो बुद्धिर्बुद्धेर्गिरांपतिः ॥ ६० ॥ अहंकारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् ॥ एते ह्यभ्युत्थिता
देवा नैवास्योत्थापनेऽशकन् ॥ ६२ ॥ पुनराविविशुः खानि तमुत्थापयितुं क्रमात् ॥ वह्निर्वाचा मुखं भे
जे नोदतिष्ठत्तदा विराट् ॥ ६२ ॥ अक्षिणी चक्षुषादित्यो नोदतिष्ठत्तदा विराट् ॥ घ्राणेन नासिके वायुर्नो
दतिष्ठत्तदा विराट् ॥ श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट् ॥ ६४ ॥

यत्र सर्वेन्द्रियेष्वपि इष्टं चाभिद्यतामुपलभ्यतामिति यावत् हृदयेऽप्येकवचनार्थः ॥ ततो दिशः प्राविशत् ५५ प्रा
दिशार्धं तदेवं कर्णाः ५६ ५७ स्वराट् इन्द्रः हरिर्विष्णुः ५८ आभृतं जातम् ५९ बुद्ध्यादिषु हृदयमेवाधि
ष्ठानं गिरांपतिः ब्रह्मा ६० चैत्यः क्षेत्रज्ञः अन्वयव्यतिरेकाभ्यां देवेन्द्रियविवक्षार्थं सर्वेषां पुनः प्रवेशमाह नव

यत्र लोकवितानोऽयं रूपं भगवतो हरेः ॥ हिरण्मयादण्डकोशादुत्थाय सलिले शयात् ॥२

त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट् ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ विराट्देहस्य व्यष्टिदेहे दृष्टांतेन दर्शयन् सांख्योक्तकथनस्य प्रयोजनमाह ॥ यद्येति द्वाभ्यां ॥
यमेश्रीपरमेश्वरभक्तिः ततोन्यत्रविरक्तिः ॥ ततो योगप्रवृत्ताधीः एकाग्रचित्तेन ततो यत्तत्त्वावेतेभ्यव्यमानात्मानंदे
त्रंतं स्वस्मिन्नात्मनि कार्यकारणसंघाते विनिश्चिचिंतयेत् ॥ ७२ ॥ इति श्रीभागवतार्थे तृतीये षड्विंशः ॥ २६ ॥ समनोवि
शेततः सम्यग्बहुसाधनयोगात् ॥ प्रकृतेर्विवेकेन मोक्षदर्शनानि निरूप्यतेऽविवेकत्वानेन मोक्षस्वपथपारायिते

नोदतिष्ठत्तदा विराट् ५

रेतसाभिम्भ्रमापस्तु नोदतिष्ठत्तदा विराट् ॥ गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् ॥ ६५ ॥ हस्ताविंद्रो
बलेनैव नोदतिष्ठत्तदा विराट् ॥ विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट् ॥ ६६ ॥ नाडीर्नद्यो लोहिते
न नोदतिष्ठत्तदा विराट् ॥ क्षुत्तृड्भ्यामुदरं सिंधुर्नोदतिष्ठत्तदा विराट् ॥ ६७ ॥ हृदयं मनसा चंद्रो नो बुद्ध्या
ब्रह्मा हृदयं ॥ रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्तदा विराट् ॥ ६८ ॥ चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्य
दा ॥ विराट् तदैव पुरुषः सलिलादुदतिष्ठत ॥ ६९ ॥ यथा प्रसुप्तं पुरुषं प्राणेंद्रियमनोधियः ॥ प्रभवं
ति विना येन नोत्थापयितुमोजसा ॥ ७१ ॥ इति श्रीभागवते तृतीये षड्विंशः ॥ २६ ॥ श्रीभगवानुवाच
प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः ॥ अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् ॥ १ ॥ स ए
ष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते ॥ अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते ॥ २ ॥ तेन संसारप
दवीमवशोऽभ्येत्यनिर्वृतः ॥ प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ॥ ३ ॥

दतिष्ठत्तेनोवि राट्

शुद्धस्यैव पुरुषस्य एवं कं प्रकृत्यविवेकतः संसारमनुसारयति प्रकृतिस्थोऽपीति त्रिभिः ॥ १ ॥ देहस्थोऽपि ना
ते नालिप्यते गुणैस्तत्कृतैः सुखदुःखादिभिर्निर्गुणत्वादकर्तृत्वं ततोऽविकारित्वं तस्मात् ॥ २ ॥ अनिर्वृतः
सन् प्रकृतिसंगकृतैः सदसन्मिश्रयोनिषु देवतिर्यगादिषु संसारपदवीं प्राप्नोति ॥ ३ ॥ ज्य

तमस्मिन्प्रत्यगात्मानं धिया योगप्रवृत्तया भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिंतयेत् ७२ ॥ ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नत्र नहिं प्रवास्तवत्वात्संसृतेः किं तर्हि तद्विषयासेवनत आह ॥ यतो विषयध्यानमनर्थहेतुः ॥ अतो मनो नियंतव्य
मित्याह प्रसक्तमिंद्रियाणां पथि विषयमार्गे तीव्रेणाच्छेन विरक्त्या च नोद्भवा ॥ ५ ॥ भक्तिविरक्त्या ज्ञानेकारणा
निवर्णयन्नाह साधनेन मोक्षप्रकारमाह यद्वदिति यमादिभिर्योगमार्गेरभ्यसतः पुनः एकार्थीकृतेन आत्मान
मुपलभ्य सर्वात्र सत्तमद्वयं परमात्मानं प्रतिपद्यत इति षष्ठेनान्वयः ॥ सत्येन निष्कपटेन भावेन प्रेम्णा ॥ ६ ॥ अ
प्रसंगतः प्रसंगत्यागेन बलीयसा ईश्वरार्पितेन ॥ ७ ॥ विविक्तशरणः एकांतवासी ॥ ८ ॥ असदाग्रहं अहंममे

त्यर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ॥ ४ ॥ अतएव शनैश्चि
त्तं प्रसक्तमसतां पथि भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशं ॥ ५ ॥ यमादिभिर्योगपथैरभ्यसन् श्रद्ध
यान्वितः ॥ मयि भावेन सत्येन मत्कथाश्रवणेन वा ॥ ६ ॥ सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः ॥ ब्रह्मचर्ये
ण मौनेन स्वधर्मेण बलीयसा ॥ ७ ॥ यदृच्छयोपलब्धेन संतुष्टो मितभुङ्मुनिः ॥ विविक्तशरणः शांतो मै
त्रः करुण आत्मवान् ॥ ८ ॥ सानुबंधे च देहेस्मिन्नकुर्वन्नसदाग्रहं ॥ ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ॥ ९
निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः ॥ उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक् ॥ १० ॥ मुक्तलिंगं
सदाभासमसति प्रतिपद्यते ॥ सतो बंधुमसच्चक्षुः सर्वानुस्यूतमद्वयं ॥ ११ ॥ ॥

त्वे २

तो प्रकृतेः पुरुषस्य च दृष्टं तत्त्वं येन तेन ज्ञानेन ॥ ९ ॥ निवृत्ता निवृत्ता बुद्ध्यवस्था जाग्रदादा येन सः अतएव दूरीभू
आत्मानं २ तमन्यदर्शनं यस्य आत्मना अहंकारावच्छिन्नेन शुद्धमुपलभ्य एकस्यैवावच्छेदाभ्यां कर्मकर्तृत्वे दृष्टांतमाह चक्षु
षावच्छिन्नेनार्केण गगनस्थमर्कमिव आत्मदृक् शुद्धमात्मानं पश्यन् ॥ १० ॥ मुक्तलिंगं निरुपाधिकं असति
मिथ्याभूते अहंकारे सदाभासं सद्रूपेणाभासमानं प्रतिपद्यते विशेषमाह सतः कारणस्य प्रधान
स्य बंधुमधिष्ठानं असतः कार्यस्य चक्षुमिव प्रकाशकं सर्वेषु कार्यकारणेष्वनुस्यूतं अद्वयं परिपूर्णं यो अहंकारो परि

व ३ ति वच्छेदान २

यथेति

जलेस्थितस्याभासःसूर्येप्रतिबिंबोयथाग्रहांतर्वतिभित्तौसूर्यरश्मितदाग्रटस्थोगास्थितः पुरुषैर्भित्त्यादौस्थ
लेस्थितेजलस्याभासेनसूर्यप्रतिबिंबेनयथाप्रथमजलस्थस्याभासोवदृश्यतेलक्ष्यतेगगनस्थस्तस्यदृश्यम
थ्यप्रतिबिंबायोगात्स्वार्थेतथाशब्दः यथावित्यर्थः ॥ यथावज्जलस्थितादिविस्थः सूर्योलक्ष्यते ॥ २
एवंभूतेंद्रियमनोभिरवच्छिन्नैः स्वाभासैरात्मप्रतिबिंबैः निर्गुणोहंकारः सन्तोविद्यस्याभासोप्यस्मिन्नेते
नरूपेणलक्षितः ॥ अहंकारस्याभासंविनाविषयाभासात्तत्पत्तेः ॥ अनेनवाहंकारेणसदाभासवतासन्यदृक
परमार्थमात्मेनरूपस्यात्मालक्ष्यत इत्यर्थः ॥ इदानींसुषुप्तिसाक्षित्वेनस्पष्टप्रतिपत्तिमत्रभवतीत्यदर्शयतिद्विभिः

यथाजलस्थस्याभासः स्थलस्थेनावदृश्यते ॥ स्वभासेनतथासूर्योजलस्थेनादिविस्थितः ॥ ७२
एवंविधिहृदहंकारोभूतेंद्रियमनोमयैः ॥ स्वभासैर्लक्षितोनेनसदाभासेनसन्यदृक ॥ ७३ ॥ मृतस्वसे
द्रियमनोबुद्ध्यादिषिहनिद्रया ॥ लीनेषुसत्सुयस्तत्रविनिद्रोनिरहंक्रियः ॥ ७४ ॥ मन्यमानस्तदा
त्मानमनष्टोनष्टवन्मृषा ॥ नष्टेहंकरणेद्रष्टानष्टविन्नश्ववान्नवः ॥ ७५ ॥

मृतान्वे
भूतादिषुइत्सत्सुअसत्तलेपग्रोनिकेननिद्रा लीनेषुसत्स्वयस्तत्रतदाविनिद्रोनिरहंक्रियः ॥ ॥ तमात्मानंप्र
तिपद्यतेइतितत्तोयेनान्वयः ॥ ७४ ॥ नत्वयदितदाविनिद्रसावस्ततर्हिज्ञानात्तत्वप्रयोरिवस्फुटः किंनावभास
तेनवाह ॥ ॥ पूर्वंदृष्टत्वेनसविकल्पतयास्फुटंप्रतीतः सुषुप्तौतुभूतादेरहंकारविषयस्यलीनत्वात्तत
दिषयेहंकारेनष्टेसतिस्वयमनष्टोपिमृषैवात्मानंनष्टवन्मन्यतेयः ॥ अन्यस्यनाशेअन्यस्य नष्टत्वस्य
त्वदृष्टोतः ॥ नष्टविन्नोयथाभ्रांतरोविवशोनष्टवद्भवतीत्यर्थः ॥ नतुसुषुप्तौनकिंचिदवभ्यतेनैवंस्वावम
हम स्वापेनकिंचिदवेदिषमितिविशेषज्ञानंविनाकेवलस्यात्मनः प्रतिसंधानादित्याह ॥ एवमिति ॥ ७५

सदृष्टात्मो
न

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ५५

न च प्रतिसंधत्ते । साहंकारस्य प्रतीतेः । कथं निरहंक्रियमंतेत्याह । [illegible]
॥ साहंकारस्य द्रव्यस्य कार्यकारणसंघातस्य उग्रहः । आकाशानमवस्थानेव । द्रव्यविशेषणत्वयाहंकार वि-
दृश्यत्वाच्च । तद्द्रष्टात्मा न घातितेरिज्ञः । तमात्मानमित्यन्वयः । मुक्तिविरक्तिर्भंस मृयापि विवेके प्रकृतिपुरुषयोः
परस्परत्यागाभावात्कथं मुक्तिरिति पृच्छति । पुरुषमिति द्वाभ्याम् ॥ १६ ॥ व्यतिरेकाभावमात्रे दृष्टांतः ॥ १७ ॥ यथा
व्यतिरेकतोभावः । सत्तानास्तिगंधस्य कदाचिदप्युपलब्धदर्शनात तद्देशांतरे । द्रव्यामिति तद्वत् प्रकृतेः पुरुषस्य

एवं प्रत्यगर्थस्य भावा... मानं प्रतिपद्यते । साहंकारस्य द्रव्यस्य योवस्थानमत आह ॥ १८ ॥ देवहूतिरुवा-
च ॥ पुरुषं प्रकृतिर्ब्रह्मन्न विमुंचति कर्हिचित् । अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो ॥ १७ ॥ यथा गं-
धस्य भूमेश्च न भावो व्यतिरेकतः । अपां रसस्य च यथा तथा बुद्धेः परस्य च ॥ १८ ॥ अकर्तुः कर्मबंधोयं पुरु-
षस्य यदाश्रयः । गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथं ॥ १९ ॥ क्वचित्तत्त्वावमर्शेन निवृत्तं भयमुल्बणं । अ-
निवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते ॥ २० ॥ श्रीभगवानुवाच । अनिमित्तनिमित्तेन स्वधर्मेणामलात्म-
ना । तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरं ॥ २१ ॥ ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा । तपोयुक्तेन
योगेन तीव्रेणात्मसमाधिना ॥ २२ ॥ प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशं । तिरोभवित्री शनकैरग्नेर्यो-

वयस्य च । ततः किमत आह ॥ १८ ॥ ये गुणास्तान् अप्रतियायस्य सतः । तेषु प्रकृतेर्गुणेषु सत्सु पुरुषस्य कैवल्यं । कथ-
मत एव क्वचित्तत्त्वावमर्शेन शायस्यापि संसारभयस्य पुनरुद्भवो दृश्यते । तत्राह क्वचिदिति ॥ २० ॥ न प्रकृतिसंबंधमात्रं बं-
धहेतुः । किं तु गुणेषु जातया सक्तिः । तन्निवृत्तौ सत्यां मोक्षो घटते । क्वचिदुद्भवत्साधनवैकल्यादित्यभिप्रेत्य
साधनातिशयं कथयत्यनिमित्तेति त्रिभिः । अनिमित्तं फलं तन्निमित्तं प्रवर्तकं यस्मिन् । निष्कामेणेत्यर्थः । अमलात्म-
नानिर्मलेन मनसा । श्रुतेन कथाश्रवणेन संभृतया पुष्टया ॥ २१ ॥ दह्यमाना अभिभूयमाना तिरोहिता भवति । एवं

स्कं ३

५५

हरति २

भुक्तोभोगोयस्यानित्यशः सदादृष्टोदोषोयस्याः अतएवपरित्यक्तासतीश्वरस्यापरतंत्रस्यस्वेमहिम्निस्थित
स्यास्यानुदंशनस्यविवेकावस्थायामनर्थहेतुरपिविवेकानंतरंनभवतीतिदृष्टांतमाहद्वाभ्यां ।।२४।। प्रसुप्तस्य
शोबहुनार्थानाविर्भावयतिप्रबुद्धस्यातिबुद्धस्यसंस्कारवशेनस्मरन्नपि ।।२५।। उपसंहरतित्रिभिः ।।२६।। बहुनिजन्मा
नियस्मिन्काले ।।२७।। प्रतिबुद्धार्थोविदितात्मतत्त्वः ।। कैवल्याख्यंस्वस्यानुदेहादिव्यतिरिक्तंस्वरूपंमदाश्रयं
निःश्रेयसंनिरतिशयानंदं ।।२८।। स्वदृशात्मज्ञानेनछिन्नाः संशयामिथ्याज्ञानानियस्य ।। लिंगाद्विनिर्गमेलिंगशरीर

भुक्तभोगापरित्यक्तादृष्टदोषाचनित्यशः ।। नेश्वरस्याशुभंधत्तेस्वेमहिम्निस्थितस्यच ।।२३।। यथाह्य
प्रतिबुद्धस्यप्रस्वापोबह्वनर्थभृत् ।। सएवप्रतिबुद्धस्यनवैमोहायकल्पते ।।२४।। एवंविदिततत्त्वस्यप्र
कृतिर्मयिमानसम् ।। युंजतोनापकुरुतआत्मारामस्यकर्हिचित् ।।२५।। यदैवमध्यात्मरतः कालेनब
हुजन्मना ।। सर्वत्रजातवैराग्यआब्रह्मभुवनान्मुनिः ।।२६।। मद्भक्तःप्रतिबुद्धार्थोमत्प्रसादेनभूयसा ।। निःश्रे
यसंस्वसंस्थानंकैवल्याख्यंमदाश्रयं ।।२७।। प्राप्नोतीहांजसाधीरःस्वदृशाछिन्नसंशयः ।। यद्गत्वाननिव
र्तेतयोगीलिंगाद्विनिर्गमे ।।२९।। यदानयोगोपचितासुचेतोमायासुसिद्धस्यविषज्जतेंग ।। अनन्यहेतु
ष्वथमेगतिःस्यादात्यंतिकीयत्रनमृत्युहासः ।। ३० ।। इतिश्रीभागवतेतृतीयेकापिलेयसप्तविंशः २७

स्वनाशेसतिइत्यर्थः ।।२९।। तदातत्रअणिमादिसिद्धयः अंतरायरूपाभवंतितासुयोगेनोपचितासुसमृद्धासु
नयोरक्ष्योहेतुर्यासांतास्वयदासिद्धस्यचेतोनविषज्जते ।। अंगहेमातः ।। अथतदाअंतमुक्तिकांतायदि
नसंबोधितीयत्रयस्यांगतौमृत्योर्हासोनभवतिविषक्तोनासिद्धोपिमयावशीकृतइतिमृत्योर्हासो ।। मदुक्त
तीत्यर्थः ।।३०।। इतिश्रीभागवतेतृतीयेसप्तविंशः ।।२७।। अष्टाविंशेततोष्टांगयोगेनध्यानपूर्वाभिना ।। सबीजपूर्वादि
निर्बीजंस्वरूपज्ञानमीर्यते ।। भक्तिसंदेपतःप्रोक्ता सबीजमाख्यायविस्तरम् अथाष्टावेवसवीयोगमष्टांगंकपिलोब्रूते

श्री भाग टी ५६

५२

सबीजस्य सालंबनस्य प्रसन्नं सत् ॥ अभ्यस्यमानैर्यमादिभिरन्तरहयाधिकैः ॥ १ ॥ २ ॥ ग्राम्यं वैषयिकं धर्मः तस्मान्निवृत्तिः
मितं च तन्मेध्यं शुद्धं च तस्यादनं भक्षणं मितेनाम ॥ द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत ॥ मारुतस्य प्रचारार्थं चतु
र्थमवशेषयेदिति स्मृतिप्रसिद्धं विविक्तं ॥ विजनं क्षेमं निर्बाधं तस्य स्थानस्य सेवनं यावदर्थः ॥ प्रयोजनं तावन्मात्रः
स चासौ परिग्रहः ॥ प्रसवादौ न्यूनात्याहृतिभिः ॥ ४ ॥ आसनस्य जयेन स्थैर्यं ॥ स्वधिष्ण्यानां मूलाधारादीनां म
ध्ये एकस्मिन्देशे मनसा सह प्राणस्य धारणं ॥ आत्मनो मनसः समाधानमात्माकारता ॥ ६ ॥ असत्पथं सुखवादा

श्रीभगवानुवाच ॥ योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे ॥ मनो येनैव विधिना प्रसन्नं याति सत्पथं ॥ १ ॥
स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनं ॥ दैवाल्लब्धेन संतोष आत्मविच्चरणार्चनं ॥ २ ॥ ग्राम्यधर्मनिवृत्ति
श्च मोक्षधर्मरतिस्तथा ॥ मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनं ॥ ३ ॥ अहिंसा सत्यमस्तेयं यावदर्थपरि
ग्रहः ॥ ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनं ॥ ४ ॥ मौनं सदासनजय स्थैर्यं प्राणजयः शनैः ॥ प्रत्याहा
रश्चेंद्रियाणां विषयान्मनसा हृदि ॥ ५ ॥ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणं ॥ वैकुंठलीलाभिध्या
नं३ नं समाधानं तथात्मनः ॥ ६ ॥ एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथं ॥ बुद्ध्या युंजीत शनकैर्जितप्राणो ह्यतंद्रितः
शुचौ देशे प्रतिष्ठाप्य विजितासन आसनं ॥ तस्मिन्स्वस्ति समासीन ऋजुकायः समभ्यसेत ॥ ८ ॥ प्राणस्य
शोधयेन्मार्गं पूरकुंभकरेचकैः ॥ प्रतिकूलेन वा चित्तं यथा स्थिरमचंचलं ॥ ९ ॥

नादिभिर्यथा विषयाणां पायेरासनादीनि प्रयंच यति षट्भ्यां वितिनि यावत्समाप्तिः ॥ ७ ॥ आसनं कुशाजिनचेलोत्तरं ॥ प्रतिकूल
यथा स्वस्तिकासनेनैव समभ्यसेत प्राणमिति शेषः ॥ ८ ॥ नूनं वांतरादायपादाग्रे जानूर्मध्ये योगिनां यस्वस्थानं स
स्तिकं तदिदं बुधाः ॥ ९ ॥ बाह्यवायोरंतः प्रवेशनं पूरकः प्रवेशितस्य धारणं कुंभकः कृतस्य बाह्ये निःसारणं रे
चकः ॥ प्रतिकूलेन रेचकपूरककुंभकैः ॥ यद्वा इडया पूर्यं पिंगलया रेचनं पिंगलया पूर्यं इडया रेचनमित्येवं प्रतिकूलेन वा प्राणस्य मार्ग

विर्वे

आत्मस्थानानां ४ ॥ ५

यथासुखं विधिः २

५६

श्री
भाग
टी
५८

कीर्तन्यं कीर्तनार्हं तीर्थं यशो यस्य पुण्यश्लोकावलि प्रमुखास्तेषां यशस्करं ॥ समग्राण्यंगानि यस्मिन् ॥ न च्यवते॰
नापयाति न पर्येति ॥ १८ ॥ प्रेक्षणीयं मोहितं लीलायस्य तदेवं समग्रध्यानमुक्त्वा एकैकावयवध्यानमाह ॥ १९
तस्मिंल्लब्धपदं स्थितिः येन तच्चित्तं विशेषेण लक्ष्यं लक्ष्यीकृत्य एकत्र एकस्मिन्नंगे इत्यर्थः ॥ तदेव च पादादिक॰
मेणाह त्रयोदशभिः ॥ २० ॥ सम्यक् चिंतयेत् पादतले ध्वजात्मकानि वज्रादीनि लांछनानि तैराढ्यं पुंश्च कं चावि
लसंतो नखाः तेषां चक्रवालं यस्य ज्योत्स्नाभिराहततमः तेनार्धं तृणात् हृदयांधकारो येन एतत्सर्वमुपादेयावि
मंडले १

कीर्तन्यं तीर्थयशसं पुण्यश्लोकयशस्करं ॥ ध्यायेद्देवं समग्रांगं यावन्न च्यवते मनः ॥ १८ ॥ स्थितं व्रजंतं॰
मासीनं शयानं वा गुहाशयं ॥ प्रेक्षणीयेहितं ध्यायेत् शुद्धभावेन चेतसा ॥ १९ ॥ तस्मिंल्लब्धपदं चित्तं॰
सर्वावयवसंस्थितं ॥ विलक्ष्यैकत्र संयुंज्यादंगे भगवतो मुनिः ॥ २० ॥ संचिंतयेद्भगवतश्चरणारविंदं
वज्रांकुशध्वजसरोरुहलांछनाढ्यं ॥ उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदया
धकारं ॥ २१ ॥ यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ॥ ध्यातुर्मनः
शमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदं ॥ २२ ॥ जानुद्वयं जलजलोचनया जनन्या
लक्ष्म्याखिलस्य सुरवंदितया विधातुः ॥ ऊर्वोर्निधाय करपल्लवरोचिषा यत्संलालितं हृदि विभोर
भवस्य कुर्यात् ॥ २३ ॥

शेषणं ध्येयत्वेनैवोच्यते किंच ॥ २१ ॥ यस्य शौचेन क्षालनेन निःसृतायाः सरित्प्रवरायाः गंगाया उदकेन तीर्थेन संसार
तारकेन मूर्ध्न्यधिकृतेन धृतेन शिवोपि शिवोभूत् अत्यधिकं स्वास्थ्यं प्राप्त इत्यर्थः ॥ ध्यातुर्मनसि यः शमलशैलः
पापपर्वतः तस्मिन्निसृष्टं त्यक्तं वज्रमिव यत् ॥ यद्वा शमलशैलेन निसृष्टं स्वलांछनरूपं वज्रं येन तत् ॥ २२ ॥ विभो जानुद्व
यं जनन्या जेतुं जानुद्वयं स अखिलस्य विधातुर्ब्रह्मणो जननी या लक्ष्मीः तया संलालितं स्पर्शितं तत्र [illegible] संसारवित्त्वामिव पतीजं वा

उत्तुंगाङ्गुष्ठकोः ॥ ४४ ॥

संसेवितं १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ध्मातंसंतप्तमित्यर्थः लोहंसुवर्णंयथामलंत्यजतितथामनोविरजंस्यात् ततःचंचलत्वेनस्यादितिभावः प्राणाया-
मादीनांसमाधौहेतुतामाह ॥१०॥ दोषान्वातपित्तादीन् ॥ संसर्गान्विषयसंगान्अनीश्वरान्रागादीन्
वायुनासहमनसः ॥ स्थिरीकरणंधारणास्थिरस्यचित्तस्यनिःसंग तिध्यानंवृत्तिनिरोधःसमाधिरितिभेदः ॥११॥ सु-
समाहितेस्थिरंजातेकाष्ठांकालोमूर्तिमित्यर्थः ॥ स्वनासाग्रेवलोकनंयस्यएतच्चलयविक्षेपयोःपरिहारा
र्थंध्येयंहरिमाहसप्तभिः ॥१२॥ प्रसन्नंवदनांभोजंयस्यतंध्यायेदितिषष्ठेनान्वयः ॥ पद्मगर्भवदरुणेईक्षणेनेत्रेयस्य

मनोचिरात्स्याद्विरजंजितश्वासस्ययोगिनः ॥ वायुग्निभ्यांयथालोहंध्मातंत्यजतिवैमलम् ॥१०॥ प्राणा-
यामैर्दहेद्दोषान्धारणाभिश्चकिल्विषान् ॥ प्रत्याहारेणसंसर्गान्ध्यानेनानीश्वरान्गुणान् ॥११
यदामनःस्वविरजंयोगेनसुसमाहितं ॥ काष्ठांभगवतोध्यायेत्स्वनासाग्रावलोकनः ॥१२॥ प्रस-
न्नवदनांभोजंपद्मगर्भारुणेक्षणं ॥ नीलोत्पलदलश्यामंशंखचक्रगदाधरं ॥१३॥ लसत्पंकजकिं-
जल्कपीतकौशेयवाससं ॥ श्रीवत्सवक्षसंभ्राजत्कौस्तुभामुक्तकंधरं ॥१४॥ मत्तद्विरेफकलयाप-
रीतंवनमालया ॥ परार्ध्यहारवलयकिरीटांगदनूपुरं ॥१५॥ कांचीगुणोल्लसच्छ्रोणिंहृदयांभो-
जविष्टरं ॥ दर्शनीयतमंशांतंमनोनयनवर्धनं ॥१६॥ अपीच्यदर्शनंशश्वत्सर्वलोकनमस्कृतं ॥ सं-
तंवयसिकैशोरेभृत्यानुग्रहकातरं ॥१७॥

स्यनीलोत्पलश्यामे ॥१३॥ लसत्पंकजकिंजल्कवत् ॥ पीतेकौशेयवाससीयस्यभ्राजन्कौस्तुभेनसंश्लिष्टाकंध-
रायस्य ॥१४॥१५॥ मत्तद्विरेफाणांकलामधुरोध्वनिर्यस्यांतयाआमुक्तपरार्ध्यान्यमूल्यानिहारादीनियस्यकांची
गुणेनोल्लसंतीश्रोणिर्यस्यभक्तानांहृदयांभोजमेवविष्टरमासनंयस्य भक्तानांमनोनयनानिवर्धयतीति [illegible] इत्यप-
ति ॥१६॥ अपीच्यमतिसुंदरंभक्तविषयंदर्शनंयस्यकैशोरेनारूपेणवयसिसंस्थितंभृत्यानामनुग्रहेकातरंव्य-
ग्रम् ॥१७॥

विष्टरमा२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग दी ५७

भृत्येष्वनुकंपिता कृपायुक्ता धीर्यस्य तस्य गृहीता मूर्तिर्येन तस्य स्फुरती ये मकरकुंडले तयोर्वल्गितेन प्रचलनेन विद्यो

तितौ अमलौ कपोलौ यस्मिंस्तत् ॥२९॥ यत् श्रुत्या स्वया भूत्या शोभया अलिभिः परिसेव्यमानं मीनद्वयाश्रयं श्रीनिकेतनं यच्च

यिक्षिपत् तेन तत् ध्यायेत् ॥ तत्र कुंतलेषु लीनाम् अधिदेवयः नेत्रद्वयेन मीनद्वयस्य तिरस्कृतं यत्र तदेव नेत्रे यस्मिंस्तत् ॥ उल्ल

समा उल्लसंती भ्रू यस्मिंस्तत् मनोमयं मनस्याविर्भवत् ॥३०॥ कृपया अधिकम् अतिघोराः आदिदैविकादयः त्रिविधा तापास्तेषां

नेनानुगुणितं विपुलः प्रसादो यस्मिंस्तत् गुहायां हृदि ॥३१॥ अवनतानामखिललोकानां तीव्रशोकेन याऽश्रुस्तेन यः सागर

विशोषयति ॥ तत् ध्यानं हरेर्हासं अस्यात्युदारं भ्रूमंडलं च ध्यायेत् ॥ कथंभूतं निजमायया मकरध्वजस्यापि संमो[illegible] हनाय

संयुक्तं २

भृत्यानुकंपितधियेह गृहीतमूर्तेः संचिंतयेद्भगवतो वदनारविंदं ॥ यद्विस्फुरन्मकरकुंडलवल्गितेन विद्योति

तामलकपोलमुदारनासं ॥२९॥ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुंतलवृंदजुष्टं ॥ मी

नद्वयाश्रयमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतंद्रित उल्लसद्भ्रु ॥३०॥ तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः ॥

पत्र ४

स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विपुलभावनया गुहायां ॥३१॥

हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारं ॥ संमोहनाय रचितं निजमाययास्य भ्रूमं

डलं मुनिकृते मकरध्वजस्य ॥३२॥ ध्यानायनं प्रहसितं बहुलाधरोष्ठभासारुणायिततनुद्विजकुंदपंक्ति ध्यायेत्

रचितं मुनिकृते मुनीनामुपकाराय मुनीनां संमोहने प्रवृत्तं कामम् एव मोहयितुम् इत्यर्थः ॥ मंदहासस्य ध्यानम् उक्त्वा स्फुटहास

स्य ध्यानमाह ॥३२॥ प्रहसितम् उच्चैर्हसितं ध्यायेत् कीदृशं ध्यानायनं प्रीतिस्पंदरूपतया प्रयत्नं विनैव ध्यानस्य विषयभूतं

तेजो दृश्यमेवाह ॥ बहुलया अधरोष्ठस्य भासा कांत्या अरुणीभूतास्तनवः ॥ सूक्ष्मा द्विजाः दंता एव कुंदमुकुलानि तेषां पंक्तिः

स्फुरति यस्मिन् हृदय एव कोशे वसितस्य अंतर्यामिणः स्थितस्य विष्णोः प्रेमसांद्रया भक्त्या तस्मिन्नेवार्पितमनाः सन् पृथक् न द्रष्टुम्

इच्छेत् ॥ अन्यत् न विचालयेद् इत्यर्थः ॥ समाधिमाहात्म्यम् ॥३३॥ ॥ ॥ ॥

विस्मो: प्रहसितं हे ह्रोष्ठे स्मितं ध्यायेत् २

नत २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्थानं यदुदरं तत्र स्थितं यत्र नाभिहृदेशात्मयोनेः ब्रह्मणोधिष्ठानं धिष्ण्यं अखिललोकात्मकं पद्मं ध्यानस्थितं तथा हरि   मरीच्४

स्वपर्णस्य भगवतः स्तनयोः अभिउयविज्ञोजनसो बलस्य निधी आधारौ ॥ अतसिकाकुसुमवत्कांत्या अवभासमानौ वा लेवि
अंगु [illegible] लंबमानं यमौलौ तावत् एवावासः तस्मिन् ॥ वर्तमानो यः कांचीकलापः तेन परिरंभः संश्लेषो विद्यते यस्य तद्धि भो
नितंबबिंबं हृदि कुर्यात् इति पूर्वेणैवान्वयः ॥ २४ ॥ अम्बुयहरेः नाभिहृदं ध्यायेत् ॥ कथंभूतं भुवनानां कोशस्य सम
हस्य गृहाधिष्ठानं मरकतमणिश्रेणी वियोस्तनौ तयोः हृद्यं ध्यायेत् ॥ विप्राद्रूपाणि मयूखैः ॥ गौरं स्वेतम् ॥ २५ ॥
अवभसस्य श्रेष्ठस्य महाविभूतेः ॥ महालक्ष्म्याः अधिवासस्थानं वक्षः ॥ कंठं च मनसि कुर्यात् कथंभूतं कंठं कौस्तुभ

उरुसुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ ॥ व्यालंबि पीतवरवाससि वर्तमा =
नकांचीकलापपरिरंभि नितंबबिंबं ॥ २४ ॥ नाभिहृदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणा १९
खिललोकपद्मं व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेद्द्वयं विशदहारमयूखगौरं ॥ २५ ॥ वक्षोधि
वासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानं ॥ कंठं च कौस्तुभमणेरधिभूषणार्थं कु
र्यान्मनस्यखिललोकनमस्कृतस्य ॥ २६ ॥ बाहूंश्च मंदरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलो
कपालान् संचिंतयेद्दशशतारमसह्यतेजः शंखं च तत्करसरोरुहराजहंसं ॥ २७ ॥ कौमोदकीं भगवतोद
यितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन ॥ मालां मधुव्रतवरूथगिरोपघुष्टां चैत्यस्य तत्त्वममलं म

मणिपर्यभूषणार्थं धनः तस्याधिकं भूषणं यः प्रयोजनं यस्य कौस्तुभमणिमेव स्वयमलंकुर्वंतमित्यर्थः पुंसां मनो नयन
हरणं च मनोनयनानां निर्वृतिमादधानमित्युभयोर्विशेषणं ॥ २८ ॥ निर्णिक्तानि उज्ज्वलीकृतानि बाहुवलयानि यानि यस्यां दा
नि येषु अधिपतिना लोकपालाये सुदर्शनारं च चक्रं न सह्यं तेजो यस्य करसरोरुहे राजहंसमिव ॥ २७ ॥ अरातयो ये भटा यो
द्धारः तेषां शोणितमेव कर्दमस्तेन दिग्धां लिप्तां अस्य कंठे मालां मणिं च स्मरेत् ॥ मधुव्रतानां वरूथस्य गिरोपघुष्टां
नादितां चैतन्यस्य जीवस्य तत्त्वं शुद्धमात्मानमसंगतो निर्लेपमगुणामलं ॥ बिभर्ति कौस्तुभमणिस्वरूपं भावा

॥ २८ ॥ [illegible]

निर्बीजः सबीजश्चेति योगो द्विविधः तत्र निर्बीजयोगो एतोयतो निस्पृहचेतनमनसश्चंचलं मसि ॥ तत्र सत्तो नियमे
तदात्मन्येव वर्णनेयदितिशीतोत्तमामार्गेणाक्रियमा णो पिटुष्करः समाधिः सबीजत्वं मकरं तत्रहृदयमानंदम
तैर्ध्यायमानेयत्नतएव विज्ञोयरमो भवति तडन्नोहृतात्म मोहृतप्राणाश्चभक्तिरविछिन्नो गतिमान्दीश्चपुंजेषु
तिश्रतः सएवोपयुक्तः योगस्यलक्षणं वक्ष्ये सबीजस्य तितदेवाम्यत्रसिद्धत्वेदर्शयति एवं ध्यानमात्रेणप्रतिल
ब्धोभावः प्रेमणायेनसत यामनस्याद्भवतद्धद्वयसप्रमोदाद्भूतानियस्यांकः प्रवृत्तास्तु कलयाच मनकुरुवंधमा
नश्रानंदसंप्लवे निमज्जमानः इति हृदयस्य भगवतो गृहत्वाबडिशामनस्य वेधनं बुवोपायभूतं विवक्षितमपिध्ये
याहि युक्ते तद्वारेणशिथिलप्रयत्नो भवतीत्यर्थः ॥ ५४ ॥ यद्विधेयदेवनिर्विषयं भवति अतएवमनकाश्रयं वध्येय

एवं हरौ भगवति प्रतिलब्धभावो भक्त्याद्रवद्धृदयउत्पुलकः प्रमोदात् ॥ औत्कंठ्यबाष्पकलया मुहुरर्द्यमान
स्तच्चापि चित्तबडिशं शनकैर्वियुंक्ते ॥ ५५ ॥ मनकाश्रयं यदिति निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा
यथार्चिः ॥ आत्मानमत्र पुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥ ५६ ॥ सोप्यनयाचरमया
यामनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये ॥ हेतुत्वमप्यसति कर्तरि दुःखयोर्यत्स्वात्मन्वि
धत्त उपलब्धपरात्मकाष्ठः ॥ ५७ ॥

सबंधं विना ध्यातर्ध्येयस्यासंभवात् न च सर्वेषु वृत्त्यादिर्विषयः स्यात् यत स्तत्र विरक्तो परमानंदानुभवे प्रतो
निर्वाणं लयमृच्छतिहनिरूपतां प्राप्नोति ब्रह्माकारेणाय विशा तइत्यर्थः ॥ यथार्चिर्ज्वालाश्रयविषयायप
मेज्योती रूपेणा यविशा मतेप्रतो संप्रदायामव्यवधानध्यानध्येयविभागशून्यमेकमखंडमात्मानमनुभव
मीक्षते अत्र हेतुः प्रतिनिवृत्तोपरमतोगुणप्रवाहो देहाद्यध्यासो यस्य नन्व समाधौ यिनत्वपुनः संसरतीत्याह
॥ ५७ ॥ सोपिसम्यकपुरुषः तस्मिन्महिम्नि स्वीयब्रह्मरूपे अवसितः अवसानं निष्ठां प्राप्नः केयामनसो निवृत्त्याचरमयावि
यावर्हितयेति सम्प्रज्ञाद्विशेषः ॥ नतद्धा विद्या सिनविदानीं अत्र हेतुः एतया योगाभ्यासकृतयेत्यर्थः नन्वेवमपि सुखदुः

महाम
नच

श्री भाग ११ ममम

रेतत्वं भोक्तृत्वं यस्तर्वमासीत्तत्तदध्यस्तमित्यविद्याकृते कर्तृत्वाद्यहंकारे विषये तत्तदनिष्टमेव पश्यतीत्यर्थः यत
उपलब्धपरमात्मकाष्ठः अपरोक्षीकृतात्मतत्वः तस्यतीवमुक्तिमाहदेहाभ्यां ३६ ॥ चरम उत्कालक्षणः सिद्धो देहम
पितविषयमिति जनतः स्वसंस्कारास्सनाद्यस्थितं उत्थायतत्रैवस्थितंतत्स्थानाद्येनतत्तोदैवत प्राणांतरपुरुषेणवा
नविपश्यति यतः स्वरूपप्राप्तः यतो देहात्मत्वं परमपरमात्मतं देहमितिवासस्तोपनत्रु संथानेहस्थानः वासंपरिकृतं कटित
टीयदिदेष्टितं स्थितंगतंवामदिरामदेनांधो यथानपश्यति ॥ ननुदेहस्यप्रवृत्तिनिवृत्तीजीवत्वाकथं तत्राह ३७ देव
सर्वेसंस्कारस्तद्धशो नगच्छनुयावत्स्वारंभकं कर्मास्ति तावत्प्रतिसमीक्षतेजीवत्येव सासुः सेंद्रियः नत्वनहंतेनासिः

देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं ॥ दैवादुपेतमथ दैववशादपेतं वासो
यथा परिकृतं मदिरामदांधः ॥ ३६ ॥ देहोऽपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः ॥
तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ ३७ ॥ यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यः
प्रतीयते ॥ अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ॥ ३८ ॥ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वापि स्वसं-
भवात् ॥ अप्यात्मत्वेनाभिमता द्यथाग्निः पृथगुल्मुकात् ॥

॥ ११ ॥

स्पृ ३
देहोपीति २
दिए २

ननु संगः स्यात्तत्राहतंदेहं स्वाप्नदेहादिवत्संप्रपंचं पुत्रादिसहितं पुनर्नभजते अहंममेतिनाभिमन्यते अधिरूढः प्रा
प्तः समाधिपर्यंतो योगो येन अतएव प्रतिबुद्धं वस्तु आत्मतत्वं येन सः प्रतिबोधप्रकारमाहयथेति ३८ ॥ प्रतिलिप्ततेस्व
शरीरात्मत्वेनाभिमतादपिपुत्रादेः मर्त्यः पितादि पुरुषो देहादेः दृष्टांतांतरमनवस्थानाभावेपिभेदं सदृष्टांतमाह ३९
यथोल्मुकादिदृष्टांतेज्वलतःकाष्ठेत ॥ स्वसंभवादग्नेः संभूतात् अप्यात्मत्वेनाग्नेः स्वरूपत्वेनाभिमतादपि प्रज्वलिताद्विवे
कितोऽग्निः पृथगेव नस्वाप्यग्नेरभिमानोऽस्ति उल्मुकात्सर्वसिद्धापि न धूमः कः ॥ प्रकाशकश्चाग्निरेवयोग ॥ ११ ॥ ॥

यथेति २
ममम

धूमे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भूतादेः इन्द्रियेभ्यः पृथक् तस्मादपि जीवसंज्ञितात्पृथक् ब्रह्मसंज्ञितः॥ तथा प्रधानादपि तत्प्रवर्तको भगवान्भू
यमित्यर्थः उपाधितो विवेकमुक्त्वा स्वतोप्याह॥४१॥ भूतेषु च तद्विधेषु तदात्म[ ]तां महाभूतात्मतां यथ मे भेदस्याये·
याधिकतां सदृष्टांतमाह स्वयोनिषु काष्ठेषु ज्योतिरग्निः गुणवैषम्यात् दीर्घह्रस्वादिभेदात् प्रकृतौ देहे॥४३॥
प्राप्तस्य जीवस्य स्वं यद्रूपं तं दैवीं देवस्य विष्णोः शक्तिं पराभाव्य तस्मादेनैव तिरस्कृत्वा स्वरूपेण ब्रह्मत्वेनावतिष्ठते॥४४॥
इति श्रीभावार्थे तृतीयेऽष्टाविंशोऽध्यायः॥२८॥ एकोनत्रिंशके भक्तियोगस्तत्त्वकथ्यते। कालस्य च बलं ज्ञात्वा सं·

भूतेंद्रियांतःकरणात्प्रधाना[ ]जीवसंज्ञितात्। आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः॥४१॥ सर्व
भूतेषु चात्मानं सर्वभूतानि चात्मनि॥ ईक्षेतानन्यभावेन भूतेष्विव तदात्मतां॥४२॥ स्वयोनिषु यथा ज्यो
तिरेकं नाना प्रतीय[ ]ते॥ योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः॥४३॥ तस्मादिमां स्वां प्रकृ
तिं दैवीं सदसदात्मिकां॥ दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठ[ ]ते॥४४॥ इति श्रीभागवते तृती·
येऽष्टाविंशोऽध्यायः॥२८॥ देवहूतिरुवाच॥ लक्षणं महदादीनां प्रकृतेः पुरुषस्य च॥ स्वरूपं ल
क्ष्यतेऽमीषां येन तत्पारमार्थिकं॥१॥ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते॥ भक्तियोगस्य मम मा
र्गं ब्रूहि विस्तरतः प्रभो॥२॥ विरागो येन पुरुषो भगव[ ]न्सर्वतो भवेत्। आचक्ष्व जीवलोकस्य वि·
विधा मम संसृतीः॥३॥ कालस्येश्वररूपस्य परेषां च परस्य ते। स्वरूपं बत कुर्वन्ति यद्धेतोः कुशलं जनाः॥४

सृतिषु विरक्तये ज्ञानवादं सर्वं भक्तिमार्गभेदानह्वति। द्वाभ्यां लक्षणं महदादीनां यथा सांख्येषु क·
थितं तथा येन लक्षणेन तत्पारमार्थिकं परस्परविभक्त[ ]मित्यर्थः यो भक्तियोगो मूलं प्रयोजनं यस्य तत्प्रच
क्षते तत्कथितं तेन सह भक्तियोगस्य मार्गं प्रकारं विस्तर[ ]तो मे ब्रूहि॥२॥ येन संसृतीनां मार्गेणानेन विरागो भवे
त्॥३॥ ईश्वररूपस्य महाप्रभावस्य ते तव दामवत्स्य हेतोः॥ यद्भयात्कुशलं पुण्यं कुर्वंति॥४॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ८८

प्रवृत्तः ॥ अस्य यतो मिथ्याभूते देहादावभिमतिरहंकारो यस्मात्ः कर्मस्वनुविद्धया सक्त्यापाधिया ऽज्ञानस्यान
एवं तस्य श्रेयपादेन सिं संसारे विद्वंस अस्य लोकस्य प्रबोधाय त्वं योगप्रकाशको भास्करः किलाविर्भूतोसि ॥५॥ अ
तोस्तद्वदं ॥६॥ मार्गैः प्रकारविशेषैः तानेवाह स्वभावभूता ये गुणास्तेषां मार्गेण वृत्तिभेदेन भावोभिप्रायः फ
लसंकल्पभेदाद्भक्तिभेद इत्यर्थः ॥७॥ अभिसंधाय संकल्प्य संरंभी क्रोधिनः भिन्नदृक् भेददर्शी यो भावं भक्तिं कुर्या
त् स त्रिविधोपि तामसः ॥८॥ पृथग्भावो भेददर्शी ॥९॥ कर्मनिर्हारं पापक्षयं परस्मिन् परमेश्वरे तदर्पणं कर्मार्पणं म

लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये ॥ श्रान्तस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः
किल योगभास्करः ॥५॥ मैत्रेय उवाच ॥ इति मातुर्वचः श्लक्ष्णं प्रतिनंद्य महामुनिः ॥ आबभाषे कुरुश्रेष्ठ प्री
तस्तां करुणार्दितः ॥६॥ श्रीभगवानुवाच ॥ भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते ॥ स्वाभावगु णमार्गेण पुंसां भावो विभिद्यते ॥७॥
अभिसंधाय यो हिंसां दंभं मात्सर्यमेव वा ॥ संरंभी भिन्नदृग्भावं मयि कुर्यात्स तामसः ॥८॥ विषयानभिसंधाय
यश ऐश्वर्यमेव वा ॥ अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ॥९॥ कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्प
णं ॥ यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः ॥१०॥ मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ॥ मनोगति
रविच्छिन्ना यथा गंगांभसोंबुधौ ॥११॥ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं ॥ अहैतुक्यव्यवहिता या भ

गवत्यीति मुद्दिश्येत्यन्वयः ॥ यष्टव्यमिति विधिसिद्धं मुद्दिश्येत्यर्थः भेददृष्टिं त्वमर्चादावर्चनेन त्रिष्वपि समानं त्वरे
वन्तामसादिभक्तित्रयस्य यो भेदो तामस्त्वयथोत्तरं श्रेष्ठमेव वन्द्रवणकीर्तनादयोपि नवप्रत्येकं नवभेदाः तदेवं नवं २
सगुणभक्तिरेकाशीतिभेदा निर्गुणा तु भक्तिरेकविधैवेत्याह द्वाभ्यां ॥१०॥ अविच्छिन्ना संतता ॥११॥ अहैतुकी फ
लाभिसंधानशून्या अव्यवहिता भेददर्शनरहिता च मद्गुणश्रुतिमात्रेण मयि पुरुषोत्तमे मनोगतिर्भक्तिः ति २
सा निर्गुणस्य भक्तियोगस्य लक्षणमित्यन्वयः ॥ लक्षणस्य तं वै अकामानां निष्कामतां केचन व्याख्यायेनाह ॥१२॥ ॥ ॥ १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

समानरूपत्वं

कंमयासहैकस्मिंतो ।

सालोकं वासः ॥ सार्ष्टिः समा नैश्वर्यं सामीप्यं निकटवर्तित्वं सारूप्यं एकत्वं सायुज्यं उता पि दीयमानमपि न गृह्णन्ति कि
सालोक्यादीनां मत्सेवनं विना ॥ सार्ष्टिः समानैश्वर्यं सामीप्यं निकटवर्तित्वं सारूप्यमेकत्वं सायुज्यं उतापि दीयमानमपि न गृह्णन्ति ॥ १३ ॥ ननु तेषु गुणं पहित्वा ब्रह्मप्राप्तिः परमपु
रुषार्थः ॥ किमिति तर्हि भजनेन भक्तेरेव परमफलत्वादित्याह ॥ १४ ॥ एवंभूताया भक्तेः साधनान्याह
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ॥ येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥ एवंभूतायां भक्तौ साधनान्याह
भिः ॥ १४ ॥ निषेवितेनानिमित्तेन स्वधर्मेण नित्यनैमित्तिकेन महीयसा श्रद्धायुक्तेन क्रियायोगेन
पंचरात्राद्युक्त पूजाप्रकारेण शस्तेन निष्कामेन ॥ १५ ॥ मद्धिष्ण्यं मत्प्रतिमादि तस्य दर्शनादिभिः सत्त्वेन धैर्येण असंग

घु:

सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥ दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥ १३ ॥ स ए
व भक्तियोगाख्य आत्यन्तिक उदाहृतः ॥ येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥ १४ ॥ निषेवितेनानिमि
त्तेन स्वधर्मेण महीयसा ॥ क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥ १५ ॥ मद्धिष्ण्यदर्शनस्पर्शपूजास्तु
त्यभिवंदनैः ॥ भूतेषु मद्भावनया सत्त्वेनासंगमेन च ॥ १६ ॥ महतां बहुमानेन दीनानामनुकंपया ॥ मैत्र्या चैवात्मतु
ल्येषु यमेन नियमेन च ॥ आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्च मे ॥ आर्जवेनार्यसंगेन निरहंक्रियया तथा
॥ १८ ॥ मद्धर्मिणो गुणैरेतैः परिसंशुद्ध आशयः ॥ पुरुषस्यांजसाभ्येति श्रुतमात्रगुणं हि मां ॥ १९ ॥ य
था ॥ २० ॥ मद्धर्मी चर णैरेतैः परिसंशुद्ध आशयः ॥ पुरुषस्यांजसाभ्येति श्रुतमात्रगुणं हि मां ॥ १९ ॥ अहं सर्वेषु
यथा वातरथो घ्राणमावृंक्ते गंध आशयात् ॥ एवं योगरतं चेत आत्मानमविकारि यत् ॥ २० ॥ अहं सर्वेषु
भूतेषु भूतात्मावस्थितः सदा ॥ तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडंबनं ॥ २१ ॥ ॥ ॥ ॥

मेन वैराग्येण ॥ १६ ॥ १७ ॥ १८ ॥ मद्धर्मिणो भगवद्धर्मानुष्ठातुः पुरुषस्याशयः चित्तं प्रयत्नं विनैव प्राप्नोति ॥ १९ ॥

स्थानात् २

वातो रथः प्रापको यस्य आशयात् स्थानात् आवृंक्ते आत्मसात्करोति अविकारि समं यच्चेतः चित्तशुद्धिश्च सर्वभूतात्मदृ
ष्ट्यैव भवतीति वक्तुं केवलं प्रतिमादिनिष्ठां दत्त्वाह सप्तभिः ॥ २० ॥ अर्चैव विडंबनं अनुकरणं अर्चाया विडं
बनमिति वा ॥ अवज्ञा पेक्षा द्वेषनिंदा क्रमेण चतुर्भिर्निषिध्यते ॥ २१ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा॰ टी॰ ३ २९ २६४

द्रव्यैरुत्पन्नया क्रियया भूतग्रामावमानिनः न त्रिंदकस्य न निर्दिकं प्रचार्चाया अर्चनमनर्थकमेवेत्याह ॥ २४ ॥ सर्वभूतेष्ववस्थितं मां स्वहृदि यावन्न वेद स्वकर्मकृत ॥ कर्माविरोधेन यथावकाशं अनेन कर्मनिष्ठाया अपि सत्त्वशुद्ध्यावधिरित्युक्तं भवति ॥ २५ ॥ अन्तरां नरं भेदं न दर्शनं तरमल्पमपि भेदं यः पश्यतीत्यर्थः ॥ यद्वा अन्तरा मध्ये उदरं शारीरं मनसु रहं तस्य भयं विदधे करोमि अथातः सर्वभूतेषु कृतवासं तत्र हेतुः ॥ भूतानामात्मानमन्तर्यामिणं ॥ अभिन्नेन चक्षुषा समदर्शनेन तत्रापि यथोत्तरं मानादीनि प्रायः कर्तव्यमिति तुल्यतारतम्यमाह सार्धैः षड्भिः ॥ २७ ॥ अजीवानामचेतनेभ्यः ततस्तेभ्योऽपि प्राणभृतः २

यो मां सर्वेषु भूतेषु संतमात्मानमीश्वरम् हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः २२ द्विषतः परकाये मां मानिनो भिन्नदर्शिनः भूतेषु बद्ध- वैरस्य न मनः शांतिमृच्छति ॥ २२ ॥

२३ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे ॥ नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ॥ २४ ॥ अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत ॥ यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितं ॥ २५ ॥ आत्मनश्च परस्यापि यः करोत्यन्तरोदरं तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणं ॥ २६ ॥ अथ मां सर्वभूतेषु भूतात्मानं कृतालयं ॥ अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा ॥ २७ ॥ जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ततः सचित्ताः प्रवरास्ततश्चेंद्रियवृत्तयः ॥ २८ ॥ तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ॥ तेभ्यो गंधविदः श्रेष्ठास्ततः शब्दविदो वराः ॥ ३० ॥ रूपभेदविदस्तत्र ततश्चोभयतो दतः ॥ तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात ॥ ३१ ॥ ततो वर्णाश्च चत्वारस्तेषां ब्राह्म- णउत्तमः ॥ ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥ ३२ ॥ ॥ ॥

प्राणवृत्तिमंतः सचित्ता ज्ञानवंतः ॥ इंद्रियाणां वृत्तयो येषु ॥ २८ ॥ इंद्रियवृत्तयो वृत्तीनामभिव्यक्ता इंद्रियेवत्वाद्विमत्ता भावात्तेभ्यो वायर्मेषु सर्पते ॥ तस्मात् पश्यंति पादपा इति श्रुतिः पादपास्तत उत्कृष्टाः ॥ प्रभृताः सु स्पर्शेनैंद्रियवृत्तिवान्तेभ्यः स्पर्शवेदिभ्यो रसवेदिनो मत्स्यादयः श्रेष्ठा गंधविदो भ्रमरादयः शब्दविदः सर्पादयः ॥ २९ ॥ रूपभेदविदः काकादयः उभयतो दंता येषां तेऽपदेभ्यस्ततो बहुपादास्तेभ्यश्चतुष्पादास्ततः द्विपात मनुष्याः ॥ ३०

संशयच्छेत्ता मीमांसकः ततोऽपि केवलो स्वधर्मकृत् मुक्तसंगस्तु फलत्यागी आत्मनो धर्ममदोग्ध्या तिष्ठाम अनर्प्यर्थः ॥ ३२
अर्पिताशेषाः क्रियार्थाः तत्फलानि आत्मा देहश्च येन एवंविधे निरन्तरोऽव्यवहितः अकर्तुः कर्तृत्वाभिमानशून्यात्
३३ जीवानां कलया परिकलनेन अन्तर्यामितया प्रविष्ट इति दृष्ट्वेत्यर्थः ॥ उक्तं भक्तियोगं पूर्वोक्तेनाष्टांगयोगेन सहो-
पसंहरति ॥ ३४ ॥ हे मानव विष्णुरूपं प्रसंख्ये यदन्यत्तज्जीवस्य संसृतिकालस्य स्वरूपं वा वक्तव्यमिति तदाह सार्धेन ॥ ३५

अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान्स्वकर्मकृत् ॥ मुक्तसंगस्ततो भूयानदोग्धा धर्ममात्मनः ३२ तस्मान्मय्य-
र्पिताशेषक्रियार्थात्मा निरन्तरः ॥ मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः ॥ ॥ न पश्यामि परं भूतम-
कर्तुः समदर्शनात् ॥ मनसैतानि भूतानि प्रणमेद्बहुमानयन् ॥ ईश्वरो जीवकलया प्रविष्टो भगवानिति
३४ भक्तियोगश्च योगश्च मया मानव्युदीरितः ॥ ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥ एतद्भगवतो रू-
पं ब्रह्मणः परमात्मनः ॥ परं प्रधानं पुरुषं दैवं कर्मविचेष्टितं ॥ रूपभेदास्पदं दिव्यं काल इत्यभिधीयते
३६ ॥ भूतानां महदादीनां यतो भिन्नदृशां भयं । योऽन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः ॥ ३७ ॥ स वि-
ष्ण्वाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः ॥ न चास्य कश्चिद्दयितो न द्वेष्यो न च बान्धवः ॥ ३८ ॥ आविश-
त्यप्रमत्तोऽसौ प्रमत्तं जनमन्तकृत् ॥ यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात् ॥ यद्भयाद्वर्षते देवो भग-
णो भाति यद्भयात् ॥ ३९ ॥ ॥

एतत्सर्वेति यत्तद्भगवतो रूपं कीदृशं प्रधानपुरुषात्मकं परं तदधिष्ठितृ दिव्यं च एतदेव मित्यभिधीयते कीदृशं रू-
पभेदास्पदं वस्तूनां नानात्वव्यवस्थास्पदम् आश्रयः कारणं उक्तं हि कालाद्गुणव्यतिकर इति वक्ष्यति च गुणव्यतिकरः
काल इति दिव्यमद्भुतप्रभावं तदेवाह यावत्समाप्तिः ॥ ३६ ॥ महदादीनां तत्तदभिमानिनां जीवानां भयहेतुं तदेवमा-
हैयत्ति भूतैरेव भूतान्यत्ति संहरति ॥ ३७ अधियज्ञो यज्ञफलदाता कलयतां वशीकुर्वतां ॥ ३८ ॥ ॥ श्री ॥ ॥

श्री भाग॰ टी॰ १०२

४१ यद्भयाद्भीताः ॥ ४२ इंद्धे दीप्यते सगिरिभिः भूः अदो नभः यन्नियमात् तयासं ददाति ॥ ४२ महान्सप्तभिरावृतमूर्तरात्मकं
स्वदेहं लोकं स्वेन तनुते विस्तारयति गुणा नियंतारः देवा ब्रह्मादयः अस्य विश्वस्य सर्गादिषु वर्तंते ॥ ४२ अनुयुगं
वारंवारमित्यर्थः जनेन पित्रादिना जनं पुत्रादिजनयन् आदिकृत् मृत्युनांतकमपि मारयन् अंतकरः अनादिरनंतो
व्ययश्च ॥ ४४ इतिश्रीभावार्थे तृतीये एकोनत्रिंशोध्यायः ॥ २९ ॥ त्रिंशे तु कायकोनादिल ललनाकुलचेतसां

यद्वनस्पतयो भीता लताश्चौषधिभिः सह ॥ ४१ ॥ स्वे स्वे कालेभिगृह्णंति पुष्पाणि च फलानि च ॥ स्र
वंति सरितो भीता नोत्सर्पत्युदधिर्यतः ॥ ४२ अग्निरिंधे सगिरिभिः भूर्न मज्जति यद्भयात् ॥ नभो ददा
ति श्वसतां पदं यन्नियमाददः ॥ ४२ ॥ लोकं स्वदेहं तनुते महान्सप्तभिरावृतं ॥ गुणाभिमानिनो देवाः
सर्गादिष्वस्य यद्भयात् ॥ ४२ वर्तंतेनुयुगं येषां वश एतच्चराचरं ॥ सोनंतोंतकरः कालोनादिरादि
कृदव्ययः ॥ जनं जनेन जनयन्मारयन्मृत्युनांतकं ॥ ४५ ॥ इतिश्रीभागवते तृतीयस्कंधे एको
नत्रिंशोध्यायः ॥ कपिल उवाच ॥ तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमं ॥ काल्यमानोपि
बलिनो वायोरिव घनावलिः ॥ १ ॥ यं यमर्थमुपादत्ते दुःखेन सुखहेतवे ॥ तं तं धुनोति भगवान्पुमान्
शोचति यत्कृते ॥ २ ॥ ॥

कामिनां तामसर्वदीनामथो गतिरुदीर्यते ॥ कालप्रभाववर्णनं वैराग्याय विचित्रकर्मकृतां संसृतिं त्रिंशे ॥
प्रपंचयति तस्यैतस्य ॥ बलिनः कालस्य बलिनेति पाठः काल्यमानो विचाल्यमानोपि वायोर्विक्रमं यथा मे
घपंक्तिर्न वेद विक्रममेवाह ॥ २ यं यमर्थं दुःखेन प्रयासेन उपाधत्ते आपादयति तं तं भगवान्कालो धुनो
ति विनाशयति यत्कृते यन्निमित्तं ॥ २ ॥ ॥

१०२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शोकेहेतुः ययस्मात्सानुबंधस्य कलत्रादिसहितस्य ध्रुवाणीति विष्टदेयं प्रवृत्तं मत्त्वा यथार्थेष्वकारः ३ मैत्तितं दर्शयन्
दुःखं प्रयच्छति च तत्तेषाम्भिः ॥ ४ ॥ नारक्यां नरकाश्रयादिभिर्ज्ञातायां ॥ ५ ॥ निरूढमूलं प्ररूढतममनोरथं हृदयं यस्य
य॰ बहु मन्यते कृतार्थोऽहमिति श्लाघ्यो ॥ उद्वहनाधिना पोषणचिन्तया दुरयाशय एवमाह ॥ ८ ॥ ७ ॥ आक्षिप्त आत्मा बुद्धि
याणि च यस्य कया असतीनां पुंश्चलीनां रहसि रचितया संभोगादिरूपया मधुरभाषिणां शिशूनां ... लापैश्च

यदध्रुवस्य देहस्य सानुबंधस्य दुर्मतिः ॥ ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनि च ॥ ३ ॥ जन्तुर्वै भव एतस्मिन्यां
यां योनिमनुव्रजेत् ॥ तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ॥ नरकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति ॥ ना
रक्यां निर्वृतौ सत्यां देवमायाविमोहितः ॥ ५ ॥ आत्मजायासुतागारपशुद्रविणबंधुषु ॥ निरूढमूलहृद
य आत्मानं बहु मन्यते ॥ ६ ॥ संदह्यमानसर्वांग एषामुद्वहनाधिना ॥ करोत्यविरतं मूढो दुरितानि दुरा
शयः ॥ ७ ॥ आक्षिप्तात्मेंद्रियः स्त्रीणामसतीनां च मायया ॥ रहोरचितयालापैः शिशूनां कलभाषिणां ॥ ८
दुःख गृहेषु कूटधर्मेषु दुःखतंत्रेष्वतंद्रितः ॥ कुर्वन्दुःखप्रतीकारं सुखवन्मन्यते गृही ॥ ९ ॥ अर्थैरापादितैर्गुर्व्या
हिंसयेतस्ततश्च तान् ॥ पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयं ॥ १० ॥ वार्तायां लुप्यमानायामारब्धा
यां पुनः पुनः ॥ लोभाभिभूतो निःसत्त्वः परार्थे कुरुते स्पृहां ॥ ११ ॥ कुटुंबभरणाकल्पो मंदभाग्यो वृथोद्यमः ॥
श्रिया विहीनः कृपणो ध्यायन् श्वसिति मूढधीः ॥ १२ ॥ एवं स्वभरणाकल्पं तत्कलत्रादयस्तथा ॥ नाद्रियंते
यथापूर्वं कीनाशा इव गोजरं ॥ १३ ॥

सुखवन्मन्यते इत्युत्तरे एण नु यः ॥ ९ ॥ कृत्याच्छिन्नप्राप्तादिव कूटला धर्मा येषु दुःखप्रधानेषु ॥ ९ ॥ येषां पोषणेनार्थोः
यातिनान्सुखानि शेषभुग्गतिभोक्ता पितस्य दुर्लभमुत्यर्थः ॥ १० ॥ वार्तायां जीविकायां निःसत्त्वः असमर्थः परार्थे परस्व
॥ ११ ॥ अकल्पो असमर्थः ॥ १२ ॥ पूर्ववद्यथादरं न कुर्वंति कीनाशाः कृपणाः कृषीवलाः गोजरं वृद्धं बलीवर्दं ॥ १३ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यमदूतावित्यादि यावत्समाप्तिः ४

श्री भाग टी॰ ९३

भ्रियमाणः पुष्यमाणः ॥ १४ ॥ अवमत्यावज्ञया उपन्यस्तं समीपे प्रक्षिप्तं गृहपालः श्वा आहरन् भुञ्जानः आमयावी रो-
गी ॥ १५ ॥ उत्तारो बहिर्निर्गतनेत्रः कफेन संरुद्धा नाड्यो यस्य कासश्वासाभ्यां कृत आयासो यस्य घुरघुरिति शब्दं क- १३ २
रोति परिवीतः परिवेष्टितः वाच्यमानो बन्धुभिर्नाम्नाहूयमानः ॥ १७ ॥ अस्तधीः नष्टमतिः मनसा पुण्यपापाभ्यां द्वे
गती तत्र पापगतिमाह ॥ १८ ॥ सरभसं सक्रोधमीक्षणं ययोस्तौ दृष्ट्वा ॥ १९ ॥ आवृत्य निरुध्य ॥ २० ॥ तर्जनैर्निर्भर्त्सनैः

तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयं भृतैः ॥ जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे ॥ १४ ॥ आस्तेऽवमत्योपन्य-
मू॰ ३॰ स्तं गृहपाल इवाहरन् ॥ आमयाव्यप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः ॥ १५ ॥ वायुनोत्क्रमतोत्तारः कफसंरुद्ध-
नाडिकः ॥ कासश्वासकृतायासः कण्ठे घुरघुरायते ॥ १६ ॥ शयानः परिशोचद्भिः परिवीतः स्वबन्धुभिः ॥
वाच्यमानोऽपि न ब्रूते कालपाशवशं गतः ॥ १७ ॥ एवं कुटुम्बभरणे व्यापृतात्माजितेन्द्रियः ॥ म्रियते रुदतां स्वा-
नामुरुवेदनयास्तधीः ॥ १८ ॥ यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ ॥ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुं-
चति ॥ १९ ॥ यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात् ॥ नयतो दीर्घमध्वानं दण्ड्यं राजभटा यथा ॥ २० ॥ तयोर्नि-
अ॰ ३० र्भिन्नहृदयस्तर्जनैर्जातवेपथुः ॥ पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन् ॥ २१ ॥ क्षुत्तृट्परीतोऽर्कदवानला-
सं निलैः संतप्यमानः पथि तप्तवालुके ॥ कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोऽपि निराश्रमोदके ॥ २२ ॥
तत्र तत्र पतञ्छ्रान्तो मूर्छितः पुनरुत्थितः ॥ पथा पापीयसा नीतस्तरसा यमसादनं ॥ २३ ॥ योजनानां सहस्राणि न-
वतिं नव चाध्वनः ॥ त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः ॥ २४ ॥

येयस्मात्ततः सन्न चलतीति द्वितीयेनान्वयः ॥ २१ ॥ क्षुत्तृड्भ्यां परीतो व्याप्तः तप्ता वालुका यस्मिन् ॥ निर्गत आश्रयो वि-
श्रामस्थानमुदकं च यस्मिन् ॥ २२ ॥ यमसादनं नीतो भवति तत्रैव विशेषमाह ॥ २३ ॥ अध्वनः संबन्धिनां योजनानां नवतिं न-
व सहस्राणि पापाधिक्ये द्वाभ्यां नीतः सन् ॥ यातनाः संक्षेपेणोदर्शयति ॥ २४ ॥ ९३

योजना

आदीपनं ज्वालनं प्राप्नोति से नरकं तमस्येव वा हंतं छिन्नं यत्र समासमां सं भक्तानामित्यर्थः ॥ २५ ॥ आत्मनो वैशसं पीडा
२६ ॥ भिदापनं भेदप्रापणं नवेनेत द संभावितमत्रापि ह्रपमानवाद्यिप्याह ॥ २७ ॥ मिथः अन्योन्यं मेलनेन निर्मिताः कु
नाउँ भयं कुटुंबं स्वदेहो ... पापार्जितं यत्र तं भुंजते न तु कर्णैव नरकं नीयाह ॥ ३० ॥ भूतद्रोहेण यद्भृतं तेन ॥ स्व
कलेवरमिहैव हित्वा कुशलादितरं यावंतदेव पाथेयं भोग्यं यस्य ॥ ३१ ॥ न तु कुटुंबपोषणपापमपि विहाय गच्छ

आदीपनं स्वगात्राणां वेष्टयित्वोल्मुकादिभिः ॥ आत्ममांसादनं क्वापि स्वकृंतं परतोपि वा ॥ २५ ॥ जीवतश्चांत्रा-
भ्युद्धारः श्वगृध्रैर्यमसादने ॥ सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं ॥ २६ ॥ कृंतनं चावयवशो गजादिभ्यो
भिदापनं ॥ पातनं गिरिशृंगेभ्यो रोधनं चांबुगर्तयोः ॥ २७ ॥ यास्तामिस्रांधतामिस्रा रौरवाद्याश्च यातनाः
भुंक्ते नरो वा नारी वा मिथः संगेन निर्मिताः ॥ २८ ॥ अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते ॥ या यातना वै नार
क्यस्ता इहाप्युपलक्षिताः ॥ २९ ॥ एवं कुटुंबं बिभ्राण उदरंभर एव वा ॥ विसृज्येहोभयं प्रेत्य भुंक्ते तत्फलमीदृशं
॥ ३० ॥ एकः प्रपद्यते ध्वांतं हित्वेदं स्वकलेवरं ॥ कुशलेतरपाथेयो भूतद्रोहेण यद्भृतं ॥ ३१ ॥ दैवेनासादितं तस्य
शमलं निरये पुमान् ॥ भुंक्ते कुटुंबपोषस्य हृतवित्त इवातुरः ॥ ३२ ॥ केवलेन ह्यधर्मेण कुटुंबभरणोत्सुकः
याति जीवोंधतामिस्रं चरमं तमसः पदम् ॥ ३३ ॥ अधस्तान्नरलोकस्य यावतीर्यातनादयः ॥ क्रमशः
समनुक्रम्य पुनरत्राव्रजेच्छुचिः ॥ ३४ ॥

ततआह ॥ ३२ ॥ तस्य कुटुंबपोषणस्य शमलं पापं दैवेनेश्वरेणापादितं भुंक्ते न तु कुटुंबपोषणं विहितमेव तत्राह ॥ ३३ ॥
तमसो नरकस्य चरमं पदं स्थानं पुनर्मनुष्यशरीरप्राप्तिकारणमाह ॥ ३४ ॥ मनुष्यप्राप्तेरर्वाक् यावतीर्यातनाः आ
दिशब्देन सूकरादियोनिपर्यंताः ॥ तास्सर्वाः क्रमेण संप्राप्य भोगेन क्षीणपापः सन् अत्र पुनर्नरत्वं प्राप्नोतीत्यर्थः ॥ ३४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इतिश्रीभागवार्थेतृतीयेत्रिंशः ॥ ३० ॥ एकत्रिंशेविमिश्रैस्तत्पुण्यपापैर्विदेहतः ॥ मनुष्ययोनिसंप्राप्तिर्वर्ण्यतेराजसीगतिः ॥ पुनरत्राव्रजेदिमुंलोकंतदेवविशेषतोदर्शयति ॥ कर्मणासर्वज्ञेनैवदैवमीश्वरः ॥ तदेवनेत्रंप्रवर्तकंयस्यप्रवि
नेत

इतिश्रीभागवतेतृतीयस्कंधेत्रिंशोध्यायः ॥ ३० ॥ श्रीभगवानुवाच ॥ कर्मणादैवनेत्रेणजंतुर्देहोपपत्तये ॥ स्त्रियाःप्रविष्टउदरंपुंसोरेतःकणाश्रयः ॥ १ ॥ कललंत्वेकरात्रेणपंचरात्रेणबुद्बुदं ॥ दशाहेनतुकर्कंधूःपेश्यंडंवाततःपरं ॥ २ ॥ मासेनतुशिरोद्वाभ्यांबाह्वंघ्र्याद्यंगविग्रहः ॥ नखलोमास्थिचर्माणिलिंगच्छिद्रोद्भवस्त्रिभिः ॥ ३ ॥ चतुर्भिर्धातवःसप्तपंचभिःक्षुत्तृडुद्भवः ॥ षड्भिर्जरायुणावीतःकुक्षौभ्राम्यतिदक्षिणे ॥ ४ ॥

होभवति ॥ १ ॥ कललंशुक्रशोणितमिश्रितंभवति ॥ बुद्बुदंवर्तुलंभवति कर्कंधूर्बदरीफलंतद्वत्काठिन्यंभवति पेशीमांसपिंडाकारः अंडंचयोन्यंतरे ॥ २ ॥ बाह्वंघ्र्याद्यंगानांविग्रहोविभागः लिंगंचच्छिद्राणिचतेषा
स० मुद्भवः ॥ ३ ॥ जरायुणागर्भवेष्टनेनवीतःप्रावृतः ॥ ४ ॥ ॥

मातृजेगर्भेनभक्षितेनान्नेनपानाद्यैश्चएधमानाधातवोयस्यजंतुनोसंभवोयस्मिन्नसंमतेगर्भेविषमेप्रोतेयान्नमा
कौंडेयपुराणे ॥ नाडीचाप्यायनीनामनाभ्यांतस्यनिबध्यते स्त्रीणांतथांत्र सुषिरेसानिबद्धोपजायते क्रमेते
भुक्तपीतानिस्त्रीणांगर्भोदरेतथा ॥ तैराप्यायितदेहोसौजंतुर्वृद्धिमुपैतिवै इति ॥५॥ तत्र तैः कृमिभिः क्षतः
द्भिःसौकुमार्यात्कोमलत्वेनत्वनानिसर्वांगानियस्य ॥५॥ उल्बणैःसहैःसर्वेष्वंगेषूत्थितावेदनायस्यआसीत्इत्य

मातृजेगर्भान्नपानाद्यैरेधद्धातुरसंमते ॥ प्रोतेविएमूत्रयोगर्तेसजंतुर्जंतुसंभवे ॥५॥ कृमिभिः क्षतसर्वांगः
सौकुमार्यात्क्षतिक्षणे ॥ मूर्छांप्राप्नोत्युरुक्लेशस्तत्रत्यैर्दत्तैःपितैर्गृहः ॥६॥ कटुतीक्ष्णोष्णलवणरूक्षाम्ला लं१
दिभिरुल्बणैः ॥ मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ॥ उल्बेन संवृतस्तस्मिन्नंत्रैश्चबहिरावृतः
आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ॥८॥ अकल्पः स्वांगचेष्टायां शकुंत इव पंजरे ॥ तत्रलब्धस्मृ
तिर्दैवात्कर्मजन्मशतोद्भवं ॥९॥ स्मरन्दीर्घमनुच्छ्वासं शर्मकिंनामविंदते ॥ आरभ्य सप्तमान्मासाल्लब्ध
बोधोपिवेपितः ॥१०॥ नैकत्रास्ते सूतिवातैर्विष्ठाभूरिवसोदरः ॥१०॥ नाथमानऋषिर्भीतः सप्तवध्रिः कृ
तांजलिः ॥ स्तुवीततंविक्लवयावाचायेनोदरेर्पितः ॥११॥ जीव उवाच तस्योपसन्नमवितुंजगदिच्छया
त्तनानातनोर्भुविचलच्चरणारविंदं ॥ सोहंव्रजामिशरणंह्यकुतोभयंमेयेनेदृशीगतिरदर्श्यसतोनुरूपा ॥१२॥ मै

सेणान्वयः ॥७॥ उल्बेनजरायुणाभुग्नेकुटिलीभूतेपृष्ठेशिरोधराग्रीवाचयस्य ॥८॥ दैवात्पूर्वकर्मवशात्ल
ब्धास्मृतिर्येनसः दीर्घंउच्छ्वासंयथाभवतितथातत्रास्थितः सन् ॥९॥ सूतिर्देहोत्पत्तिर्वातैर्वेपितः सोदरः
समानोदरजन्माविष्ठाभूर्विष्ठोत्पन्नः कृमिरिव ॥१०॥ नाथमानोयाचमानः उपतप्यमानइतिवासप्तवध्रिर्देहात्म
दृष्टीभीतः पुनर्गर्भवासभयात्सप्तवध्रयोबंधनभूताधातवोयस्यविक्लवयाआकुलया ॥११॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यक्त्रा४ येनस्येषसेवक३ ८१ तांमार्थः१

श्री भाग टी उपसन्नेजगद्व्यवितंस्वेच्छयागृहीतनानामूर्तेःभगवतःचरणारविंदंप्रपन्नोभयंसोहंप्रपन्नोव्रजामिभुवि च त्वादिति
श्रीकृष्णावताराभिप्रायेणअसतोऽजनस्यमेनुरूपायोगयायेनेदृशीगर्भवासलक्षणामतिर्दर्शितातस्यतवको
सौयंप्रपन्नोव्रजसिकोवातस्यविशेषः॥ त्वमित्यपेक्षायामहमात्देहेभूतेंद्रियाकारपरिणामवलंब्याश्रयः द्वियाशये३
ऊ४ ९५ कर्मभिरावृतस्वरूपबद्धवदेवास्तेसोहंयस्त्वेवंतनमामिकथंभूतमित्यपेक्षायांतमस्त्वोके विशेषंदर्श
यतिअत्रान्यमानतहृदयेवासितंप्रतीतमेवमप्यविकारंततःकृतोविशुद्धनिरुपाधिकततःअखंडोबोधोयस्यत
म्॥ ननुत्वमपिवस्तुतःपुरुषएव॥ असंयोगात्ययंप्रकृतिदृश्यत्वादिकृतेः॥ ततःकथमुभयोस्त्वयंविशेषस्तत्राह१२

यस्त्वत्रबद्धइवकर्मभिरावृतात्माभूतेंद्रियाशयमयीमवलंब्यमायां॥ आस्तेविशुद्धमविकारमखंड
बोधमातप्यमानहृदयेवसितंनमामि॥ १३॥ यःपंचभूतरचितेरहितःशरीरेछन्नोयथेंद्रियगुणार्थचिदात्मकोहं॥ येद्रियगुणार्थ२
तेनाविकुंठमहिमानमृषिंतमेनंवंदेपरंप्रकृतिपूरुषयोःपुमांसं॥ १४ यन्माययोरुगुणकर्मनिबंधनेस्मिन्
सांसारिकेपथिचरंस्तदभिश्रमेण नष्टस्मृतिःपुनरयंप्रवृणीतलोकंयुक्त्याकयामहदनुग्रहमंतरेण॥ १५

यःपंचभिर्भूतैरचितेशरीरेअयथ्यामिथ्यैवछन्नःनवस्तुतःयतस्तेनशरीरेणरहितोमुक्तःअतोयथेंद्रियगुणा
र्थचिदात्मकःइंद्रियाणिगुणाःशब्दाद्यर्थाःचिदाभासश्चतदात्मकःसोहंतेनवंदेकथंभूतंतेनशरीरेणअविकुंठमहि
३२ मायस्यतमकुंठेतिपाठेअवस्कंठमावरणंयस्यसमहिमायस्येत्यर्थः तत्रहेतुःप्रकृतिपुरुषयोःपरंनियंतार
ऋतःऋषिंसर्वज्ञंविद्याशक्तिमित्यर्थः॥ विद्याविद्याशक्तिकृतोविशेषइतिभावः॥ ननुत्वमेनामार्थबंधान्निवर्तिष्यते
किंपरमेश्वरवंदनेनतत्राह॥ १४॥ यस्यमाययानष्टस्मृतिःसनसंसारसंबंधिनिपथिचरनदभिश्रमेणातक्लेशेनक्ले
शेनचरनयंजीवोमहत्तस्यैवेश्वरस्यानुग्रहंविनाकयायुक्त्यालोकंनिजस्वरूपंप्रवृणीतसंभजेत॥ १५॥ १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कर्माणिबंधनानियस्मिन्नीश्वरप्रसादेविनाशनामावान्
श्रुतिप्रमदेहत्वेनपंथानंविशिनष्टिउद्भ्रान्तानिमितानिकर्माणिबंधनानियस्मिन्नीश्वरप्रसादेविनानाकर्तमोक्षदधात्रको
एवमेवाश्वत्यर्थः ईश्वरएवत्तानदइत्यपपादयन्नाह ॥ १५ ॥ यदेतत्त्रिकालविषयेज्ञानेनविनाकर्तमोक्षदधात्रको
यिकिंनसदेवईश्वरएवअन्यःप्रकृतोजीवादथातनेत्याहजीवकृपाकर्मेषदर्वीम्यउवर्तमानाःवयमितितद्य
तिरेकेणानकोपिसमर्थइत्यर्थः ॥ अन्यत्राप्यसंभवमुक्तातस्यसंभवमाह ॥ स्थिरेषुचरेषुचांतर्यामिरूपेणाव्य
नुवर्तितःश्रेशोयेनतंभजेमस्व उःखंविलापयन्नाह ॥ १८ ॥ अन्यदेहविवरेमातृनदरउदरेयःअम्रमिवएम्

ज्ञानंयदेतदधाकृतमःसदेवसैवकालिकं स्थिरचरेष्वनुवर्तितांशः ॥ तंजीवकर्मपदवीमनुवर्त
मानानांपित्रयोपशं येवयंभजेम ॥ १६ ॥ देहान्यदेहविवरेजठराग्निनास्त्रुग्विएम्रवकृपणानितेभ्यात्म
देहः ॥ इह्यत्रितोविवसितुनगणायन्नमासान्निर्वाम्यतेकृपणधीर्भगवन्कदानु ॥ १७ ॥ येनेदृशीगतिम
सोदशमास्यईशासेयान्दितःपुरुदयेनभवाहृशेन स्वेनैवतुष्यतहृतेनसदीननाथःकोनामतत्प्र
तिविनांजलिमस्यकुर्यात् ॥ १८ ॥

नहृपस्तस्मिन्यतितःतत्रजठराग्निनाभ्रांतमोदेहोयस्यअत्रकृपणाधीर्यंस्यइतोविवरात्विवसितुंविर्गे
त्वामिछन्नस्वमासान्गणायन्नौकदानुबाह्यनिर्वासयेतेतत्कृतमुपकारंस्मरन्नाह ॥ १७ ॥ येनेदृशींगतिंज्ञानंभ
वाहृशेनेतिनिरूपमेनेत्यर्थः ॥ स्वकृतेनैवस्वयंतुष्यतश्रंजलिमात्रंविनानतत्कृतोपकारेकःप्रत्युपकारंकुर्या
दित्यर्थः ॥ ईदृशीमतिमित्यनेनजातिस्मरविलक्षणंज्ञानंप्रार्थितवानित्यर्थःतदेववैलक्षण्यमाह ॥ १९ ॥ ॥

श्री भाग टी १९

अथ मम परं पश्यत्वादिः सप्तवध्रिः जीवः स्वदेहे शारीरं भवेत् सप्तवध्रुः विवेकैवलं नन्वयं पश्यन् प्रत्यहं पुनर्यं तत्सृष्टया धिषणया आवृ
तेन विवेकज्ञानेन दमशरीरी दमः इन्द्रियपलनं तेन शमदमादियुक्तशरीरवान् शारीरमभवं तमेव पुराणमनादिं पुरुषं बहिर्
बहिश्च हृदि मध्ये च पश्ये पश्यामि इत्यन्वयः कथंभूतं पश्यति तं चैत्यमिवाहंकारास्पदं भोक्तारमिवेत्यर्थः ॥ विवेक
ज्ञानकृतं संसारोद्वेगमनुवदन् मोक्षमार्गमेवाध्यवस्यति द्वाभ्यां ॥१९॥ हे विभो बहुदुःखवासं यथा भवति तथा गर्भे
वसन्नपि सोहं गर्भाद्बहिर्निर्गन्तुमिच्छामि न इत्येतः ॥ अंधकूपे अयं यत्र बहिः कूपप्राये अन्तगतं प्राणिनं देवस्य तव माया उपसर्प

पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे ॥ यत्सृष्टयासं तमहं पुरुषं पुराणं
पश्ये बहिर्हृदि च चैत्यमिव प्रतीतं ॥२०॥ सोहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरं
धकूपे यत्रोपयातमुपसर्पति देवमाया मिथ्या मतिर्यदनु संसृतिचक्रमेतत् ॥२१॥ तस्मादहं विगतविक्लव
मु उद्धरिष्य आत्मानमाशु तमसः सुहृदात्मनैव ॥ भूयो यथा व्यसनमेतदनेकरंध्रं मा मे भविष्यदुपसादितविष्णु
पादः ॥२२॥ कपिल उवाच ॥ एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः ॥ सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमा
रुतः ॥२३॥ तेनावसृष्टः सहसा कृत्वावाक्शिर आतुरः ॥ विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः ॥२४॥
भुव्यसृङ्मिश्र पतितो भुवि विस्रविष्ठाभूरिव चेष्टते रोरूयति गते ज्ञाने विपरीतां गतिं गतः ॥२५॥

तिशाङ्गेति ॥ यदनु यां मायामनु मिथ्यामतिः देहे बुद्धिः संसृतिचक्रं च षड्भिः कललादिभिः तथाउपसर्पति ॥२१॥ तस्मादहं दैव
स्थितोपि विगतविक्लवः सन् सुहृदात्मना सारथिरूपया स्वबुद्ध्या एवात्मानं तमसः संसारादुद्धरिष्यामि अनेकरंध्रमने
कगर्भवासरूपं व्यसनमेतच्च मम दुःखं यथा मे भविष्यत् ॥ न भविष्यतीति तथा कथं उपसाधनसामग्री तत्राह उपसा
दितौ हृदये स्थापितौ विष्णोः पादौ येन मया सः ॥२२॥ दशमास्य इति परिच्छेदकाः यस्य इति पूर्वं लक्षणोपलक्षणं ज्ञानं स्मृतिः
जीवः सद्यः तत्क्षणमेवावाङ्मुखं स्तुतिरेव मारुतः क्षिपति ॥२३॥ अवसृष्टः क्षिप्तः स्मृतः ॥२४॥ रोरूयति रोदिति ॥२५॥ १९

नुदति: स्रधः। रोरूयति:

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परस्यच्छेदमभिप्रायमविदुषाजनेन अभिप्रेतस्य मार्थं रोदनेनोररव्यग्रं प्रकल्पयानिं वरमपानेऽरुव्याख्याया रोदने
स्तन्यपानमित्यादि ॥ २५ ॥ आसनोत्थानचेष्टनेवानीशाः सन्नरोहयती त्वत्तुषंवाः ॥ २६ ॥ आमाकोमलानकूयस्यते॰
विगतेगर्भजातेत्तानेयस्य ॥ २७ ॥ पौगण्डवेपेवृवर्षाणि ततः ॥ पौगंडयौवनादर्वाक् ॥ तत्रचाध्ययनादिदुःखमाहस
दोर्भिः ॥ २८ ॥ अलब्धाभीप्सितेनेच्छाचारिंतःशानः ॥ अज्ञानादिहोदीप्तमन्युर्येस्यमः ॥ देहेनसहैववर्धमानेनम
न्युनाचविरोधंकरोतिश्रात्मनोनतायनाशाय अज्ञानेप्रपंचयति ॥ २९ ॥ भूतैरारब्धदेहेश्वमस्राग्रहोहंममेतिकरोति॰

परच्छेदमविदुषा पुष्यमाणोजनेन सः ॥ अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः ॥ २५ ॥ शायितोशुचिपय॰
र्यंकेजंतुःस्वेदजदूषिते ॥ नेशःकंडूयनेंगानामासनोत्थानचेष्टने ॥ २६ ॥ तुदंत्यामत्वचंदंशामशकामत्कुणा॰
दयः ॥ रुदंतंविगतज्ञानंकृमयःकृमिकंयथा ॥ २७ ॥ इत्येवंशैशवंभुक्त्वादुःखंपौगंडमेवच ॥ अलब्धाभीप्सितो
ज्ञानादिद्धमन्युःशुचार्दितः ॥ २८ ॥ सहदेहेनमानेनवर्धमानेनमन्युना ॥ करोतिविग्रहंकामीकामिष्वंतायचा॰
हप५ त्मनः ॥ २९ ॥ भूतैःपंचभिरारब्धेदेहेदेह्यबुधोसकृत् ॥ अहंममेत्यसद्ग्राहःकरोतिकुमतिर्मतिं ॥ ३० ॥ तदर्थंकु॰
रुतेकर्मयद्बद्धोयातिसंसृतिं ॥ योनुयातिददत्क्लेशमविद्याकर्मबंधनम् ॥ ३१ ॥ यद्यसद्भिःपथिपुनःशिश्नो॰
दरकृतोद्यमैः ॥ आस्थितोरमतेजंतुःतमोविशतिपूर्ववत् ॥ ३२ ॥ सत्यंशौचंदयामौनंबुद्धिःश्रीर्ह्रीर्यशःक्षमा
शमोदमोभगश्चेतियत्संगाद्यातिसंक्षयं ॥ ३३ ॥ तेष्वशांतेषुमूढेषुखंडितात्मस्वसाधुषु ॥ संगंनकुर्याच्छोच्ये॰
षुयोषित्क्रीडामृगेषुच ॥ ३४ ॥

२॰ तदर्थंदेहार्थंयेनकर्मणाबद्धोदेहःअनुयातिपुनःपुनरायातिस्त्रियंवर्तते ॥
इतिवाकुतः ॥ अविद्याकर्मभ्योनिबध्यंइतितथा ॥ ३१ ॥ यद्यसद्भिःपथिस्थितःसन्तेषांपथ्यसन्मार्गेरमते ॥ आस्थि
तोपियद्यसद्भिःसहरमतेइतिवातर्हियाननादेहंप्राह्यैन्यादिपूर्वोक्तप्रकारेणनरकंप्रविशति ॥ ३२ ॥ अमंतं
गोतंदत्तित्रिभिः ॥ ३३ ॥ खंडितात्मसुदेहात्मबुद्धिषुयोषितांक्रीडामृगवदधीनेषु ॥ ३४ ॥ ॥ ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यथात्मयोषित्संगिनां संगतो बंधः तथान्यप्रसंगतो न भवेत् ॥ योषित्संगस्यानर्थहेतुतां प्रपंचयति सप्तभिः ॥ ३५ ॥ रोहि-
द्भूतां मृगीरूपां सतीं ऋक्षरूपो मृगरूपः ॥ निर्लज्जः सन् ॥ ३६ ॥ तेन ब्रह्मणा सृष्टा ये मरीच्यादयः प्रजाः ॥ तैः सृष्टाः कश्य-
पादयः तैरपि देवमनुष्यादयः तेषु को नु पुमान् ॥ अखंडितधीः अनाक्रष्टमनाः ॥ ३७ ॥ दिशां जयिनः भ्रूमात्रवि-
जृंभ ॥ प्रतिलब्ध आत्मरूपो लाभो येन मत्सेवया ... यां प्रमदां निरयद्वारं वदंति योगिनः ॥ ३९ ॥ शनैः सत्रूपत्वादि-

स्पृष्टः

न तथास्य भवेन्मोहो बंधश्चान्यप्रसंगतः ॥ योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ॥ ३५ ॥ प्रजापतिः स्वां दुहि-
तरं दृष्ट्वा तद्रूपधर्षितः ॥ रोहिद्भूतां सोन्वधावदृक्षरूपी हतत्रपः ॥ ३६ ॥ तत्सृष्टसृष्टसृष्टेषु को न्वखंडितधीः पु-
मान् ॥ ऋषिं नारायणमृते योषिन्मय्येह मायया ॥ ३७ ॥ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशां
या करोति पदाक्रांतान् भ्रूविजृंभेण केवलं ॥ ३८ ॥ संगं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः
मत्सेवया प्रतिलब्धात्मलाभो वदंति या निरयद्वारमस्य ॥ ३९ ॥ योपयाति शनैर्माया योषिद्देवविनिर्मिता
तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ॥ ४० ॥ यां मन्यते पतिं मोहान्मन्मायामृषभायतीं ॥ स्त्रीत्वं स्त्रीसं-
गतः प्राप्तो वित्तापत्यगृहप्रदम् ॥ ४१ ॥ तामात्मनो विजानीयात्पत्यपत्यगृहात्मिकां ॥ दैवोपसादितं मृ-
त्युं मृगयोर्गायनं यथा ॥ ४२ ॥ ॥

४१ मुमुक्षुः

॥ मिषेण उपयाति या योषिद्रूपा माया तां मृत्युं प्रतिकूलमीक्षेत ॥ स्त्रियं प्रत्येतद्देवाह यामिति ... मृषभायतीं पुरुषवदा-
चरंतीं यां मम मायां वित्तादिप्रदं पतिं मन्यते स्त्रीसंगतः अंतकाले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ॥ ४१ ॥ ४२ तां वि-
त्तादिरूपेण संजानीयात् मृगयोः लुब्धकस्य गायनमत्रानुकूलत्वेन प्रतीयमानमपि यथा मृगस्य मृत्युः ॥ ४२ ॥ ९०

कर्मसंभवकूनितन्न लोकांतरगमनं २

तदेवं जीवस्य संसृतिः प्रपंचिता तत्र चेतस्य कर्मव शेन लोकाध ॥ लोकांतरगमनं जन्ममरणे चोक्तं तत्रैवं शंकाते ॥ नत्र
व्यापकस्य कथं लोकात लोकांतरगमनं नित्यस्य वकथं जन्ममरणे भोगे न कर्म तत्रैव सति जन्ममरणे वै ध्येते तत
ऊतः पुनरपि तस्यैक मेव शेभवतीत्याह ॥ देहे नजीवस्योपाधितया भूतेन जातैर्लिंगदेहेन लोकांतरमनु ब्रजन
विरतं कर्माणि करोति ॥ कर्मणाम समाप्तिरुक्ता जन्ममरणसंभवमाह ॥ ७२ ॥ जीवस्योपाधि लिंगदेहः स्थाना
नो नुवर्तीभूतेंद्रियमनोमयः स्थूलभूतादिविकारो देहः भोगायतनं तस्य निरोधः ॥ कार्यायोग्यतानाटस्य जीवस्य
मरणमुच्यते ॥ आविर्भावस्तु संभवो जन्मोच्यते एतदेव द्रष्टांतेन स्पष्टयति ॥ ७३ ॥ दिदाके यदायोग्यता तदेव च

देहे न जीवभूतेन लोकालोकमनुव्रजन ॥ भुंजानएव कर्माणि करोत्यविरतं प्रमाद ॥ ७२ ॥ जीवस्यानुग
तो देहो भूतेंद्रियमनोमयः ॥ तन्निरोधोस्य मरणमाविर्भावस्तु संभवः ॥ ७३ ॥ द्रव्योपलब्धिस्थानस्य द्रव्ये
क्षायोग्यता यदा ॥ तदेव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यता ॥ ७४ ॥ यथाक्ष्णो र्यावयवदर्शनायोग्यताय
दा ॥ तदेव जन्ममदं स्यात्मकृत्वत्रिर्दिवदर्शनं ॥ तस्मान्न कार्यः संत्रासो न कार्पण्यं न संभ्रमः बुद्ध्वा
जीवगतिं धीरोमुक्तसंगश्चरेदिह ॥ ७५ ॥

द्रव्यं द्वियस्यायोग्यता श्चनयोर्मध्ये चक्षुषोः यदायोग्यता तदेव द्रष्टुर्जीवस्य द्रष्टृत्वायोग्यता एवं स्थूलदेहवैक
ल्यं लिंगदेहस्य वैकल्यं तदेव जीवस्य मरणं शरीरादपसरणं न स्वतश्च त्यर्थः ॥ ७४ ॥ क्वचिदयमेकः श्लोकोधिकः पठ
ते तत्रायमर्थः द्रव्योपलब्धिस्थानस्य स्थूलशरीरस्य द्रव्येक्षायां यदायोग्यता तत्र चतन्मरणं अहं मानादिरमेवाह
मित्यभिमानेन द्रष्टुस्स्य स्थूलशरीरस्य दर्शनमुत्पत्तिः यतिगोलकयोः द्रव्यावयवस्य रूपादे दर्शनेयोग्यता शोधस
मानं यस्मात्र वस्तुतो जीवस्य जन्ममरणादि तस्मात मरणान संत्रासो न कार्यः जीवनेन च कार्पण्यं कार्यं संभ्रमश्च जी
वनस्य त्वेन च सर्वथामुक्तसंगतेकथं जीवितमात्तमाह ॥ ७५ ॥ ॥

द्रव्योपलब्धिस्थानस्येद्रोलकादेः द्रव्येक्षायां दर्शने चाक्षुकान ला

मरणे द्रष्टांतः २

नयोः

श्री भाग० टी० ९८

सम्यक्प्रश्यन्तिविचारयतोतितयाबुद्ध्यामायाविरचितेलोकेकलेवरंन्यस्यानित्यित्यन्तस्मिन्नात्मसक्तिंनकोपिचरेदि-
त्यर्थः ॥ ५८ ॥ इतिश्रीभावार्थदीपिकायांतृतीयेएकत्रिंशोऽध्यायः ॥ ३१ ॥ द्वात्रिंशेसात्त्विकीधर्मेह्यूर्ध्वागतिरुदीर्यतेनतत्वज्ञान
विहीनस्यतत्त्वपुनरागतिः तदेवंपापकर्मणोगतिमुक्त्वाइदानींकाम्यकर्मणोगतिमाहचतुर्भिः ॥ योगृहए-
वावसन्स्वान्धर्मान्दोग्धिदोहमाह ॥ कंममअर्थंचतान्धर्मान्भूयःपिपर्तिपूरयतिप्रवर्तयतीति ॥ १ ॥ सो-

सम्यक्दर्शनयाबुद्ध्यायोगवैराग्ययुक्तया ॥ मायाविरचितेलोकेचरेन्न्यस्यकलेवरं ॥ ५८ ॥ इतिश्रीभागव-
तेतृतीयेकापिलेयोपाख्यानेजीवगतिर्नामएकत्रिंशः ॥ ३१ ॥ कपिलः ॥ अथयोगृहमेधीयान्धर्मानेवे-
वावसन्गृहे ॥ काममर्थंचधर्मांश्चदोग्धिभूयःपिपर्तितान् ॥ १ ॥ सचापिभगवद्धर्मात्काममूढःपराङ्मु-
खः ॥ यजतेक्रतुभिर्देवान्पितॄंश्चश्रद्धयान्वितः ॥ २ ॥ तच्छ्रद्धयाक्रान्तमतिःपितृदेवव्रतःपुमान् ॥ गत्वाचा-
न्द्रमसंलोकंसोमपाःपुनरेष्यति ॥ ३ ॥ यदाचाहीन्द्रशय्यायांशेतेनन्तासनोहरिः ॥ तदालोकालयंयान्ति
यएतेगृहमेधिनः ॥ ४ ॥

भगवद्धर्मात्पराङ्मुखःसन्श्रद्धयाकृता देवान्पितॄंश्चयजतेकिंतन्नइत्यर्हत्तेषांश्रद्धयाक्रान्तामतिर्य-
स्यपित्रर्थंचव्रतेनियमोयस्य सोमपानंतत्रसोमंपीत्वेत्यर्थः लोकेनिवृत्त्यापिपुनरायातितया
स्यातत्कृतलोकानामपिलयमाहएषालयेभगवद्धर्मनिष्ठानांतत्प्राप्तिमेवगतिमाहत्रिभिः ॥ ४ ॥ ॥ ॥ ९८

देवार्थं २ यद्धांहरहः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

येतत्कामार्थप्रयोजनाय स्वधर्मान्न दुह्यंति निःसंगा अनासक्ता न्यस्तानि ईश्वरे समर्पितानि कर्माणि यैः विश्वतो
मुखं परिपूर्णं पुरुषं यांति तथा च श्रुतिः सूर्यद्वारेण ते विरजाः ॥ प्रयांति तत्रामृतः पुरुषो ह्यव्ययात्मेति श्रुतेः मा॰२
मुपादानकारणं उत्पत्त्यंतभावने निमित्तकारणं परमेश्वरं इति हिरण्यगर्भोपासकानामपि क्रमेण मुक्ति
माह त्रिभिः ॥६॥ परस्य हिरण्यगर्भस्य परचिंतकाः परमेश्वरस्य इत्याह हिरण्यगर्भोपासकाः ॥७॥ क्ष्मादीनि पं
च महाभूतानि मनश्चेंद्रियाणि च अर्थाश्च ॥ भूतादिरहंकार एवमादिभिः परिवृतं ब्रह्मांडं संप्रतिहर्तुं॰ शब्दादयः

ये स्वधर्मान्न दुह्यंति धीराः का॥मार्थहेतवे॥ निःसंगा न्यस्तकर्माणः प्रशांताः शुद्धचेतसः ॥५॥
निवृत्तिधर्मनिरता निर्ममा निरहंकृताः॥ स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा ॥६॥ सूर्यद्वारेण
निरता॰२ ते यांति पुरुषं विश्वतोमुखं परावरेशं प्रकृतिमस्योत्पत्त्यंतभावनं ॥७॥ द्विपरार्धावसाने यः प्रल
यो ब्रह्मणस्तु ते ॥ तावदध्यासते लोकं परस्य परचिंतकाः ॥८॥ क्ष्माम्भोनलानिलवियन्मन इंद्रिया
र्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनुभूय
परः स्वयंभूः ॥९॥ एवं परेत्य भगवंतमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः ॥ तेनैव साक
ममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयांत्यगताभिमानाः ॥१०॥ ॥ प्रद्दु१

मिच्छुः सन् अव्याकृतमीश्वरं पराख्यं द्विपरार्धलक्षणं कालं ॥८॥ परेत्य गत्वा भगवंतं हिरण्यगर्भमनुप्र
विष्टा ये योगिनः अमृतं परमानंदरूपं प्रधानमुत्कृष्टं ब्रह्म तेनैवोपयांति न तु पृथक् यतस्तदा अगताभिमानाः
तथा च श्रुतिः ॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः ॥ प्रविशंति परं पदमिति भगवदुपास
कास्तु सालोक्यादिवंतेशाश्ववंति न तु क्रमेंतत्त्वसायात्तानमेव भजेन्याह ॥ ९॥ ॥

एभ्र१ चैर१ सहा२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अथ तस्माद्भावेन प्रेमलक्षणेन एवं तावद्भगवद्भक्तानां निरंतरमेव तत्प्राप्तिर्भगवद्भेदेन हिरण्यगर्भोपासकानां क्रमेण मु
क्तिर्भेदेनोपासनेन तु ब्रह्मादयोप्यावर्तन्ते किमुतान्ये इत्याह चतुर्भिः ।।१०।। यो वेदगर्भः सोपि गुणव्यतिकरे जाते पूर्वं
यथा ब्रह्मपदाधिकृतः सन् प्रजापत्येन केवलं सम्प्र वेकः किंतु ऋषिभिर्मरीच्यादिभिर्योगेशैः सह जन्मान्ति देहत स्वरादिभिश्चह
हृदयं भेददृष्ट्याभिमानेन कर्तृत्वादिति च यथापूर्वं तत्र हेतुः ।।११।। निःसंगेन निष्कामेण कर्मणा किं कृत्वा प्रजापत्येष्व
र्थं पारमेष्ठ्यमैश्वर्यं निषेव्य पश्चात्प्रलये सगुणं गुणाधिष्ठातारं प्रथमावतारं पुरुषं ।।१२।। संसृत्य प्राप्य ।।१३

अथैतं सर्वभूतानां हृत्पद्मेषु कृतालये ।। श्रुतानुभावं शरणं व्रज भावेन भामिनि ।।१०।। आद्यः स्थिरच
राणां यो वेदगर्भः सहर्षिभिः ।। योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः ।।११।। भेददृष्ट्याभिमानेन निः
संगेनापि कर्मणा ।। कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभं ।।१२।। स संसृत्य पुनः काले कालेनेश्वर
मूर्तिना ।। जाते गुणव्यतिकरे यथापूर्वं प्रजायते ।।१३।। ऐश्वर्यं पारमेष्ठ्यं च तेपि धर्मविनिर्मितं ।। नि
षेव्य पुनरायांति गुणव्यतिकरे सति ।।१४।। ये त्विहासक्तमनसः कर्मसु श्रद्धयान्विताः ।। कुर्वन्त्यप्रतिषि
द्धानि नित्यान्यपि च कृत्स्नशः ।।१५।। ।।

तेपि ऋषिप्रमुखाः स्वकर्मनिर्मितमैश्वर्यं निषेव्य पुरुषं च संसृत्य यथापूर्वं स्वाधिकारेण पुनरायांतीत्य
न्वयः ।।१४।। यदा ब्रह्मोपासकानामपि भेददर्शनाभिमानाभ्यामेवावृत्तिः तदा काम्यकर्मणां किं वक्तव्यमि
त्याह त्रिभिः ये त्विह कर्मस्वासक्तमनसः संतः अप्रतिषिद्धानि काम्यानि नित्यानि च कर्माणि कृत्स्नानि कु
र्वंति ते अर्यमादि पित्र्येण धूम्रमार्गेण पितृलोकं व्रजंतीति पंचमेनान्वयः मध्ये तत्त्विरदा ।।१५।। ।। ९५

नि

२७॥

हरिमिमंसारेमेथायस्यकथनीयाउरवोविक्रमायस्यमधुद्विषः ॥ कथायांविमुखाः संतोयेत्रैवर्गिकाः येषांहृन्नस्यकुरुध्व
स्वर्थाद्दिवाप्रसन्तांगाथ्याः ॥ एवंतिनूनंदेवेनविहतास्त्यन्वयः ॥ १८ ॥ पितृलोकीमन्तुः प्रजामनुप्रजादिप्रजायते
गर्भाधानादाभ्यश्मशानान्ताः क्रियाः कृतवन्तोयथोक्तकारिणइत्यर्थः ॥ कथंप्रजायैनेतदाह ॥ १९ ॥ ततस्तेपुनरे
मंलोकंप्रतिपतन्तिविभ्रंशितउदयोभोगसाधनंयेषां ॥ २० ॥ परमेष्ठिनेपरमेश्वरंतस्यगुणानाश्रयतेयाभक्तिस्त

रजसाकुंठमनसः कामात्मानोजितेंद्रियाः ॥ पितॄन्भजंत्यनुदिनंगृहेष्वभिरताशयाः ॥ १६ ॥ त्रैवर्गिकास्ते
पुरुषाविमुखाः हरिमेधसः ॥ कथायांकथनीयोरुविक्रमस्यमधुद्विषः ॥ १७ ॥ नूनंदैवेनविहतायेचा
च्युतकथासुधां ॥ हित्वाशृण्वंत्यसद्गाथाः पुरीषमिवविड्भुजः ॥ १८ ॥ दक्षिणेनपथार्यम्णः पितृलो
कंव्रजंतिते ॥ प्रजामनुप्रजायंतेश्मशानांतक्रियाकृतः ॥ १९ ॥ ततस्तेक्षीणसुकृताः पुनर्लोकमिमंसति
पतंतिविवशादैवैः सद्योविभ्रंशितोदयाः ॥ २० ॥ तस्मात्त्वंसर्वभावेनभजस्वपरमेष्ठिनं ॥ तद्गुणाश्रययाभ
क्त्याभजनीयपदांबुजं ॥ २१ ॥ वासुदेवेभगवतिभक्तियोगः प्रयोजितः ॥ जनयत्याशुवैराग्यंज्ञानंयद्ब्रह्मदर
र्शनं ॥ २२ ॥ यदास्यचित्तमर्थेषुसमेष्विंद्रियवृत्तिभिः ॥ नविगृह्णातिवैषम्यंप्रियमप्रियमित्युत ॥ २३ ॥ सत
दैवात्मनात्मानंनिःसंगंसमदर्शनं ॥ हेयोपादेयरहितमारूढंपदमीक्षते ॥ २४ ॥ ॥

वासुदेव इति ।

याभूज्ञानेनचतानवैराग्येस्वतएव भवतइत्याह ॥ २१ ॥ तदेवोपपादयति ॥ २२ ॥ यदास्यभक्तस्यचित्तंभगवः कृपाद्
रागोनास्तिवैवतिष्ठिवलंसांद्रियवृत्तिभिः वैषम्यमर्थेनगृह्णाति ॥ २३ ॥ तदैवात्मानंस्वप्रकाशमीक्षते कथंभूतं
समंचतद्दर्शनंच ततःज्ञानतोनिःसंगंसंगाद्वैषम्यंभवतिनिःसंगत्वेहेतुर्हेयोपादेयरहितंततःआरूढंपरंब्रह्मसितमा
रूढंपरमानंदोहमितितिष्ठत्वंप्रापमित्यर्थः समेष्वर्थेष्विस्तकेनतदेवसाम्यंदर्शयति ॥ २४ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ज्ञानमिति ४

श्री भाग टी ११०

ज्ञानमात्रमेव परं ब्रह्मादिशब्दैः प्रसिद्धं दृश्यादिभिः दृश्यद्रष्टृकरणरूपेण पृथक्प्रतीयते ज्ञानमात्रत्वेन समत्वेपि त्य
र्थः नन्वज्ञानमात्रं स्वात्मनः स्वरूपत्वात् नित्यप्राप्तमेवेति किमनेकसाधनसाध्येन योगेन प्राप्यते तत्राह ॥ २७ ॥ एतावानिति २
युज्यते प्राप्यते प्रपंचसंगाभ्युदासएव योगफलमित्यर्थः ॥ ननु कथं प्रत्यक्त्वादिप्रतीतिः प्रपंचो व्यवहारोस्ति तत्राप्य पं २
तत्प्रतीतेर्भ्रान्तत्वादित्याह ॥ २८ ॥ पराचीनैः पराङ्मुखैः शब्दादिधर्मा यस्य तेनार्थरूपेण ज्ञानरूपेण ज्ञानरूपं निर्गु
णं एव ब्रह्मैवं भा(ति)त्यर्थः ॥ दृश्यमानमित्यर्थः अथ रूपत्वमेवोदाहृत्य प्रदर्शयति ॥ २९ ॥ अहंरूपः अहंकारः स च त्रिवृत् त्रैगु(ण्यात्)

ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते ॥ २७ ॥ एतावानेव यो
गेन समग्रेणेह योगिनः ॥ युज्यतेभिमतो ह्यर्थो यदसंगस्तु कृत्स्नशः ॥ २८ ॥ ज्ञानमेकं पराचीनैरिंद्रि
यैर्ब्रह्म निर्गुणं ॥ अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा ॥ २९ ॥ यथा महानहंरूपस्त्रिवृत्पंचविधः
स्वराट् ॥ एकादशविधस्तस्य वपुरंडं जगद्यतः ॥ ३० ॥ एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः
समाहितात्मा निःसंगो विरक्त्या परिपश्यति ॥ ३१ ॥ इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनं येनानुबु
ध्यते तत्त्वं प्रकृतेः पुरुषस्य च ॥ ३२ ॥ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः द्वयोरप्येक एवार्थो भ
गवच्छब्दलक्षणः ॥ ३३ ॥

वपुरंडं १

गुणात्मकः पुनर्भूतरूपेण पंचविधः इंद्रियरूपेणैकादशविधः ॥ स्वराट् जीवरूपः तस्य जीवस्य जगत् यतः
तेभ्यः महदादिभ्यस्तथा अवभाति न तु तत्र हि जनः किमित्येवं न पश्यतीति तत्राह ॥ ३० ॥ एतद्ब्रह्म उक्तमेवार्थमु
क्त्वेन प्रतिपन्नार्थं संक्षेपेणानुवदति ॥ ३१ ॥ अनेन च ज्ञानयोगेन भगवानेव प्राप्यो यथा भक्तियोगेनेत्याह ॥ ३२ ॥ नै
र्गुण्यो ज्ञानयोगश्च मन्निष्ठो भक्तिलक्षणश्च योगः तयोरप्येक एवार्थः प्रयोजनं कोसौ भगवच्छब्दः उपल
क्षणं ज्ञापको यस्य ॥ ३३ ॥ द्वयो १ ११०

इतीति हेतुर्व्विसृज्यते २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नडक्तं गीतासु। ते प्राप्नुवंति मामेव सर्वभूतहिते रता इति निर्गुणज्ञानयोगस्यात्मलाभः फलं प्राप्स्त्रेणावगम्यते भ
क्तियोगस्य तु भजनीयेश्वरप्राप्तिं ज्ञानस्तयोरेकार्थत्वमित्याशंक्याह द्वाभ्यां तेनोपपादयति ॥ ३१ ॥ यथा वह्नेनो रू
परसादीनां गुणानामाश्रयो गुडदीनादिः ॥ एक एवार्थो मार्गभेदः प्रवृत्तिभिरिंद्रियैर्नाना प्रतीयते एवं ज्ञानेषु
लक्ष इति रसेन मधुरं इति स्पर्शेन शीतं इति तथा भगवानेव ज्ञानेन पूर्णत्वाद्गम्यते शास्त्रमार्गैर्नैव प्रपंचयति क्रि

श्रु॰

यथेंद्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः ॥ एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः ॥ ३२ ॥ क्रियया
क्रतुभिर्दानैस्तपःस्वाध्यायमर्षणैः ॥ आत्मेंद्रियजयेनापि संन्यासेन च कर्मणां ॥ ३३ ॥ योगेन विवि
धांगेन भक्तियोगेन चैव हि ॥ धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ॥ ३४ ॥ आत्मतत्त्वावबोधे
न वैराग्येण दृढेन च ॥ ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ॥ ३५ ॥ प्रावोचं भक्तियोगस्य स्वरू
पं ते चतुर्विधं ॥ कालस्य चाव्यक्तगतेर्योऽन्तर्धावति जंतुषु ॥ ३६ ॥ जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मि
ताः ॥ यास्वंग प्रविशन्नात्मा न वेद गतिमात्मनः ॥ ३७ ॥ नैतत्खलायोपदिशेन्नाविनीताय कर्हिचित्
न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ॥ ३८ ॥ न लोलुपायोपदिशेन्न गृहारूढचेतसे ॥ नाभक्ता
य च मे जातु न मद्भक्तद्विषामपि ॥ ३९ ॥ श्रद्दधानाय भक्ताय विनीतायानसूयवे ॥ भूतेषु कृतमैत्राय शु
श्रूषाभिरताय च ॥ ४० ॥ ॥ ॥

भिः ॥ ३२ ॥ क्रियया पूर्तं तपस्या क्रतुभिर्यागैः मर्षणं मीमांसा आत्मेंद्रिययोर्जयेन ॥ ३३ ॥ उभयचिह्नेन सकाम
निष्कामलक्षणेन तमेवाह्वय इति ॥ ३४ ॥ सकामं धर्मं प्राप्य स्वर्गाद्यपि भगवानेव सगुण सदृश पमित्यर्थः । एवं
वर्त्मभिः स्वदृक् स्वप्रकाशं तदेवं ज्ञानयोगमुपसंहृत्य तस्य च भक्तियोगत्वसमानार्थं भक्तियोगमनूपसंहृ
रति ॥ ३५ ॥ चतुर्विधं त्रिगुणभेदेनामर्थं वेति उपनिवर्तयनाकरोति ॥ ३६ ॥ अंग हे मातः उपदेशेनाधिकारिणमाह द्वाभ्यां

प्रवोचमिति द्वाभ्यां ॥ निर्गुण१ दि१

श्री
भाग
टी
२२१

खलाय यवतोद्वेजकाय भिन्नाय उराचाराय धर्मध्वजाय दांभिकाय ॥ अधिकारिणमाह द्वाभ्यां यत ह्ववदकीर्त
नयस्थापि मत्पदप्राप्तिरेव फलमित्याह ॥ अथार्थे चकारः सोपि मत्पदवीमेति प्राप्नोति ॥ इति श्रीभावार्थे
तृतीये द्वात्रिंशः ॥ ३२ ॥ त्रयस्त्रिंशे तु तस्यैव कपिलस्योपदेशतः ॥ ज्ञानलाभेन तन्मातुर्जीवन्मुक्तिरुदीर्यते ॥
विस्रस्तमोहपटलेति मोहावरणं यस्याः तत्त्वानां विषयः तेनांकिता सिद्धिः सांख्यज्ञानं तस्य भूमिस्तं प्रवर्त
कम् ॥ १ ॥ अथोपि तावकान् तस्यानोपि तवं वपुः केवलेऽयं ध्यातवान् तर्हि एव तावन्मच स्वयं साक्षात्पश्यतवजनक जठरजातः
सभवानेव विश्वस्य सर्गादि विधत्ते न तत्सर्गादिकर्ता कश्चिदस्ति एवंभूतस्त्वं मे मया कथं जठरे धृत इति तद्याह

बहिर्जातविरागाय शान्तचित्ताय दीयताम् ॥ निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ॥ ४२ ॥ य इदं शृणुयादम्ब
श्रद्धया पुरुषः सकृत् ॥ यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ॥ ४३ ॥ इति श्रीभागवते तृतीये द्वात्रिंशः
मैत्रेय उ० ॥ एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः ॥ विस्रस्तमोहपट
लान्तमभिप्रणम्य तुष्टाव तत्त्वविषयांकितसिद्धिभूमिम् ॥ १ ॥ देवहूतिः ॥ अथाप्यजोन्तःसलिले शयानं भूतेन्द्रि
यार्थात्ममयं वपुस्ते ॥ गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः ॥ २ ॥ स एव विश्वस्य भवा
न्विधत्ते गुणप्रवाहेण विभक्तवीर्यः ॥ सर्गाद्यनीहोऽवितथाभिसंधिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः ॥ ३ ॥

मत्वपः कथंभूतं वपुः सह्यजेनजठरेतः ॥ अन्तःसलिले शयानं कीदृशं भूतानींद्रियाणि चार्थाश्च आत्मा द्रप
आत्मा च मनः एतन्मयं एतेषामाश्रममित्यर्थः ॥ ऊतः गुणानां प्रवाहो यस्मिन् तत् ऊतः अतएव सत्कार्यं कारणस्य
बीजं कारणं ॥ २ ॥ कथंभूतो भवान् सर्गादि विधत्ते गुणप्रवाहरूपेण विभक्तानि वीर्याणि शक्तयो नामशक्तिद्वारे
णा विधत्ते न साक्षादित्यर्थः यतोऽनीहो न हि केवलं निरीह एव किंत्वपि कथं सर्गादि विधत्ते अवित
थाभिसंधिः सत्यसंकल्पः किमर्थं विधत्ते आत्मनो जीवानां भोगार्थमित्यर्थः ॥ ३ ॥ ॥ श्री ॥

यानं४

२२१

मीश्वरः जीवानां
नतु वेशयमेक एव विचित्रानुभेषान्
महत्त्विमपरिमिताः शक्तयोपम
विद्ध्यानस्पृतर्काणां
२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंच प्रलयेयस्योदरेयन्न दृष्टमासीत् सर्वमयाजठरे लोकयं धृतः ननु शिशोर्मयि किमेतदुच्यते तत्राह ॥ वट
पत्रश्रुतिश्रुत्ति पादांगुष्ठं पिवतीत्यंघ्रिपानः ॥ इदमपि शिशुत्वं नाटकं देवमायेति भावः ॥ ४ ॥ अथवानंतमयावस्था
नरवत् ॥ नरवेषेन किंतव शरण्य यवतारवदिच्छया पृथाविर्भूतोसीत्याह तं देह इति तं त्वं सीकृतमूर्तिर्वसिया
प्तानंदइहानां निदेशभाजां आश्रितानुवर्तिनो विभूतये समृद्धये आत्मपद्योपलब्धये ज्ञानमार्गप्रदर्शनाय अ
नसूयदर्शनात् ॥ कृतार्थोस्मीति केमन्यन्नायेनाह ॥ ५ ॥ यन्नामधेयस्य श्रवणमनुकीर्तनं वचनस्मात् ॥ कृचिक्त्यं

सर्वं भूतो मे जठरेणानायकथं तु यस्योदरे एतदासीत् ॥ विश्वं युगांते वटपत्रपक्वशेते स्म मायाशिशु
रंघ्रिपानः ॥ ४ ॥ त्वं देहतंत्रं प्रशमाय पाप्मनिदेशभाजां च समंतविभूतये ॥ यथावतारास्तव सूकरादय
स्तथायमप्यात्मपथोपलब्धये ॥ ५ ॥ यन्नामधेयश्रवणानुकीर्तना द्यत्प्रह्वणाद्यत्स्मरणादपि
क्वचित् ॥ श्वादोपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनात् ॥ ६ ॥ अहो वत श्वपचोतो गरीयान्
यज्जिह्वाग्रे वर्तते नाम तुभ्यं तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते ॥ ७ ॥ ॥

विदपि श्वानमत्तीति श्वादः सोपि सवनाय सोमयागाय कल्पते योग्यो भवति अनेन तु सकृत्पुंवल्लब्धेनेन इत्युप
दयति ॥ ६ ॥ अहो वत तेषां श्वपचोपि यस्य जिह्वाग्रे तव नाम वर्तते स श्वपच एव अतः अस्मादेव हेतोर्गरीयान् यस्मात् के
लो वर्तते अतः श्रुति वाक्यं तत्राह ॥ तप्तवंतः तेपुः कृतवंतः जुहु वुः होमं कृतवंतः ॥ सस्नुः तीर्थे स्नाताः
आर्याः सदाचारा ब्रह्म वेदमनूचुः अधीतवंतः ॥ त्वन्नामकीर्तनेन तपआद्यनुभूतमत्र न तद्भुतमेव मारमंयः
यद्वा जन्मांतरे तैः तपो होमादि सर्वं कृतमिति त्वन्नामकीर्तनेन महाभाग्योदयादवगम्यते न्यर्थः ॥ ७ ॥ १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
३ ९२

प्रत्यक्स्रोतसि प्रत्याहृते आत्मनि मनसि संविभाव्यं ... विंमं वेदो गर्भो यस्य सः ॥ ८ ॥ अविक्लवया गंभीरया
वाचा ॥ ९ ॥ सुसेव्येन मे मयोदितेनास्थितेनानुष्ठितेन परां काष्ठां जीवन्मुक्तिमवरोत्स्यसि प्राप्स्यसि ॥ १० ॥ अतद्वि
दः मत्तत्त्वविद्वांसः ॥ ११ ॥ अनुमतस्त्वनुज्ञातः ॥ १२ ॥ सरस्वत्या आपीडे पुष्पमुकुटवत्त्र्यलंकारस्वरूपे तस्मिन्नाश्रमे
ना ... नेव संवेष्टितेविंड सर्वस्मिन् समाहिता वस्त्वकर्णभूता सती समाहितानातदा ॥ १३ ॥ अभीक्ष्णाव ... त्रिष

तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यम् ॥ स्वतेजसा ध्वस्तगुणप्रवाहं वंदे वि
ष्णुं कपिलं वेदगर्भम् ॥ ८ ॥ मैत्रेय उवाच ॥ ईडितो भगवानेवं कपिलाख्यः परः पुमान् ॥ वाचाविक्लवयेत्या
ह मातरं मातृवत्सलः ॥ ९ ॥ कपिल उवाच ॥ मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे ॥ आस्थितेन परां
काष्ठामचिरादवरोत्स्यसि ॥ १० ॥ श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः ॥ येन मामभयं याया मृत्युमृ
च्छंत्यतद्विदः ॥ ११ ॥ मैत्रेय उवाच ॥ इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिं ॥ स्वमात्रा ब्रह्मवादिन्या कपि
लोनुमतो ययौ ॥ १२ ॥ सा चापि तनयोक्तेन योगादेशेन योगयुक् ॥ तस्मिन्नाश्रम आपीडे सरस्वत्याः
समाहिता ॥ १३ ॥ अभीक्ष्णावगाह कपिशान् जटिलान् कुटिलालकान् ॥ आत्मानं चोग्रतपसा बिभ्रती जटि
चीरिणं कृशम् ॥ १४ ॥ प्रजापतेः कर्दमस्य तपोयोगविजृंभितं ॥ स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानि
कैरपि ॥ १५ ॥ ॥ ॥

वणावगाहः स्नानं तेन क ... पिशान् स्वत एव कुटिलान् केशान् ॥ तथा आत्मानं देहं चीरं यथा बिभ्रं
कृशं च बिभ्रती सती वदने च किंचित् निर्विकारा ... कुलं च कारं तिष्ठेनानयः ॥ १४ ॥ प्रजापतेः कर्द
मस्य तपोयोगाभ्यां विजृंभितं स्वगार्हस्थ्यं हित्वा पुत्रमनु ... विरहातुरा सती ॥ १५ ॥ ॥ ॥ १९२

वे

नत्र माहुः स्वच्छीरफेणनिभा मृदुशुभ्राः ॥ शय्या आस्तरणानि भांति दंतवदितास्मं च काम्यस्वर्णमयपरिकराः ॥ आ
सनानि पीठादीनि सुस्पर्शान्यास्तरणानि येषु ॥ १८ ॥ १७ ॥ बहूरमरद्रुमैः ॥ १८ ॥ यत्रोद्याने प्रविष्टमात्मानं देवहूतिं विति
१९ ॥ इंद्रस्त्रीणामपि ईप्सिततमं गृहं तत् हित्वा त्याभिमानेन पत्युः कामस्य कृहिद्योगस्य ईक्षतामाह ॥ २० ॥ तेप्रवने

पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ आसनानि च हैमानि सुस्पर्शास्तरणानि च
१६ ॥ स्वच्छस्फटिककुड्येषु महामारकतेषु च रत्नप्रदीपा आभांति ललना रत्नसंयुताः ॥ १७ ॥ गृहो
द्यानं कुसुमितै रम्यं बह्वमरद्रुमैः ॥ कूजद्विहंगमिथुनं गायन्मत्तमधुव्रतं ॥ १८ ॥ यत्र प्रविष्टमा
त्मानं विबुधानुचरा जगुः ॥ वाप्यामुत्पलगंधिन्यां कर्दमेनोपलालितम् ॥ १९ ॥ हित्वा तदीप्सिततममप्या
खंडलयोषितां ॥ किंचिच्चकार वदनं पुत्रविश्लेषणातुरं ॥ २० ॥ वनं प्रव्रजिते पत्यावपत्यविरहातु
रा ॥ ज्ञाततत्त्वाप्यभून्नष्टे वत्से गौरिव वत्सला ॥ २१ ॥ तमेव ध्यायती देवमपत्यं कपिलं हरिं । बभूवा
चिरतो वत्स निःस्पृहा तादृशे गृहे ॥ २२ ॥ ध्यायती भगवद्रूपं यदाह ध्यानगोचरं सुतः प्रसन्न
वदनं समस्तव्यस्तचिंतया ॥ २३ ॥ ॥ रामाय नमः ॥ श्री ॥ श्री ॥

वत्सला गौरिवाभूत् विरहकृतध्यानफलमाह ॥ २१ ॥ निःस्पृहा निर्वासना वत्स विदुर ॥ २२ ॥ कपिलः सुतो य
दाह तद्भगवतो रूपं ध्यायती तदात्मानं विस्मृतो मृत्वं सर्वं गतां ब्रह्मण एव स्थितमतिर्बभूवेति तन्नीयेनान्व प० २३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी २२८

केन ध्यायती विशुद्धेनेत्यनेन सा विशुद्धे कारणत्वाह ॥ भक्तिप्रवाहरूपेण योगेन युक्तानुष्ठानेन जातेनेत्येतेनैव यु
क्तानुष्ठानेन वीतरागेण युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुःखहे
ति ब्रह्महेतुना ब्रह्मभावापादकेन ॥ २४ ॥ विश्वतोमुखत्वे हेतुः स्वानुभूत्या प्रकाशेन तिरोभूता माया गुणा वि
शेषणं यस्य विच्छेदो यस्य ॥ २५ ॥ कथंभूते ब्रह्मणि जीवानां संश्रये भवति तस्याः जीवन्मुक्तिमाह सार्धैस्त्रिभिः
तदा च निवृत्ता जीवापत्तिर्जीवभावो यस्यास्तस्या भावस्तत्वं तस्माद्धि यतः क्लेशा प्राप्तनिर्वृतिस्तस्मान्नैव जीव

भक्तिप्रवाहरूपेण वैराग्येण बलीयसा ॥ युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना ॥ २४ ॥ विशुद्धेन तदा
त्मानमात्मना विश्वतोमुखं ॥ स्वानुभूत्या तिरोभूतमायागुणविशेषणं ॥ २५ ॥ ब्रह्मण्यवस्थितम
तिर्भगवत्यात्मसंश्रये ॥ निवृत्तजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः ॥ २६ ॥ नित्यारूढसमाधित्वा
त्परावृत्तगुणभ्रमा ॥ न सस्मार तदात्मानं स्वप्ने दृष्टमिवोत्थितः ॥ २७ ॥ तद्देहः परतः पोषोप्यकृ
शश्चाध्यसंभवात् ॥ बभौ मलैरवच्छन्नः सधूम इव पावकः ॥ २८ ॥ स्वांगं तपोयोगमयं मुक्तकेशं
गतांबरं ॥ दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥ २९ ॥ एवं सा कपिलोक्तेन मार्गेणाचिरतः परं ॥ आ
त्मानं ब्रह्मनिर्वाणं भगवंतमवाप ह ॥ ३० ॥

देहं सस्मार नेत्यन्वयः ॥ तदनु तथापि गुणानां विषयो न सा न वा कथमस्मरणं तत्राह ॥ २६ ॥ नित्यारूढो लब्धनिष्ठः
समाधिर्यस्यास्तस्या भावस्तत्वं तस्मात्परावृत्तः शान्तो गुणनिमित्तो भ्रमो यस्याः सा ॥ २७ ॥ परतः परैः पोषो यस्य क
र्दमसृष्टविद्याधरीभिः पोषणं यस्यास्तथापि मनोग्लानिः तदसंभवादकृशो मलैरवच्छन्नो बभौ ॥ २८ ॥ तद्देवगुप्तं

हे वीर विदुर ... श्रा श्रा ११३३११

भाग टी ११४

हे सौम्य तस्याः स्नानमात्रेण शरीरं सरिदभूत् । कथंभूतं योगेन विधुता विलीना मर्त्या दैहिका धातवो मला यस्य । कपिलो यथा विनिर्गतः तत्स्थानं वर्णयति त्रिभिः ३२ । समनुज्ञाप्य अनुज्ञां संप्राप्य ३३ । दत्तमर्हणं पूजा निकेतनं च स्थानं यस्मै ३४ । उपशान्त्यै समाहित आस्ते ३५ । प्रकरणार्थमुपसंहरति एतदिति

श्री

तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतं । नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ॥ ३१ ॥ तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् । स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता ॥ ३२ ॥ कपिलोऽपि महायोगी भगवान्पितुराश्रमात् । मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ॥ ३३ ॥ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः । स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ॥ ३४ ॥ आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः । त्रयाणामपि लोकानामुपशान्त्यै समाहितः ॥ ३५ ॥ एतन्निगदितं तात यत्पृष्टोऽहं तवानघ । कपिलस्य च संवादो देवहूत्याश्च पावनः ॥ ३६ ॥ य इदमनुशृणोति योऽभिधत्ते कपिलमुनेर्मतमात्मयोगगुह्यं । भगवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविंदं ॥ ३७ ॥ इति श्रीभागवते पारमहंस्यां संहितायां तृतीयस्कंधे त्रयस्त्रिंशोऽध्यायः ३३ ॥

३६ तदनुवादश्रवणकीर्तनफलमाह य इति ३७ सुपर्णकेतौ गरुडध्वजे उपलभते प्राप्नोति ३७ इति श्रीभावार्थदीपिकायां श्रीधरस्वामिविरचितायां तृतीयस्कंधे त्रयस्त्रिंशोऽध्यायः ३३ ॥ समाप्तस्तृतीयस्कंधः ॥ ११४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative